Barcode : 99999990252886
Title -
Author -
Language - sanskrit
Pages - 188
Publication Year - 1922
Barcode EAN.UCC-13



॥ श्रीः ॥

कादम्बिनी

(पर्जन्यविद्याबोधकं निमित्तशास्त्रम्)

जयपुर-राजसभा-प्रधानपंडितेन विद्यावाचस्पतिना
महामहोपाध्यायश्रीमधुसूदनशर्म-मैथिलेन

प्रणीता

सेयं

लोकोपकाराय जयपुरराज्यान्तर्गत विसाऊनिवासिना
जोशीत्युपाह्वश्रीद्वारिकाप्रसादशर्म्मणा

कलकत्तास्थ श्रीजैनसिद्धांतप्रकाशकयंत्रालये मुद्रापयित्वा
प्रकाश्य नीता

प्रथमावृत्तिः १००० } { सम्वत् १९७९ वि०

प्राप्तिस्थान—

श्रीयुत द्वारिकाप्रसाद जोशी

बहरापट्टी नं ३ श्रीराम बाबूलाल

बड़ाबाजार—कलकत्ता।



मुद्रक—

श्रीलाल जैन काव्यतीर्थ

जैनसिद्धांतप्रकाशक पवित्र प्रेस

६ विश्वकोष लेन, बाघबाजार कलकत्ता

प्रकाशक-वक्तव्यम्

यद्यपि पुस्तकान्यनल्पानि संस्कृतसाहित्ये प्रकाशतां गतानि, परमद्य यावदस्मिन् मोगलांगलराज्ययोरन्तराले न किमपि वृष्टिसम्बन्धि पुस्तकं देवगीरसिकानां दृष्टिपथमवातरत् । तदिदमपूर्वं पुस्तकम्, अभिनवं शास्त्रं, कर्णाकर्णिकया श्रुतम् यन्नाम जयपुर-पण्डित-मण्डल-मण्डनायमाना राजपण्डिताः समीक्षाचक्रवर्तिनो-विद्यावाचस्पतयः झोपनामानः श्रीमधुसूदनशर्माणः सम्पादितवन्तः कानिचिदेवंभूतान्यपूर्वाणि पुस्तकानि वैदिकसमीक्षारूपाणि, वैदिकयज्ञानां वैज्ञानिकत्वप्रतिपादकानि, महाभारतस्य चैतिह्यासिकक्रमेण सुशृङ्खलया गद्यमय्या रचनयालङ्कृतानीत्येवं बहुविधानि । तेषु च त्रिचतुराणि लोकलोचनगोचराणि जातानि । विलोक्य च तेषामन्यतमत् "आशौचपंजिका" भिधमुत्कण्ठा मे द्विगुणीभूता तल्लिखितस्यान्यस्याभिनवस्य दर्शनाय, प्रार्थिता अन्यमुखेन श्रीराजपण्डितमहानुभावाः, अवाप्तं चेयं वृष्टिविद्या । प्राप्त्यनन्तरं विचारश्च कृतो यन्नाम मातुर्गीर्वाणगिरः कोशेऽमूल्यमिदं रत्नम्, तदिदं यदि प्रकाशतां गच्छेच्चत्स्यादस्याः कोऽपि महिमा । किंच यद्येवमियं वृष्टिविद्यास्यात्सन्तोषकरी जनानां तर्हि आशंसेऽन्यान्यपि यज्ञमधुसूदनादीनि पुस्तकानि संस्कृत साहित्यस्य मुखमुज्वलयिष्यन्ति ।

परं नासीदियं मे शक्तिर्यन्नाम स्वद्रव्यव्ययेन एतन्मु-द्रापयेयम् । अतएव पुस्तकमुपलभ्य चिन्तापरवशोऽभू-वम् कथमिदं सेत्स्यतीति ।

परमियं चिन्ता न मामदुःखयद् बहुकालं, यदैव गुणि-गण-गुणग्राहकेण भारतवर्षदिगन्तेषु दोधूयमानयशःपता-केन श्रेष्ठिमण्डलावतंसेन वदान्येन श्रीबलदेवदास-युगल-किशोरबिंडलामहाशयेन श्रुतमिदं ग्रन्थरत्नं तदैव प्रति-श्रुतं व्ययदानं दत्तं च ।

परं दुर्घटोऽयं गृहस्थारघट्टः दुष्करा चास्मात्मयावः लब्धिः, आधिव्याधिग्रसितेन मया यापितानि द्वित्राणि ह्यायनानि न च पारितं प्रकाशयितुमिति हीणोऽस्मि मनसि सम्प्रति च ग्रन्थकर्तृन् "विद्यावाचस्पति" महोदयान्, मुद्र-णव्ययदातॄन् रायबलदेवदासयुगलकिशोरश्रेष्ठिमहाशयान् धन्यवादेनाभ्यर्थ्यवक्तव्येनामुनेहैव विरमामि ।

विनीतः प्रकाशको

जोशीत्युपाह्वो द्वारिकाप्रसाद-शर्मा ।

विसाऊ (जयपुरे) ।

श्रीः ॥

विषय सूची ।

विषयाः—	पृ० सं०
पर्जन्यविद्याबोधकं निमित्तशास्त्रम्	१
वृष्टियोनिः	२
गर्भोपक्रमकालः	३
गर्भप्रसवकालः	४
गर्भविमानम्	५
गर्भोपघातकाः	६
गर्भदोहदाः	७
अथ द्वादश मासिकाध्यायः	८
कार्तिकः	९
मार्गशीर्षः	१०
पौषः	१२
माघः	१७
फाल्गुनः	२१
चैत्रः	२४
वैशाखः	३०
अक्षयतृतीया	३०
ज्येष्ठः	३६

मासशदिरोहिणी	३६
पवनधारणा	३७
पर्वणामिति	४०
मासांतरोहिणी	४४
आषाढः	४५
स्वातियोगः	४९
आषाढी परीक्षा	५१
इत्याषाढी परीक्षा	५५
रोहिणीयोगः	५८
श्रावणः	६२
भाद्रः	६५
आश्विनः	६८
सिंहावलोकः	६९
अथ रविनाक्षत्रिकम्	७२
अथ निमित्ताध्यायः	७६
गर्भरूपम्	७६
वातः	७६
उत्पादकः	७७
स्थापकः	७८
मेघः	८०
विद्युत्	८३
गर्जितम्	८५

वृष्टिः	८६
वैकारिकाधिकारः	८७
खपुरम्	८७
अभ्रतरुः	८८
परिघः	८८
निर्घातः	८८
कारका	८९
हिमम्	८९
रश्मिकराधिकारः	९०
सन्ध्या	९०
कुण्डलम्	९२
मत्यर्कपरिधिः	९२
परिवेषः	९२
इन्द्रायुधः	९५
दण्डः, त्रिशूलं, मत्स्यः, अमोघाः—	९६
उल्काधिकारः	९८
प्रकीर्णकाधिकारः	१००
राहवः	१००
कीलकराहवः	१००
स्वर्भानुराहवः	१०१
नागराहवः	१०४
सूर्यपाताः	१०५

चन्द्रपाताः	१०६
ताराग्रपाताः	१०७
ताराग्रहेन्दुपातः	१०८
केतवः	१०९
चलकेतुः	११२
जलकेतुः	११२
ऊर्मि–शीत–केतवः	११३
भटकेतुः–भवकेतुः	११३
औद्दालकः श्वेतकेतुः–ध्वजकेतुश्च	११३
पद्मकेतुः	११४
काश्यपः श्वेतकेतुः	११४
आवर्तकेतुः	११४
रश्मिकेतुः	११४
वसाकेतुः	११५
कुमुदकेतुः	११५
कपालकिरणः	११५
मणिकेतुः	११६
कलिकिरणः रौद्रकेतुः (किरणः)	११६
संवर्तकेतुः	११६
ध्रुवकेतुः	११७
अमृतजाः	११७
दुष्टकेतुफलम्	११७

ताराः	११८
दिग्दाहः	११८
वासवः	११९
भूकम्पः	११९
सर्वशेषः	१२१
अथ शकुनाध्यायः	१२२
दैवनिमित्ताधिकारः	१२२
दिव्यनिमित्ताधिकारः	१२२
दिविष्ठनिमित्ताधिकारः	१२६
भूमिष्ठनिमित्ताधिकारः	१२६
अनावृष्टिहेतवः	१३२
अथ ग्रहयोगाध्यायः	१३२
अष्ट विकाराः	१३५
शनिः	१३७
बृहस्पतिः	१३९
मंगलः	१४२
शुक्रः	१४४
बुधः	१४७
चन्द्रः	१४९
सूर्यः	१५०
ग्रहप्रतियोगः	१५३
ग्रहविग्रययोगः	१५५

सामान्यसादेश्ययोगः १५६
विशेषसादेश्ययोगः १६१
राशि-चक्रयोगः १६१
नक्षत्रचक्रयोगः १६२
समसप्तकयोगः १६२
चक्रवेधयोगः १६३
षट्चक्रयोगाः १६४
(१) समुद्रचक्रम् १६४
(२) राशितुंवरुचक्रम् १६४
(३) कालचक्रम् १६५
(४-५) संपातचक्र-संघट्टचक्रम् १६६
(६) सप्तनाडी-चक्रम् १६८
ग्रहभक्तिदेशाः १७०
उपसंहारः १७२

कादम्बिनी ।

पर्जन्यविद्याबोधकं निमित्तशास्त्रम् ।

विद्यावाचस्पतिश्रीमन्मधुसूदनसूरिणा ।
इयं कादम्बिनी विश्वहितार्थाय वितन्यते ॥ १ ॥
यस्याप्तस्य वचः सत्यं नियतिप्रसमीक्षितुः ।
तद्दिष्टेन पथा गच्छन्नभीष्टां सिद्धिमश्नुते ॥ २ ॥
शिवं बृहस्पतिं गर्गं वसिष्ठं काश्यपं भृगुम् ।
स्मरामि सहदेवज्ञं मिहिरं च पराशरम् ॥ ३ ॥
एभिरेव यथा वेदं तपसा भावितात्मभिः ।
यदुक्तं दृष्टिविज्ञानं तदिहानुब्रवीम्यहम् ॥ ४ ॥
तदुक्तौ लेखदोषेण कालदोषेण वा क्वचित ।
अन्यथात्वं च संजातं तद्विशोध्यं परीक्षया ॥ ५ ॥
* देवान् वसव्यान् शर्मण्यान् सपीतीन् मरुतोऽपि च ।
अभ्यर्थये वशे येषामेषा दृष्टिः प्रवर्तते ॥ ६ ॥

---

* देवा वसव्या अग्ने सोम सूर्य । देवा शर्म्मण्या मित्रा वरुणार्यमन् ।
देवाः सपीतयोऽपां नपादाशु हेमन् ॥ १ ॥ उद्नो दत्तो दधिं भिन्त दिवः
पर्जन्यादंतरिक्षात्पृथिव्यास्ततो नो वृष्ट्याऽवत ॥ २ ॥ दिवा चित्तमः कृण्वंति

अग्निं वायुं रविं सोमं मन्महे सम्भवत्यपाम् ।
उत्थानं प्रत्युपस्थानं धर्षणं वर्षणं यतः ॥ ७ ॥

वृष्टियोनिः ।

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥८॥ (मनुः)

अष्टमासधृतं गर्भं भास्करस्य गभस्तिभिः ।
रसं सर्वसमुद्राणां द्यौः प्रसूते रसायनम् ॥ ९ ॥

पर्जन्येनोदवाहेन । पृथिवीं यद् व्युन्दन्ति ॥३॥ आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः । वि पर्जन्याः सृजन्ति रोदसी अनु धन्वना यन्ति वृष्टयः ॥ ४ ॥ उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथाः पुरीषिणः । न वो दस्रा उप दस्यन्ति धेनवः शुभं याता मनुरथा अवृत्सत ॥ ५ ॥ सृजा वृष्टिं दिव आऽद्भिः समुद्रं पृण । अज्जा असि प्रथमजा बलमसि समुद्रियम् ॥ ६ ॥ उन्नम्भय पृथिवीं भिन्धीदं दिव्यं नभः । उद्नो दिव्यस्य नो देहीशानो विसृजा दृतिम् ॥७॥ (तै. सं. २।४।८ कारीरीष्टिः) वायुर्वै वृष्टया ईशे (देवा वसव्याः शर्म्मण्याः सपीतयः—एता वै देवता वृष्टया ईशते ॥) ("अहोरात्रे वै मित्रावरुणौ २ । ८ । ९ । अहोरात्राभ्यां वै पर्जन्यो वर्षति । नक्तं वाहि दिवा वा वर्षति—मित्रावरुणा वेवास्मा अहोरात्राभ्यां पर्जन्यं वर्षयतः॥ ॥ अग्निर्वा इतो वृष्टिमुदीरयति । मरुतः सृष्टां नयन्ति । यदा खलु वा असावादित्यो न्यङ्रश्मिभिः पर्यावर्तते अथ वर्षति । एता वै देवता वृष्टया ईशते ॥ (तै. सं. २ । ४ । १०) ॥

विवस्वानष्टभिर्मासैरादायापो रसात्मिकाः ।
वर्षत्यम्बु ततश्चान्नमन्नादमखिलं जगत् ॥ १० ॥
आदत्ते रश्मिभिर्यत्तु क्षितिसंस्थं रसं रविः ।
तमुत्सृजति भूतानां पुष्ट्यर्थं सस्यवृद्धये ॥ ११ ॥
सरित्समुद्रभूमिस्थास्तथापः प्राणिसम्भवाः ।
चतुःप्रकाराः भगवानादत्ते सवितांशुभिः ॥ १२ ॥
विवस्वानंशुभिस्तीक्ष्णैरादाय जगतीजलम् ।
सोमं पुष्णाति सोमस्तु वायुनाडीमयैर्दिवि ॥ १३ ॥
जलैर्विक्षिप्यतेऽभ्रेषु धूमाग्न्यनिलमूर्तिषु ।
अभ्रस्थाः प्रपतन्त्यापो वायुना समुदीरिताः ॥ १४ ॥

(ब्रह्मपुराणे विष्णुपुराणे च)

चन्द्राद् द्यौर्गर्भमाधत्ते वातेनाभ्रेण विद्युता ।
गर्जितेनाल्पवृष्ट्या च स गर्भः पंचलक्षणः ॥ १५ ॥

गर्भोपक्रमकालः ।

मार्गशीर्षात् ततश्चैत्राच्छ्रावणाच्च पुरा क्वचित् ।
शीतोष्णवर्षाकालानां चातुर्मास्यानि चक्षते ॥ १६ ॥
कार्तिकात् फाल्गुनात् तद्वदाषाढात्प्रतिभान्ति तु ।
शीतोष्णवर्षाकालानां चातुर्मास्यानि संमति ॥ १७ ॥
शीतकाले तु गर्भः स्यात् परिपाकस्तदुत्तरे ।
वर्षाकाले तु गर्भाणां प्रसूतिः क्रमतो भवेत् ॥ १८ ॥

ज्येष्ठासन्ना त्वमावास्या ज्येष्ठासन्ना च पूर्णिमा ।
आभ्यां विभागमिच्छन्ति गर्भप्रसवकालयोः ॥ १९ ॥
मूलोत्तरार्द्धगादर्कादर्कादार्द्रागतादपि ।
आभ्यां विभागमिच्छन्ति गर्भप्रसवकालयोः ॥ २० ॥
दक्षिणायनगात् पातादुत्तरायणगादपि ।
आभ्यां विभागमिच्छेति गर्भप्रसवकालयोः ॥ २१ ॥
स्वात्यर्कनो वा स्वात्यर्कचन्द्रसंयोगनोऽपि वा ।
स्वात्यर्कोर्ध्वाश्विनी चन्द्रान्मैत्रार्कोर्ध्वाप्यचंद्रतः ॥ २२ ॥
मूलार्कतश्च पंचैते गर्भाणां सन्त्युपक्रमाः ।
पूर्वे मन्दफला मूलार्कतस्तु सुदृढा मताः ॥ २३ ॥

गर्भप्रसवकालः ।

सूर्ये दक्षिणगोलस्थे गर्भितं चोत्तरायणे ।
नक्षत्रमष्टमादृक्षौ गत्वा चन्द्रः प्रवर्षति ॥ २४ ॥
न सूर्यो न च नक्षत्रं न चन्द्रस्तत्र कारणम् ।
वायुनैवोद्धृतं तोयं वायुरेव प्रवर्षति ॥ २५ ॥
सूर्ये दक्षिणगोलस्थे तस्मादब्धेरनुत्थितिः ।
तत्तोयं वायुना क्षिप्तं देशे देशे प्रवर्षति ॥ २६ ॥
वायुनाक्षिप्तमभ्रं तु दिवि यत्रावतिष्ठते ।
नक्षत्रं द्यूयुतलस्थास्य क्रियते तूपलक्षणम् ॥ २७ ॥
चन्द्रो यद्भं गतो गर्भं कुर्यादावर्त्तनेऽष्टमे ।

शतेऽङ्कां पंच नव ते तद्धं गत्वा स वर्षति ॥ २८ ॥
सितपक्षभवः कृष्णे कृष्णपक्षभवः सिते ।
अहर्जातो निशि निशाजातस्त्वहनि वर्षति ॥ २९ ॥
यस्मिन् पक्षे भवेद्गर्भस्ततः पक्षे चतुर्दशे ।
स गर्भदिवसात् सार्द्धषण्मासान्त्येऽहि वर्षति ॥ ३० ॥
कृष्णे वर्षति वैशाखे गर्भः कार्तिकशुक्लजः ।
चैत्रशुक्लोद्भवः कृष्णे त्वाश्विने मासि वर्षति ॥ ३१ ॥
पूर्वोत्थितः पश्चिमायां पूर्वस्यां पश्चिमोत्थितः ।
एवं विपर्ययोः मेघवातयोः शेषदिक्ष्वपि ॥ ३२ ॥

गर्भविमानम् ।

ब्राह्मी मोष्ठ्यदाषाढा गर्भाः स्युर्बहुतोयदाः ।
आर्द्रा श्लेषा मघास्वाती वारुण्यो बहुवासराः ॥ ३३ ॥
षट्सु मार्गादिमासेषु पञ्चानामेकभस्य च ।
अष्ट षट् षोडश जिन त्रिंशति त्रीण्यहानि हि ॥ ३४ ॥
काले वर्षति गर्भस्तु पञ्चात्मा शतयोजनम् ।
एकैकहान्या परितस्तदूर्ध्वार्द्धार्द्धकलनम् ॥ ३५ ॥
त्रीण्याढकानि वातेन विद्युता पञ्चनवाभ्रकैः ।
द्वादश स्तनितेनाथ पञ्चभिर्द्रोणपञ्चकम् ॥ ३६ ॥
शुभ्रग्रहयुते चन्द्रेऽर्के च गर्भाः सुवृष्टिदाः ।
क्रूरग्रहयुते वज्रकरकागतस्यवर्षदाः ॥ ३७ ॥

गर्भकालेऽतिवृष्टिस्तु गर्भनाशाय जायते ।
द्रोणाष्टांशाधिके वृष्टे गर्भस्रावोऽवधार्यते ॥ ३८ ॥
पञ्चरूपस्तु यो गर्भो गर्भकालेऽतिवर्षति ।
स नष्टः प्रसवे काले सीकरं क्वापि मुञ्चति ॥ ३९ ॥
गर्भः पुष्टोऽपि चेत् काले ग्रहदोषान्न वर्षति ।
तदात्मधारणाकाले करकां वर्षति ध्रुवम् ॥ ४० ॥
चिरकालधृतं क्षीरं यथा काठिन्यमृच्छति ।
कालातीतं तथा तोयं काठिन्यं दिवि गच्छति ॥ ४१ ॥

गर्भोपघातकाः ।

अथ गर्भोपघाताः स्युरुत्पातास्त्रिविधा अपि ।
भूकम्पोल्कारजोवृष्टिदिग्दाहाशनिकीलकम् ॥ ४२ ॥
खपुरं केतवो युद्धं निर्घातः परिघो धनुः ।
उपरागो गर्भमासप्रोक्तलिंगविपर्ययः ॥ ४३ ॥
एवं गर्भोपघात्युक्तो दुर्निमित्तसमुच्चयः ।
पोषयन्ति तु ये गर्भं वच्मि तान् गर्भदोहदान् ॥ ४४ ॥

गर्भदोहदाः ।

मृदुः प्रसादको वायुः सोमेशानेन्द्रदिग्भवः ।
परिवेषः सितः स्निग्धो विपुलः शशिसूर्ययोः ॥ ४५ ॥
विद्युदिन्द्रधनुर्मन्द्रगर्जितं प्रतिसूर्यकम् ।
स्निग्धो व्यापी पृथुर्मेघः सुप्रसन्नेन्दुभं नभः ॥ ४६ ॥

स्निग्धाः पुष्टा नोपसृष्टाः प्रदक्षिणचराग्रहाः ।
अनाकुलरवा हृष्टा निसर्गान्मृगपक्षिणः ॥ ४७ ॥
एते सर्वर्तुजातानां गर्भाणां पुष्टिकारकाः ।
अथ ये मासभेदेन विशेषास्तानपि ब्रुवे ॥ ४८ ॥
सन्ध्यारागः परीवेषो वार्द्दलं मार्गपौषयोः ।
नातिशीतं मार्गशीर्षे पौषेऽतिहिमसम्भवः ॥ ४९ ॥
माघे तु प्रबलो वायुस्तुषारकलुषाग्रहाः ।
शैत्याधिक्यं समेघस्य भानोरस्तोदयौ तथा ॥ ५० ॥
फाल्गुने पवनश्चण्डो रूक्षः स्निग्धाभ्रसंप्लवः ।
परिवेषा असम्पूर्णास्ताम्रो वा कपिलो रविः ॥ ५१ ॥
फाल्गुनेऽतिखरो वायुर्वाति पत्राणि पातयन् ।
दक्षिणोऽतिमृदुश्चैते मेघगर्भहिताय सः ॥ ५२ ॥
चैत्रे वायुः परीवेषो वृष्टिरभ्रं च शस्यते ।
वैशाखे पवनो विद्युद्वृष्टिरभ्रं च गर्जितम् ॥ ५३ ॥
गर्भोपघातका न स्युर्यदि स्युर्गर्भदोहदाः ।
तदा वर्षति पर्जन्यस्तत्रानन्दः प्रवर्तते ॥ ५४ ॥

इति गर्भाध्यायः प्रथमः ।

अथ द्वादशमासिकाध्यायः ।

वृद्धिः सर्वेषु मासेषु नक्षत्राणां समृद्धये ।
बहुक्षीरघृता गावः प्रजाश्च निरुपद्रवाः ॥ १ ॥
वर्षतौ त्रिषु मासेषु नक्षत्रं यदि वर्धते ।
तिथिर्वा वर्द्धते तत्र शुभः समय इष्यते ॥ २ ॥
कृष्णपक्षोदिता धर्माः सम्भवेयुर्न तत्र चेत् ।
पूर्वस्मिन्नुत्तरस्मिन् वा मासे कृष्णो भवन्ति ते ॥ ३ ॥
नियतास्तिथयः कार्श्चिद्ध्रुवकसंज्ञकाः ।
तत्राभ्रसम्भवः सर्गादनभ्रं प्रतिबन्धतः ॥ ४ ॥

कार्तिकः ।

कार्तिकस्य द्वितीया वा तृतीया वापि वर्षति ।
भाविवर्षे बहुजलं न चेत्तस्मिन्नवर्षणम् ॥ ५ ॥
द्वितीयायां तृतीयायां नवम्यां कार्तिके सिते ।
एकादश्यां त्रयोदश्यां वृष्टिर्मेघोऽतिवृष्टये ॥ ६ ॥
अब्दविशोपकावारैः पञ्चम्यां शुक्लकार्तिके ।
दिङ्नक्षाष्टादित्यधृतिनृपबाणमिताः क्रमात् ॥ ७ ॥
कार्तिकेऽभ्रध्रुवा शुक्ला द्वादश्येकादशी तिथिः ।
न गर्जति न तत्राभ्रं तदा वर्षो न शोभनः ॥ ८ ॥

एकादश्यां तु शुक्लायां द्वादश्यां वापि कार्तिके ।
अभ्रच्छन्नं यदि नभस्तदाषाढेऽतिवर्षति ॥ ९ ॥
द्वादश्यां कार्तिके रात्रौ विद्युद्वृष्टिश्च गर्जितम् ।
पञ्चवर्णास्तथा मेघाः पुष्पहानिस्तदोच्यते ॥ १० ॥
द्वादश्यां कार्तिके शुक्ले निरभ्रा रजनी यदि ।
पूर्णिमायामनभ्रं चेत् पुष्पघ्नन्धः स उच्यते ॥ ११ ॥
कार्तिक्यां कृत्तिकापूर्णा सुभिक्षायोपदिश्यते ।
कृत्तिका यदि वर्द्धेत तद्वर्षे बहुवर्षणम् ॥ १२ ॥
भरणी यदि पूर्णा स्यात् कार्तिकीपूर्णिमादिने ।
कुत्रचित् साधुवृष्टिः स्यादवृष्टिः कुत्रचिद्भवेत् ॥ १३ ॥
कार्तिक्यां पूर्णिमायान्तु यदि प्राप्नोति रोहिणी ।
असामंजस्यमाप्नोति प्रजा दुर्भिक्षपीडिता ॥ १४ ॥
कार्तिके मासि संक्रांतौ यदि वर्षति वासवः ।
मध्यमं जायते सस्यं पौषे मासि सुभिक्षता ॥ १५ ॥
कार्तिके यदि संक्रांतेः पर्य्यंते दिवसद्वये ।
महावृष्टिस्तदावृष्टिः शुभा श्राविनि वत्सरे ॥ १६ ॥
चतुर्थ्यां कार्तिके कृष्णे मेघाः स्युर्मृगशीर्षभे ।
यद्यत्र जलपातः स्यात्तदाषाढे सुवर्षति ॥ १७ ॥
अष्टम्यां कार्तिके कृष्णे दृश्यन्ते यदि विद्युतः ।
तदा तु श्रावणे मासि दृष्टिर्नूनं भविष्यति ॥ १८ ॥

मार्गशीर्षः ।

तुषारमलिनौ ताम्रौ चन्द्रार्कौ मार्गतस्त्रये ।
आषाढशुक्लसप्तम्यारब्धे वृष्टिर्दिनत्रये ॥ १९ ॥
मार्गशीर्षेप्रतिपदि न विद्युन्न च गर्जितम् ।
न वृष्टिश्चेत्तदा गर्भे कुशलं कुशला विदुः ॥ २० ॥
मार्गशुक्लद्वितीयातो दिवसा गर्भधारणाः ।
यद्देशे यत्रभे गर्भो वृष्टिस्तत्रैव तत्रभे ॥ २१ ॥
मार्गशुक्लद्वितीयायां दक्षिणः पवनो यदि ।
शनिवारोऽपि वा तत्र तदा क्लेशावहो नृणाम् ॥ २२ ॥
दशम्यां मार्गशुक्लायामहोरात्रप्रवाहिणा ।
वातेनोत्तरजातेन गर्भधारणयोग्यता ॥ २३ ॥
मार्गशुक्लदशम्यां तु यदि गर्जति वारिदः ।
ज्येष्ठकृष्णे श्रावणे वा तदा वृष्टिर्भविष्यति ॥ २४ ॥
मार्गस्य शुक्लद्वादश्यामम्बायां यदि वर्षति ।
तदा तत्र शुभा वृष्टिर्भवेद्धाविनि वत्सरे ॥ २५ ॥
मार्गकृष्णे चतुर्थ्याद्यास्तिथयो गर्भधारणाः ।
गर्भे तत्राहिते नूनं वर्षत्याषाढशुक्लके ॥ २६ ॥
मघायां मार्गकृष्णायां स विद्युन्मेघदर्शने ।
आषाढशुक्ले पर्जन्यश्चतुर्थ्यां वर्षति ध्रुवम् ॥ २७ ॥
मार्गे चतुर्थ्यां पंचम्यां षष्ठ्यां श्लेषामघाभगः ।

गर्भिताः पूर्वफल्गुन्यां त्रिरात्रं वृष्टिदाः शुचौ ॥ २८ ॥
उत्तराहस्तचित्रास्तु सप्तम्यादिषु गर्भिताः ।
मार्गेऽष्टम्यां शुचौ स्वात्यां त्रिरात्रं भूरिवृष्टिदाः ॥ २९ ॥
मार्गस्य कृष्णसप्तम्यां निशीथे गर्जितं शुभम् ।
मार्गकृष्णाष्टमी विद्युच्छ्रावणे मासि वर्षति ॥ ३० ॥
कृष्णाष्टम्यां मार्गमासे पूर्ववायुः सुभिक्षकृत् ।
अन्यतः पवनः कुर्य्याद् दुर्भिक्षं भाविवत्सरे ॥ ३१ ॥
मार्गकृष्णाष्टमी स्वातिचित्राभ्यां यदि युज्यते ।
तत्राभ्रे सति चापाढे तस्मिन्वृत्ते प्रवर्षति ॥ ३२ ॥
मार्गस्य कृष्णे सप्तम्यां नवम्यामीशदिग् यदि ।
मेघच्छन्ना तदा स्तोकं वृष्टिर्वातोऽथवा वहेत् ॥ ३३ ॥
दशम्यां मार्गकृष्णायां रात्रौ वर्षति वारिदः ।
तदा भाद्रपदे मासे वृष्टिर्भवति भूयसी ॥ ३४ ॥
एकादश्यां मार्गकृष्णे दक्षिणः पवनो यदि ।
विद्युच्च वार्द्दलं तत्र तदा दुर्भिक्षसंभवः ॥ ३५ ॥
दशम्यादित्रये मार्गे चित्रास्वातिविशाखभे ।
गर्भे सति शुचौ तद्भे त्रिरात्रं वृष्टिसंभवः ॥ ३६ ॥
द्वादश्यां च त्रयोदश्यां चतुर्दश्यामपातिथौ ।
वायुः सार्वदिशीकश्चेन्मार्गेऽषाढे स वर्षति ॥ ३७ ॥
मार्गशीर्षे चतुर्दश्यां दर्शे वा दृश्यते यदि ।

मेघैराच्छादितो भानुस्तदा सस्यमहार्घता ॥ ३८ ॥
अमामूलेऽल्पमूल्यत्वमाशाक्रे महार्घता ।
शन्यर्ककुजवारेण हन्त्यमा शूलभादिभिः ३९ ॥
मार्गशीर्षेऽपि संक्रान्तौ यदि वर्षति कर्हिचित् ।
मध्यमं जायते सस्यं पौषमासे सुभिक्षता ॥ ४० ॥

इति मार्गशीर्षः ।

पौषः ।

पौषे मूलाद् भरण्यन्तं चन्द्रचारेण गर्भति ।
आर्द्रादिभे विशाखान्ते सूर्यचारेण वर्षति ॥ ४१ ॥
पौषशुक्लादितो गर्भो यदा दशतिथिष्वपि ।
चातुर्मास्यं सुवृष्टिः स्याद् गर्भपातो मधौ न चेत् ॥४२॥
पूर्वाषाढागतो भानुर्जीमूतैर्यदि वेष्टितः ।
वर्षत्यार्द्रादिमूलान्तं प्रत्यक्षं प्रत्यहं तदा ॥ ४३ ॥
रेवत्यर्के तु वृष्टिश्चेद्दशर्क्षेषु न वर्षति ।
गर्भपातः स विज्ञेय इत्युक्तं नारदर्षिणा ॥ ४४ ॥
पौषशुक्ले द्वितीयायां विद्युद्घनघटा हिमम् ।
मेघच्छन्नं नभो वापि सम्पन्नः श्रावणस्तदा ॥ ४५ ॥
पौषशुक्लचतुर्थ्यां तु विद्युद्घनघटा शुभा ।
मेघच्छन्नं नभः श्रेष्ठं मत्स्येन्द्रधनुरादि च ॥ ४६ ॥

विद्युन्मेघो धनुर्मत्स्यो यद्येकोऽपि न जायते ।
अवर्षणं तदा ज्ञेयं प्रावृट्काले बुधा विदुः ॥ ४७ ॥
पौषशुक्ले शतभिषग् विद्युन्मेघाष्टमारुतैः ।
कृष्णापाऽचतुर्थीतः सप्ताहं द्रोणवृष्टिकृत् ॥ ४८ ॥
पौषशुक्ले पूर्वभाद्रां विशेषेण प्रतीक्षयेत् ।
परिवेषतडिद्वृष्टिगर्जितैर्वृष्टिरुत्तमा ॥ ४९ ॥
पौषस्य यदि पञ्चम्यां शुक्लायां हिमवर्षणम् ।
तदा स्यान्महती वृष्टिः प्रावृट्काले न संशयः ॥ ५० ॥
पौषे मेघः शुक्लषष्ठ्यां श्रावणे तर्हि वर्षणम् ।
यदि वृष्टिः पौषषष्ठ्यां भाद्रकृष्णे घनोदयः ॥ ५१ ॥
पौषशुक्ले तु सप्तम्यामष्टम्यां नवमीतिथौ ।
यदि गर्जति पर्जन्यः शुभो गर्भस्तदा ध्रुवः ॥ ५२ ॥
रेवत्यादित्रये पौषे सप्तम्यादिदिनत्रये ।
हिमपातैः शुभैर्वातैर्विद्युद्भिर्गर्भसम्भवः ॥ ५३ ॥
अष्टम्याञ्च नवम्यां च पौषशुक्लेऽश्विनी यदि ।
सप्तम्यां रेवतीविन्दुहिमवातैः शुभावहा ॥ ५४ ॥
एकादश्यां पौषशुक्ले विद्युद्घनघटाहिमम् ।
यदि स्याद्रोहिणीयोगः सजलस्तर्हि भाव्यते ॥ ५५ ॥
एकादश्यां नवम्यां च पौषशुक्ले बलाहकाः ।
पूर्वस्यां दिशि गर्जन्तो जायन्ते सस्यघातकाः ॥ ५६ ॥

पौषे त्रयोदशी शुक्ला शनिशुक्रकुजैर्युता ।
यदि वर्षति गोधूमाद्यन्नदुर्भिक्षसम्भवः ॥ ५७ ॥
प्रभूतं जलमाषाढेऽमावस्यायां प्रवर्षति ॥
सम्पत्तिः सर्वधान्यानां दुग्धवत्यश्च धेनवः ॥ ५८ ॥
पौषशुक्लचतुर्दश्यां विद्युद्दर्शनमुत्तमम् ।
तेनाषाढे कृष्णपक्षे भवेन्मेघमहोदयः ॥ ५९ ॥
पर्जन्यः सूर्यमाच्छाद्य गर्जैर्दैरावतान्वितः ।
विद्युन्नृत्यति चेत्तत्र तदा गर्भः शुभावहः ॥ ६० ॥
उत्तरस्यां यदा विद्युत् स्वर्णवर्णा प्रदीप्यते ।
सा विद्युज्जलदा ज्ञेया शीघ्रं मेघमहोदयः ॥ ६१ ॥
ऐन्द्री तु जलदा विद्युदाग्नेयी जलनाशिनी ।
यामी चाल्पफला विद्युन्नैर्ऋत्या निर्मला मता ॥ ६२ ॥
वारुणी सस्यसम्पत्त्यै वातकृद्वायवी तथा ।
कौवेरी क्षिप्रवर्षाय सदैशानी शुभावहा ॥ ६३ ॥
यत्र देशे सुभिक्षं स्याद्विद्युत्तत्रैव गच्छति ।
पौषशुक्लचतुर्दश्यां विद्युद्भेदा इमे स्मृताः ॥ ६४ ॥
पौषमासे पूर्णिमायां चन्द्रमा नैव दृश्यते ।
उत्तरस्यां दक्षिणस्यां यदा विद्युत प्रकाशते ॥ ६५ ॥
अभ्रच्छन्नं नभो वापि जलयोगोऽयमुत्तमः ।
अमायां श्रावणे मासि महावृष्टिर्भविष्यति ॥ ६६ ॥

पौषस्य पूर्णिमा विद्युत्सम्पन्ना वा हिमान्विता ।
अभ्रच्छन्नं नभो वा स्यादापाढे सा प्रवर्षति ॥ ६७ ॥
यद्येकलक्षणो वापि गर्भः पौषे न जायते ।
तदा वदन्ति दैवज्ञा वर्षाकाले ह्यवर्षणम् ॥ ६८ ॥
पौषस्य कृष्णपंचम्यां यदि मंगलवासरः ।
तस्यां मेघाः प्रवर्षंति तदा प्रचुरधान्यता ॥ ६९ ॥
पौषस्य कृष्णपंचम्यां नभो विमलतारकम् ।
स्वात्यां च हिमपातः स्याच्छ्रावणे तत्र वर्षति ॥ ७० ॥
पौषस्य कृष्णसप्तम्यां निशीथे यदि वर्षति ।
तदा प्राट्पि पर्जन्यः परं गर्जति वर्षति ॥ ७१ ॥
पौषस्य कृष्णसप्तम्यां स्वातियोगः सुभिक्षकृत् ।
अभ्रच्छन्ने जलं स्वल्पं जलपाते महाजलम् ॥ ७२ ॥
पौषस्य कृष्णसप्तम्यां स्वात्यां पतति चेद्धिमम् ।
यदि गर्जति पर्जन्यस्तदा सस्यैः प्रजासुखम् ॥ ७३ ॥
पौषस्य कृष्णसप्तम्यां स्वातीभं यदि दृश्यते ।
सुभिक्षं क्षेममारोग्यं तदा सर्वत्र जायते ॥ ७४ ॥
पौषस्य कृष्णसप्तम्यां दृष्ट्याद्यैरष्टमारुतैः ।
श्रावणे शुक्लसप्तम्यां स्वातिभं साधु वर्षति ॥ ७५ ॥
अष्टम्यां पौषकृष्णायां निशीथे यदि गर्जति ।
तदा वदन्ति दैवज्ञाश्चातुर्मास्यं सुवर्षति ॥ ७६ ॥

अष्टम्यां पौषकृष्णायां यदि वृष्टिर्न जायते ।
तदार्द्रर्क्षसमायोगे महावृष्टिर्भविष्यति ॥ ७७ ॥
पौषकृष्णदशमी यदि गर्जति ।
श्रावणशुक्ला दशमी वर्षति ॥ ७८ ॥
पौषकृष्णदशम्यां स्याद्वृशाखा निशि वा दिवा ।
शुभयोगोऽयमाख्यातः प्रावृषि प्रौढवृष्टिदः ॥ ७९ ॥
दशम्यां पौषकृष्णायां विद्युद्घनघटा यदि ।
तदा भाद्रपदे वृष्टिः पूर्णिमायां भविष्यति ॥ ८० ॥
पौषकृष्णे त्रयोदश्यां चतुर्दश्याममावसौ ।
यदि मेघघटाविद्युत् श्रावणे तर्हि वर्षति ॥ ८१ ॥
पौषेऽमायां यदा विद्युत पूर्वस्यां दिशि दृश्यते ।
हिमं वा श्रावणे तर्हि श्रावणी चातिवर्षति ॥ ८२ ॥
अमायां यदि पौषस्य शन्यादित्यारवासराः ।
तदा याति महार्घत्वं धान्यं द्वित्रिचतुर्गुणम् ॥ ८३ ॥
पौषेऽमायाश्चतुःपादैः प्रावृण्मासचतुष्टयम् ।
प्रकल्प्य वृष्टिमेघाद्यैस्तत्तन्मासस्थितिं वदेत् ॥ ८४ ॥
पौषे द्वादशमासाः स्युः सार्द्धद्व्यहविभागतः ।
पौषादिषु यथा येषु तथा तेषूपपद्यते ॥ ८५ ॥
पौषसंक्रमणे धान्यमूल्यं द्वित्रिचतुर्गुणम् ।
रविणा शनिनाऽऽरेण वारेण च भविष्यति ॥ ८६ ॥

सप्तता बुधशुक्राभ्यां मूल्यार्द्धं गुरुसोमतः ।
इत्थं वारानुसारेण फलं केचिद्वदन्ति हि ॥ ८७ ॥

इति पौषः ।

माघः ।

पौषारब्धोडुसंदोहे मूलाद्ये भरणीपरे ।
विद्युद्गर्जितवाताभ्रैरार्द्रार्कादिषु वृष्टयः ॥ ८८ ॥
माघस्य प्रतिपच्छुक्लः सवाताभ्रापि निर्जला ।
तैलद्रव्यं महार्घत्वं गन्धद्रव्यं च यास्यति ॥ ८९ ॥
माघशुक्लद्वितीयायां विद्युद्घनघटा यदि ।
तृतीया निर्जला गर्जेत् तदा धान्यमहार्घता ॥ ९० ॥
माघशुक्लचतुर्थ्यां तु वृष्टिश्चेदभ्रमेव वा ।
ताम्बूलनालिकेराद्या गमिष्यन्ति महार्घताम् ॥ ९१ ॥
माघस्य पंचमी शुक्ला मेघाढ्यापि न वर्षति ।
तदा भाद्रेऽल्पवृष्टिः स्यादवृष्टिस्तूत्तरेऽनिले ॥ ९२ ॥
यदि माघे शुक्लषष्ठी न गर्जति रसास्तदा ।
चंद्रवारे तु जायंते कार्पासाद्या महार्घताम् ॥ ९३ ॥
सप्तम्यां माघशुक्लायाः पादैर्मासचतुष्टयम् ।
प्रकल्पा वृष्टिमेघाद्यैस्तत्तन्मासस्थितिं वदेत् ॥ ९४ ॥
माघशुक्ले तु सप्तम्यां दुर्भिक्षं चन्द्रवासरे ।
तत्र चेन्निर्मलो भास्वाननावृष्टिस्तदा भवेत् ॥ ९५ ॥

माघशुक्ले तु सप्तम्यां वृष्ट्यभावेऽतिवर्षति ।
मूलं तपति च ज्यैष्ठे सुभिक्षं सर्वथा तदा ॥ ९६ ॥
माघशुक्ले तु सप्तम्यां हैमा विद्युल्लता यदि ।
वृष्टिर्घनघटा वापि चातुर्मास्यं सुवर्षति ॥ ९७ ॥
माघी च सप्तमी शुक्ला तृतीया माधवी यदि ।
एकस्मिन् वासरे स्यातां रोहिणीसंभवस्तदा ॥ ९८ ॥
सप्तम्यामथ चाष्टम्यां नवम्यां माघशुक्लके ।
रवेरस्तंगमे मेघा अथवा उत्तमाः समाः ॥ ९९ ॥
मेघाच्छन्नमहोरात्रं वायुः पूर्वस्तथोत्तरः ।
विद्युत्पश्चिमतस्तर्हि वर्षाभावेऽतिवृष्टयः ॥ १०० ॥
माघशुक्लाष्टमी साभ्रा निरभ्रा सप्तमी यदि ।
अनावृष्टिस्तदाषाढे श्रावणे वृष्टिमादिशेत् ॥ १०१ ॥
अष्टम्यां माघशुक्लायां मेघाच्छन्नो रविर्यदि ।
चन्द्रस्तु निर्मलस्तत्र सैषा दुर्भिक्षसूचना ॥ १०२ ॥
भरणीकृत्तिके माघे विशेषेण परीक्षयेत् ।
साभ्रयोः सस्यनिष्पत्तिर्निरभ्रयोः ॥ १०३ ॥
अष्टम्यां माघशुक्लायां कृत्तिकाभं यदा तदा ।
फाल्गुने रोहिका वा स्याच्छ्रावणे वा न वर्षति १०४
माघशुक्लेऽष्टमीतिथ्यामनभ्र उदितो रविः ।
आर्द्रार्के श्रावणान्ते च तदा वृष्टिर्न जायते ॥ १०५ ॥

माघशुक्लनवम्यान्तु परिवेषो निशाकरे ।
आषाढे सकले वृष्टिं जानीयादाश्विनेऽपि च ॥ १०६ ॥
माघशुक्लनवम्यां चेत्मातः स्यादष्टमीतिथिः ।
तदा चार्द्रागते सूर्ये श्रावणे च न वर्षति ॥ १०७ ॥
माघशुक्लनवम्यां चेन्निरभ्रं दृश्यते नभः ।
साभ्रो यामश्चतुर्थः स्याद्वृष्टिर्भाद्रपदे तदा ॥ १०८ ॥
नवमी निर्मला सर्वा साभ्रं किंचिन्न दृश्यते ।
तदा जलं न कुत्रापि प्राप्यते सागरं विना ॥ १०९ ॥
माघे दशम्यां वर्षा स्यादवर्षा नवमी यदि ।
वर्षागमोऽतिहर्षाय न वर्षाविसरस्तदा ॥ ११० ॥
माघशुक्लनवम्यां तु मेघाच्छन्नमहर्निशम् ।
तदा भाद्रपदे नूनमतिवृष्टिर्भविष्यति ॥ १११ ॥
माघमासे शुक्लपक्षे सप्तम्यादिदिनाष्टके ।
साभ्रे सत्यतिवृष्टिः स्यादनावृष्टिर्निरभ्रके ॥ ११२ ॥
माघ्यां चन्द्रपरीवेषो विद्युदुत्तरदक्षिणा ।
तथा वातो नभः साभ्रं कालो दुष्टस्तदा भवेत् ॥ ११३ ॥
माघमासे पूर्णिमायां यत्र यामेऽभ्रडम्बरः ।
वर्षाकाले तत्र मासे न वर्षति पयोधरः ॥ ११४ ॥

---

१ वृष्टिहानिं विजानीयादाषाढे चाश्विनेऽपि चेति पाठान्तरं ।
२ चतुर्दश्यामिति वर्षप्रबोधपाठः । पूर्णिमायामिति वृष्टिप्रबोधे ।

माघकृष्णद्वितीयायां विद्युद्गर्दलमुत्तमम् ।
वर्षति श्रावणे भाद्रे सुभिक्षं तत्र जायते ॥ ११५ ॥
षष्ठ्यां तु माघकृष्णायां सुभिक्षं चित्रगा भवेत् ।
साभ्रे नभसि वृष्टिः स्यादार्द्रे तत्र निरिचतम् ॥११६॥
माघस्य कृष्णसप्तम्यां विद्युद्घनघटादिमम् ।
स्वात्यां वायुश्चण्डवेगः प्रावृट्कालसुवृष्टिकृत् ॥११७॥
माघे नवम्यां कृष्णायां मूलं यद्यर्कवासरे ।
तदा भाद्रपदे शुक्लनवम्यां वर्षति ध्रुवम् ॥ ११८ ॥
माघे नवम्यां कृष्णायां मूले विद्युद्घटाधनुः ।
दशमी नवमी शुक्ला वृष्टिदाषाढभाद्रयोः ॥ ११९ ॥
नवम्यां च दशम्यां चैकादश्यां माघकृष्णके ।
विद्युत्घनघटावाता भवंति बहुवृष्टये ॥ १२० ॥
माघकृष्णे तु सप्तम्यां त्रयोदश्यां च पूर्वदिक् ।
मेघाच्छन्ना तदाषाढे सप्तरात्रं सुवर्षति ॥ १२१ ॥
माघकृष्णचतुर्दश्यां शिवरात्रेर्दिवानिशम् ।
हिमं यद्युत्तरो वायुः सुभिक्ष तर्हि निर्दिशेत् ॥ १२२ ॥
माघेऽमायामहोरात्रं हिमं वर्षति वायुवत् ।
साभ्रं नभस्तदा भाद्रे पूर्णिमायां प्रवर्षति ॥ १२३ ॥
माघमासे तु संक्रांतौ यदि वर्षति वासवः ।
बहुक्षीरयुता गावो बहुसस्या वसुंधरा ॥ १२४ ॥

इति माघः ।

फाल्गुनः ।

फाल्गुने नित्यमभ्रं स्यान्न तु पातयते जलम् ।
गर्भदोहदसम्पत्तिं विद्याद् वृष्टिः शुभा भवेत् ॥ १२५ ॥
फाल्गुने प्रतिपच्छुक्ला शुभा शतभिषा युता ।
यावती वारुणी भुक्तिर्वर्षासिद्धिश्च तावती ॥ १२६ ॥
फाल्गुने सप्तमी शुक्ला द्रोणमेकं प्रवर्षति ।
भाद्रे च पंचमी कृष्णा नवमी चाति वर्षति ॥ १२७ ॥
फाल्गुने सप्तमी शुक्लाऽष्टमी च नवमी क्रमात् ।
कृत्तिकादियुता गर्जेद् भाद्रेऽपा तर्हि वर्षति ॥ १२८ ॥
फाल्गुने यदि सप्तम्यामष्टम्यां रोहिणी तदा ।
शुभं नवम्यां सस्यानिस्तृणार्दिशमीतिथौ ॥ १२९ ॥
कुम्भमीनांतरेऽष्टम्यां नवम्यां दशमीतिथौ ।
रोहिणी चेत्तदा दृष्टिर्दीना मध्याधिका क्रमात् ॥१३०॥
दशम्येकादशी शुक्ला फाल्गुनेऽभ्रादिसंयुता ।
तदा चतुर्थ्यां पञ्चम्यामाश्विने साधु वर्षति ॥ १३१ ॥
फाल्गुने शुक्लसप्तम्यां पूर्णिमायां च निर्जला ।
निर्वाताः सतडिन्मेघाः सुभिक्षं सूचयंति हि ॥ १३२ ॥
फाल्गुने पूर्णिमायां तु यदीन्दुग्रहणं भवेत् ।
तदा मासेऽष्टमे सर्वधान्यं याति महार्घताम् ॥ १३३ ॥
होलिकादाहसमये विद्युद्घनघटा यदि ।

गोधूमादीनि सस्यानि पीडयन्ते रोलिकादिभिः १३४
होलीदाहे तु निर्वातं नेष्टं पूर्वादिवायुभिः ।
खण्डवृष्टिर्बहिर्भयं धान्यनाशः पलायनम् ॥ १३५ ॥
सुभिक्षं बहुवातं च बहुवृष्टिः प्रजासुखम् ।
संग्रामायोर्ध्वगो वायुः सर्वनाशाय सर्वदिक् ॥ १३६ ॥
पूर्वोऽतिवृष्टये वायुरुत्तरो धान्यसिद्धये ।
पश्चिमो मध्यवर्षाय दुर्भिक्षाय तु दक्षिणः ॥ १३७ ॥
फाल्गुने पूर्णिमायान्तु शुक्रशन्यारवासराः ।
पीडयन्ति प्रजां सर्वां विभिन्नानेकबाधया ॥ १३८ ॥
होलिकारजनीपूतौ चन्द्रास्ताभ्रकरोदयः ।
श्राव्वा समं वा पश्चाद्वा शुभः समफलोऽशुभः ॥ १३९ ॥
द्वितीया फाल्गुने कृष्णा विद्युद्भ्रादिवर्जिता ।
तदा च श्रावणे भाद्रे वृष्टिः स्यादन्यथान्यथा ॥ १४० ॥
निरभ्रा सर्वदिग्वाता द्वितीया कृष्णफाल्गुने ।
जनयेद् भूयसीं वृष्टिं मासे भाद्रपदे ध्रुवम् ॥ १४१ ॥
द्वितीया फाल्गुने कृष्णा मेघडम्बरसंकुला ।
जलं पतति चैत्रे चेत्तदा वृष्टिस्तु कार्तिके ॥ १४२ ॥
तृतीया फाल्गुने कृष्णा वृष्ट्यै पूर्वोत्तरानिलात् ।
चतुर्थ्यां फाल्गुने कृष्णे वर्षा दुर्भिक्षकारिणी ॥१४३॥

---

१ मेघमहोदयः ।

फाल्गुने कृष्णपंचम्यां हस्तनक्षत्रसंगमे ।
नाभ्रं न गर्जितं विद्युत्तदा संवत्सरः शुभः ॥ १४४ ॥
फाल्गुने कृष्णपञ्चम्यां स्वातीनक्षत्रसंभवे ।
नाभ्रं न गर्जितं विद्युत् तदा वर्षः शुभावहः ॥ १४५ ॥
फाल्गुने पंचमी कृष्णा नवमी च त्रयोदशी ।
एतासु विद्युता गर्भसंभवो दृष्टिहानिकृत् ॥ १४६ ॥
फाल्गुनस्य च मासस्य दर्शेऽष्टम्यां च वर्षति ।
सस्यानां संपदा तत्र सुभिक्षं प्रभविष्यति ॥ १४७ ॥
मूलमादौ यमं चांते फाल्गुनेप्यवलोकयेत् ।
सजला निर्जला ज्ञेया निर्जला सजला भवेत् ॥ १४८ ॥
अमायां फाल्गुने मासि यदि मंगलवासरः ।
प्रावृड् दुष्कालतां याति कर्तव्यो धान्यसंग्रहः ॥ १४९ ॥
फाल्गुने यदि संक्रांतौ देवो वर्षति कर्हिचित् ।
वैचित्र्यं जायते सस्ये वैशाखज्येष्ठयोः शुभम् ॥ १५० ॥
फाल्गुने च गुरोरस्तं वक्रं वा यदि जायते ।
शनिर्वा वक्रतां गच्छेत्तदा सस्यमहार्घता ॥ १५१ ॥
षाण्मासिकं तु दुर्भिक्षं फाल्गुनेऽस्तंगते भृगौ ।
पक्षोत्तरन्तु दुर्भिक्षं वक्रयोः शनिभौमयोः ॥ १५२ ॥

इति फाल्गुनः ।

चैत्रः ।

रेवत्या अर्कभोग्येषु त्रयोदशदिनेष्वपि ।
यत्राभ्रं पवनो विद्युत् तत्र गर्भः शुभावहः ॥ १५३ ॥
शेषसंक्रमकालात्तु दिनेषु नवसु क्रमात् ।
यत्राभ्रं पवनो विद्युत् तत्रार्द्रादिषु वर्षति ॥ १५४ ॥
संक्रांतिदिवसे यद्वा नवयामेषु यद्यथा ।
यस्यां च दिशि वातादिगर्भास्तद्धे च तत्तथा ॥ १५५ ॥
अश्विन्यादिमवांतेषु चैत्रे दशसु शेष्वपि ।
दृश्यन्तेऽभ्रादिचिह्नानि गर्भमिद्धिं वदेत्तदा ॥ १५६ ॥
चैत्र शुक्ले दशम्यन्ते निर्जले कार्तिकादिकाः ।
माघांताः सुस्थिरा गर्भाः गर्भपातोऽतिवर्षणात् ॥ १५७ ॥
चैत्रशुक्लादितोऽष्टाहं यदि वर्षति कर्हिचित् ।
नवम्यां यत्र विद्युत्स्यात् तद्देशे नास्ति वर्षणम् ॥ १५८ ॥
आषाढादशपक्षाणां साक्षिणस्तिथयो मधौ ।
शुक्लादितो दशम्यन्ता गर्भपातपरीक्षणे ॥ १५९ ॥
साक्षिणां चतुरो दण्डानेकं कल्पयेदिनम् ।
यत्र यावद्गर्भपातस्तत्र तावद्वर्षणम् ॥ १६० ॥
चैत्रशुक्ले यदार्द्रादि स्वात्यन्तेषु च साभ्रता ।
जलप्रवाहंवृष्टिर्नो तदा संवत्सरः शुभः ॥ १६१ ॥
तिथिवृद्धौ तृणाधिक्यं धान्याधिक्यं भवृद्धितः ।

रोगाधिक्यं योगवृद्धौ चैत्रस्य प्रथमेऽहनि ॥ १६२ ॥
रविवारादनावृष्टिः सुवृष्टिः कुजगारतः ।
बुधवारात्तु दुर्भिक्षं चैत्रस्य प्रथमेऽहनि ॥ १६३ ॥
जलसस्यादिना रोगाधिक्यं रविवारतः ।
जलसस्यतृणाधिक्यं चन्द्रादीनिस्तु मंगलात् ॥ १६४ ॥
बुधवारेण दुर्भिक्षं सुभिक्षं गुरुशुक्रतः ।
जलादिनाशः शनिना चैत्रस्य प्रथमेऽहनि ॥ १६५ ॥
प्रथमे दिवसे चैत्रे यदि गर्जति वर्षति ।
तदा तु श्रावणे मासि तत्र वर्षति वासवः ॥ १६६ ॥
द्वितीयायां पूर्वनायुगनभ्रं भाद्रवृष्टये ।
तृतीयायां सुभिक्षाय विद्युल्लेखा च गर्जितम् ॥१६७॥
चैत्रशुक्लचतुर्थ्यायां दक्षिणः पवनो यदि ।
अभ्राणि पूर्वतो यांति वृष्टिः स्यादाश्विने तदा ॥१६८॥
चतुर्थ्यां चैत्रशुक्लायामुत्तरः पवनो यदि ।
यद्यनभ्रं तदा तत्र कार्तिके वृष्टिरादिशेत् ॥ १६९ ॥
चतुर्थ्यां चैत्रशुक्लायां पतन्ति जलबिन्दवः ।
तदा घोरमनावृष्ट्या दुर्भिक्षं तत्र जायते ॥ १७० ॥
चतुर्थे दिवसे प्राप्ते मेघजालं करोति चेत् ।
दुर्भिक्षं जायते घोरमनावृष्ट्या न संशयः ॥ १७१ ॥
प्रतिपच्च द्वितीया च तृतीया च चतुर्थिका ।
यद्यासु गर्भसम्पत्तिश्चातुर्मास्यं तदा घनः ॥ १७२ ॥

चैत्रस्य शुक्लपञ्चम्यां रोहिणीभं शुभावहम् ।
यदि तत्र नभः साभ्रं गर्भः संपद्यते तदा ॥ १७३ ॥
चैत्रस्य शुक्लपञ्चम्यामार्द्रांभं यदि लभ्यते ।
दुर्भिक्षं यावदाषाढं श्रावणे जलदोदयः ॥ १७४ ॥
उदयास्तमनं यावदभ्रच्छन्नं नभो यदि ।
चैत्रस्य शुक्लपञ्चम्यां महार्घं श्रावणे तदा ॥ १७५ ॥
चत्रस्य शुक्लपञ्चम्यां वायुर्दक्षिणपूर्वयोः ।
वृष्टिश्च सह जायेत तदा धान्यमहार्घता ॥ १७६ ॥
तृतीयायां च पञ्चम्यां वायुः पूर्वोत्तरो यदि ।
तदा सुवृष्टिः संपत्तिः सस्यानां च सुमिक्षता ॥ १७७ ॥
दिनद्वयं प्रवहतो वायू दक्षिणपश्चिमौ ।
तदा नोत्पद्यते धान्यं दुर्भिक्षं तत्र जायते ॥ १७८ ॥
शुक्लायां चैत्रसप्तम्यामार्द्रांभं यदि वर्षति ।
तदा वदन्ति दैवज्ञाः श्रावणे नैव वर्षति ॥ १७९ ॥
शुक्लायां चैत्रसप्तम्यामभ्रच्छन्नं नभो यदि ।
श्रावणे मासि गोधूमात् त्रिगुणं लाभमादिशेत् ॥१८०॥
शुक्ला तु पञ्चमी चैत्रे सप्तमी च त्रयोदशी ।
वर्षर्तुं नाशयेद् वृष्ट्या विद्युता गर्जितादपि ॥ १८१ ॥
रोहिणी स्यात् सुभिक्षाय ह्यामारोगाय दक्षिणा ।
अग्रगा भयदा चन्द्राद् दुर्भिक्षाय तु पृष्ठगा ॥ १८२ ॥

चैत्रस्य पञ्चमी शुक्ला रोहिण्या यदि संयुता ।
साभ्रं नभस्तदा तत्र गर्भस्य परिपूर्णता ॥ १८३ ॥
चैत्रस्य पञ्चमी शुक्ला युज्यते यदि चार्द्रया ।
दुर्भिक्षं यावदाषाढं श्रावणे जलदोदयः ॥ १८४ ॥
चैत्रस्य शुक्लपञ्चम्यामभ्रच्छन्नं नभो यदि ।
उदयास्तमनं यावद् दुर्भिक्षं श्रावणे तदा ॥ १८५ ॥
चैत्रस्य शुक्लपञ्चम्यां वायुर्दक्षिणपूर्वयोः ।
वृष्टिश्च सह जायेत तदा दुर्भिक्षमादिशेत् ॥ १९६ ॥
पञ्चमी सप्तमी चैत्रे नवमी पूर्णिमा क्रमात् ।
रोहिण्यार्द्रापुष्यचित्रा युक्तानाभ्राः सुवृष्टिदाः ॥१८७॥
एताश्चतस्र आषाढं श्रावणं भाद्रमाश्विनम् ।
क्रमेण गलिता हन्ति गर्भस्रावादवृष्टिदाः ॥ १८८ ॥
पंचमी श्रावणं हंति भाद्रं हंति च सप्तमी ।
आश्विनं नवमी हंति पूर्णिमा हन्ति कार्तिकम् ॥१८९॥
एताश्चतस्त्रो गर्भस्य क्षयपुष्टिकरा मधौ ।
न भवेदासु वृष्टिश्चेत्तदा वृष्टिर्भवेद् ध्रुवम् ॥ १९० ॥
पञ्चमी सप्तमी चैत्रे नवम्येकादशी सिता ।
त्रयोदशी पूर्णिमा च दिनेष्वेतेषु वर्षणात् ॥ १९१ ॥
करकापतनाद्विद्युद्दर्शनाद् गर्जनादपि ।
वर्षाकाले जलधरश्छद्रादेव प्रवर्षति ॥ १९२ ॥

चैत्रस्य दशमी शुक्ला मघया युज्यते यदि ।
सुवृष्टिश्च सुभिंक्ष च शनिवारे विशेषतः ॥ १९३ ॥
चैत्रशुक्लत्रयोदश्यां धूमिका स्यादवृष्टये ।
चित्रा वर्षति चेच्चैत्र्यां तदानावृष्टिराश्विने ॥ १९४ ॥
पौर्णमास्यां यदा स्वाती विद्युन्मेघसमन्विता ।
निर्दोपमपि पूर्वर्क्षं गर्भं गलितमादिशेत् ॥ १९४ ॥
चैत्री न शुभदा वारे गुरुसोमबुधेतरे ।
चैत्र्यां प्रविष्टा प्रतिपत् कृष्णा प्रावृष्य वृष्टये ॥ १९६ ॥
चैत्रस्य कृष्णा प्रतिपत् तिथिर्हीना समाधिका ।
तद्वच्चेद् क्रमादल्पजलं स्वास्थ्यं बहूदकम् ॥ १९७ ॥
कृष्णायां पक्षतौ चैत्रे मेघैराच्छादितो यदि ।
दृश्यते न रविर्यौम्नि तदा वर्षः शुभावहः ॥ १९८ ॥
चैत्रकृष्णद्वितीयायां सर्वदिग्भ्रामकोऽनिलः ।
निरभ्रं च तदा भाद्रे वृष्टिर्भवति भूयसी ॥ १९९ ॥
चैत्रकृष्णतृतीयायां वायुः पूर्वस्तथोत्तरः ।
वर्षासु प्रचुरं वर्षं सुभिंक्षं च तदादिशेत् ॥ २०० ॥
चैत्रकृष्णाचतुर्थ्यां तु वर्षा दुर्भिक्षकारिणी ।
पञ्चम्यां चैत्रकृष्णायां हस्तेऽनभ्रं शुभं भवेत् ॥ २०१ ॥
द्वितीयायां तृतीयायां चतुर्थ्यां पञ्चमीतिथौ ।
चैत्रकृष्णे पूर्ववातो वृष्टियुक्तोऽप्यवृष्टिकृत् ॥ २०२ ॥

चैत्रे पञ्चदशेर्दारा दुर्भिक्षस्यातिलक्षणम् ।
चैत्रे पञ्चशनेर्दारा मरकं सूचयंति हि ॥ २०३ ॥
मूलमादौ यमं चाते चैत्रकृष्णेऽवलोकयेत् ।
सजलं निर्जलं ज्ञेयं निर्जलं सजलं भवेत् ॥ २०४ ॥
मूलमारभ्य याम्यांतं चैत्रकृष्णेऽवलोकयेत् ।
यावद्दक्षिणतो वायुस्तावद् वृष्टिबलं वदेत् ॥ २०५ ॥
यावत्तु दक्षिणो वायुस्तावद् वृष्टिप्रदायकः ।
साभ्रे भे हन्यते वृष्टिर्निरभ्रे वृष्टिरुत्तमा ॥ २०६ ॥
चैत्रे तु पञ्चमीं कृष्णामारभ्य नव वासरान् ।
निरभ्रं चेत्तदार्द्रादि नवकं विपुलं जलम् ॥ २०७ ॥
अष्टम्यां त्रयोदश्यां चैत्रकृष्णेऽवलोकयेत् ।
उत्तरा यावती दृष्टा तावती वृष्टिरुच्यताम् ॥ २०८ ॥
चैत्रस्य पञ्चमी कृष्णा नवमी च त्रयोदशी ।
एतासु यदि वृष्टिः स्यादनावृष्टिस्तदा भवेत् ॥ २०९ ॥
अष्टम्यां च चतुर्दश्यां चैत्रकृष्णेऽवलोकयेत् ।
तत्राभ्रमुत्तरो वायुः शुभाय खलु जायते ॥ २१० ॥
यस्यां दिशि भवेदभ्रं तत्र वृष्टिः प्रजायते ।
तत्र चेद् गर्जितं विद्यत्तदानावृष्टिरुच्यते ॥ २११ ॥
एकादश्यां दशम्यां च चैत्रकृष्णे निरभ्रता ।
सुवृष्टयेऽथ दुर्भिक्षं कुरुते प्रबलो घनः ॥ २१२ ॥

यदि चैत्रे त्रयोदश्यां भवेन्मीनार्कसंक्रमः ।
शनिवारोऽपि तत्र स्यात्तद्वर्षेऽत्यल्पसस्यकम् ॥ २१३ ॥
यावद् घटचादिमाना स्यादमा फाल्गुनचैत्रयोः ।
तावदेवार्घमानं स्यादन्तानां कार्तिके ध्रुवम् ॥ २१४ ॥
चैत्रेऽमायां सुभिक्षत्वं समं रोगोऽल्पवर्षणम् ।
दुःखं क्रमेण जायन्ते रेवत्यादिषु पञ्चसु ॥ २१५ ॥

इति चैत्रः ।

वैशाखः ।

वैशाखे गर्जितं भूरि सलिलं पवनो घनः ।
शुभाय पंचवर्णं खं विद्युत्पातेखटत्कृतिः ॥ २१६ ॥
वैशाखशुक्ला प्रतिपद्दशमी च निरीक्ष्यताम् ।
सजला निर्जला ज्ञेया निर्जला सजला भवेत् ॥२१७॥
वैशाखशुक्ला प्रतिपत् पंचमी चाभ्रवर्जिता ।
केचिद्वदन्ति दैवज्ञाः प्रावृट्कालो न वर्षति ॥ २१८ ॥

अक्षयतृतीया ।

राधे शुक्ले द्वितीयायां तृतीयासम्भवे निशि ।
याचेतान्यगृहं गत्वा कर्तुं वर्षपरीक्षणम् ॥ २१९ ॥
तस्मै प्रसन्नो दद्याच्चेच्छुभं प्रीतं च भाषते ।
तदा वर्षं शुभं विद्यादन्यथा त्वन्यथा भवेत् ॥ २२० ॥

शृणुयादपि दम्पत्योरेकांतालापनं निशि ।
शुभाशुभं यथा ब्रूतस्तथा वर्षे शुभाशुभम् ॥ २२१ ॥

इति शकुनपरीक्षा ।

आमं कुलालकुलतो नीत्वाऽमत्रीचतुष्टयम् ।
तंदार्षाढादिभावेन भाविंत तोयपूरितम् ॥ २२२ ॥
निहतं पश्य पूर्वादि दिक्षु ध्वस्तं स्रुतं जलात् ।
स्राक्स्रुते बहुवृष्टिः स्यान्न वृष्टिः स्यात् स्रुते चिरात् ॥

इत्यमत्रपरीक्षा ।

अगेऽक्षयतृतीयायां बहिर्ग्रामं तरोरधः ।
दध्योदनघृतैः पञ्च पिण्डान मध्यदिगाहितान् ॥२२४॥
काकपिण्डविधानेन पूजामन्त्रजपादियम् ।
कृत्वैकांते स्थितः पश्येत् काकः पिण्डं यमत्ति हि २२५
यस्यां दिशि यथा वात्ति तथा तस्यां सुभिक्षता ।
मध्यपिण्डाशने सर्वदेशेष्वेव शुभं भवेत ॥ २२६ ॥
यतः काकः समागत्य भुक्त्वा गच्छति तद्दिशि ।
दुर्भिक्षमथ नो मत्तेत्तदा मारीभयं भवेत् ॥ २२७ ॥

इति काकपरीक्षा

अक्षयायां तृतीयायां पूरयेद् भाण्डमम्बुना ।
रविं विलोकयेन्मध्ये तत्स्वरूपं विमर्शयेत् ॥ २२८ ॥
रक्ते सूर्ये विग्रहः स्यान्नीले पीते महारुजः ।

श्वेते सुभिक्षं विज्ञेयं धूसरे दुःखमूपकाः ॥ २२९ ॥

इति विम्बपरीक्षा

अक्षयायां तृतीयायां सन्ध्यायां सप्तधान्यकम् ।
पुञ्जीकृत्य स्थापनीयं वृक्षाधस्तात् पृथक् पृथक् २३०
यद्विस्तृतं स्यात्तद्धान्यं तद्वर्षे बहु जायते ।
पुंजरूपं तु यत्तिष्ठेत् तन्न निष्पद्यते बहु ॥ २३१ ॥

इति धान्यपरीक्षा

पूर्णकुम्भादशस्थाप्यं मृत्पिंडानां चतुष्टयम् ।
आषाढादिचतुर्मासनामचिह्नपृथक्कृतम् ॥ २३२ ॥
कुम्भे स्वबिन्दुजलेनार्द्रा यावन्तः पिंडकाभूदः ।
वृष्टिस्तावत्सु मासेषु शुष्के पिण्डे न वर्षणम् ॥ २३३ ॥

इति लोष्टपरीक्षा ।

राधेऽक्षयतृतीयायां मध्यवर्षाय कृत्तिका ।
रोहिणी तु सुभिक्षाय दुर्भिक्षं मृगशीर्षतः ॥ २३४ ॥
यद्यस्तमेति चन्द्रस्तु रोहिणीं पृष्ठतस्त्यजन् ।
तदा भवति दुर्भिक्षं वैपरीत्ये शुभं भवेत् ॥ २३५ ॥
सूर्यास्तकाले चन्द्रस्तु वामभागे न शोभनः ।
उत्तास्थः सुभिक्षाय दुर्भिक्षाय समे पथि ॥ २३६ ॥
यद्यक्षयतृतीयायां रोहिणीगुरुवासरे ।
सर्वं सस्यं भवेत्पूर्णमन्यथा त्वन्यथा भवेत् ॥ २३७ ॥

इति नक्षत्रपरीक्षा ।

राधे शुक्ले तृतीयायां द्वितीयायां च पत्तनौ ।
अभ्राणि च शुभान्याहुरंगरोगाय वर्षणम् ॥ २३८ ॥

इति गर्भपरीक्षा ।

राधे शुक्लतृतीयायां यामे पश्यत पश्चिमे ।
मासाश्चत्वार आषाढाद् घटीद्वयविभागतः ॥ २३९ ॥
क्रमशस्तेषु भागेषु पवनः पूर्व उत्तरः ।
पश्चिमो दक्षिणस्तत्तन्मासे वर्षाम्बोधकः ॥ २४० ॥
यद्यक्षयतृतीयायां पूर्वो वायुर्निरन्तरः ।
तदातिसस्यसम्पत्तिः श्लेषा चैवातिगर्जति ॥ २४१ ॥
दक्षिणस्तृणहानाय पश्चिमः सुखवृद्धये ।
देवो गर्जत्युदग्वायौ दिनानामेकविंशतिम् ॥ २४२ ॥
वायुः सार्वदिशीकस्तु यद्यक्षयतिथौ भवेत् ।
तदा दुर्भिक्षमादेश्यं प्रजा राजा च पीडयते ॥ २४३ ॥
राधे शुक्लतृतीयायां वृष्ट्यै पूर्वोत्तरानिलः ।
दक्षिणो नैर्ऋतो वायुर्वृष्टेः स्यात् प्रतिघातकः ॥२४४॥
पश्चिमात् पवनाद् भूरि वृष्टिरित्यपि चक्षते ।
दिवि मेघगतिं दृष्ट्वा गतिं वायोः परीक्षयेत् ॥ २४५ ॥
राधेऽक्षयतृतीयातः पञ्च सप्त दिनांतरे ।
प्रचण्डवायुना सस्यमल्पं बहु ततः परे ॥ २४६ ॥

इति वायुपरीक्षा ।

इत्यक्षयतृतीया ।

अथैकमासतः पश्चाच्चण्डमारुतसंचरे ।
गर्जेद्भद्रे महेन्द्रोऽयमम्बरे मेघडम्बरे ॥ २४७ ॥

इत्युग्रवातपरीक्षा ॥

चतुर्थ्यां शुक्लवैशाखे सन्ध्यायामुत्तरोऽनिलः ।
सुभिक्षायाथ पंचम्यां पूर्ववातो महार्घकृत् ॥ २४८ ॥

वैशाखे पंचमी शुक्ला यदि गर्जति वर्षति ।
पूर्ववातो दिनं यावद् भाद्रे धान्यमहार्घता ॥ २४९ ॥

यदि शुक्ले तु वैशाखे सप्तम्यादिदिनत्रये ।
भवेद् घनघटाटोपः शीघ्रं वृष्टिस्तदा भवेत् ॥ २५० ॥

एकादश्यां त्रयोदश्यां द्वादश्यां शुक्लमाधवे ।
अभ्रेण वृष्ट्या दुर्भिक्षं निरभ्रं शुभदं भवेत् ॥ २५१ ॥

केचिदाहुस्तु पञ्चम्यां सप्तम्यां नवमीतिथौ ।
एकादश्यां त्रयोदश्यां वैशाखे वृष्टिमुत्तमम् ॥ २५२ ॥

वैशाखदशमीरात्रौ यदि चन्द्रो न दृश्यते ।
तदा माद्रपि वृष्टिः स्याद् साध्वी स्वस्था मही भवेत् ॥

वैशाखशुक्लदशमीदिनेऽभ्रच्छन्नता शुभा ।
एकादशीत्रये शुक्ले दुर्भिक्षं वृष्टिवार्दलात् ॥ २५४ ॥

चतुर्दश्यष्टमीचैत्रराधयोः कृष्णशुक्लयोः ।
तत्र चेद्दक्षिणो वातस्तदा मेघमहोदयः ॥ २५५ ॥

चतुर्दश्यष्टमी चैत्रराधयोः कृष्णशुक्लयोः ।

विद्युद्गर्जितवर्षाभिर्वर्षानन्दः प्रवर्तते ॥ २५६ ॥
वैशाखे पूर्णिमायां तु यदीन्दुग्रहणं भवेत् ।
पीड्यन्ते धान्यदौर्लभ्यात् पंचालाः शूरसेनकाः २५७
वैशाखपूर्णिमावृष्टिर्भद्रे धान्यमहार्घकृत् ।
वैशाखीतः समारभ्य कुर्य्याद्वायुपरीक्षणम् ॥ २५८ ॥
वैशाखीतः समारभ्य यावत्कृष्णामिहाष्टमीम् ।
गर्भैरार्द्रादिसूर्यर्क्षनवके वृष्टिरुच्यते ॥ २५९ ॥
तत्रापि ननु वैशाख्या अहोरात्रघटीगणैः ।
चतुर्दशविभक्तैस्ते कल्प्या आर्द्राभवासराः ॥ २६० ॥
प्रातश्चतुर्घटीमध्ये पूर्ववायुर्वहेद्यदि ।
आर्द्रार्कप्रथमे तर्हि दिने मेघमहोदयः ॥ २६१ ॥
चतुर्घटी क्रमेणैवं वायुनार्द्रार्कनिश्चयः ।
कृष्णप्रतिपदात्त्वेवं पुनर्वस्वर्कनिश्चयः ॥ २६२ ॥
कृष्णे दशम्यां वैशाखे सुभिक्षायैव रेवती ।
एकादश्यां खण्डवृष्ट्यै दुर्भिक्षं द्वादशीतिथौ ॥ २६३ ॥
वैशाखकृष्णैकादश्यां द्वादश्यां वा यदाम्बुदाः
विद्युच्च गर्जितं वृष्टिस्तदा वर्षः शुभावहः ॥ २६४ ॥
भवेदमायां वैशाखे दिवा वा यदि वा निशि ।
अनावृष्ट्यै महामेघो ज्यैष्ठे केचिदिदं जगुः ॥ २६५ ॥

इति वैशाखः ।

ज्यैष्ठः ।

गर्जितं ज्येष्ठशुक्ले तु गर्भनाशाय जायते ।
स्फूर्जेथुश्चेत्तदा दृष्टिर्नास्ति श्रावणभाद्रयोः ॥ २६६ ॥
प्रथमायां तिथौ ज्यैष्ठे रविभौमबुधैः क्रमात् ।
वायुव्यग्निश्च दुर्भिक्षं गुरुशुक्रेन्दुभिः शुभम् ॥ २६७ ॥
शनिवारे तु संप्राप्ते जलशोषः प्रजाक्षयः ।
वाराद्देशो विशेषेण ज्यैष्ठस्य प्रतिपत्तिथौ ॥ २६८ ॥
ज्यैष्ठे सूर्याद् द्वितीयेन्दुः समे वामे च दक्षिणे ।
सम सुभिक्ष दुर्भिक्षं ब्राह्मोयोगे महार्घता ॥ २६९ ॥
ज्यैष्टशुक्लद्वितीयायां यदि गर्जति वारिदः ।
सर्वः पूर्वतनो गर्भो नष्ट इत्याह दैववित् ॥ २७० ॥

मासादिरोहिणी ।

ज्यैष्टशुक्ले तु रोहिण्या योगं सम्यक् परीक्षयेत् ।
अनभ्रे स्यादनावृष्टिः साभ्रे वृष्टिः सुभिक्षता ॥ २७१ ॥
अभ्रैस्तु मध्यमा वृष्टिर्वृष्टौ वृष्टिरनुत्तमा ।
रोहिणीजलपातेन भयमीतेर्विनश्यति ॥ २७२ ॥
प्रथमेंऽशे सुभिक्षं स्यात् द्वितीये सर्पकीटकाः ।
तृतीये मध्यमा वृष्टिश्चतुर्थे मन्दवर्षणम् ॥ २७३ ॥
पञ्चमे सर्वसस्यासिः षष्ठे पाषोऽधिको भवेत् ।
सप्तमे तुषधान्यं स्यादष्टमे क्षितवृष्टिदम् ॥ २७४ ॥

रोहिण्यर्के तु रोहिण्या चन्द्रयोगोलवकोऽपि चेत् ।
तदा दुर्भिक्षमादेश्यं तद्देशे दुर्दशाकरम् ॥ २७५ ॥
रोहिण्यर्के द्वितीयायां रोहिण्या युज्यते शशी ।
कदाचिद्दैवयोगेन तदा तत्र महाभयम् ॥ २७६ ॥
रोहिण्यर्के तु रोहिण्या घटिकामात्रमप्यसौ ।
चन्द्रो न युज्यते यत्र तत्र देशे शुभं भवेत् ॥ २७७ ॥

इति मासादिरोहिणी ।

ज्यैष्ठशुक्लतृतीयायामार्द्रभं यदि वर्षति ।
तदा दुर्भिक्षमादेश्यं वर्षर्तुस्तत्र नश्यति ॥ २७८ ॥
शुक्लायां ज्यैष्ठपञ्चम्यां पूर्वः पश्चिम उत्तरः ।
वायुः सुभिक्षकृत् किन्तु शलभादिकृदुत्तरः ॥ २७९ ॥
अनावृष्टिस्तु वायव्याग्नीशानतोऽपि च ।
सर्वदिक्प्रभवे वायौ सर्वनाशः प्रजायते ॥ २८० ॥
शुक्लायां ज्यैष्ठपञ्चम्यां दक्षिणः पवनो यदि ।
अभ्रच्छन्नं नभो गर्जेद्राशिरनेऽन्नमहार्घता ॥ २८१ ॥
ज्यैष्ठस्य शुक्लसप्तम्यां दक्षिणः पवनो यदि ।
अभ्रच्छन्नं नभो गर्जेत्कार्तिकेऽन्नमहार्घता ॥ २८२ ॥

पवनधारणा ।

चतस्रस्तिथयो वायुधारणा अष्टमीमुखाः ।
ज्यैष्ठशुक्ले मृदुस्निग्धस्थगिताभ्रोऽनिलः शुभः ॥२८३॥

क्षविद्युतः सपृषतः सपांशूत्करमारुताः ।
सार्कचन्द्रपरिच्छन्ना धारणाः शुभधारणाः ॥ २८४ ॥
रविचन्द्रपरीवेषाः स्निग्धाश्चेन्नातिदूषिताः ।
मेघाः स्निग्धाः संहताश्च प्रदक्षिणगतिक्रियाः ॥२८५॥
चतस्र एकरूपाश्चेत् सुवृष्टिः श्रावणादिषु ।
परिस्रुताः सान्तराश्च धारणा न शुभावहाः ॥ २८६ ॥
ज्यैष्ठशुक्ले नवक्षीणि रौद्रादीनि विलोकयेत् ।
निरभ्रैर्जलसंपत्तिः साभ्रैर्ज्ञेयमवर्षणम् ॥ २८७ ॥
ज्यैष्ठशुक्ले यदि स्वातिप्रमुखं भंचतुष्टयम् ।
क्षुतं चेद्धारणानाशात् श्रावणादौ न वर्षति ॥ २८८ ॥

इति धारणाः ।

चित्रास्वाती विशाखासु ज्यैष्ठे मेघाश्च विद्युतः ।
आषाढे श्रावणे भाद्रे तदा वृष्टिः सुभिक्षता ॥ २८९ ॥
चित्रा स्वातिविशाखासु ज्यैष्ठशुक्ले निरभ्रता ।
आषाढो जलहीनः स्याच्छ्रावणे तत्र वर्षति ॥ २९० ॥
चित्रा स्वातिविशाखासु ज्यैष्ठे यदि च वर्षति ।
तदा न श्रावणे वृष्टिर्भवेद्धान्यमहार्घता ॥ २९१ ॥
चतुर्दश्यष्टमीराधज्येष्ठयोः शुक्लकृष्णयोः ।
ज्यैष्ठशुक्लदशम्यां च शनिवारोऽप्यवृष्टये ॥ २९२ ॥
एकादश्यां ज्यैष्ठशुक्ले घटिकाः सप्तभाजिताः ।

द्विशेषे वा चतुःशेषे प्रभूतास्तत्र वृष्टयः ॥ २९३ ॥
पञ्चशेषेऽधिको वायुः षट्शेषे मन्दवर्षणम् ।
एक त्रिशून्यशेषे तु विद्यात् सर्वत्र वर्षणम् ॥ २९४ ॥
ज्यैष्ठशुक्लैकादशीतश्चतुर्दिवसमुत्तरः ।
वायुर्वहति चत्वारो मासा वर्षति वार्षिकाः ॥ २९५ ॥
विपरीतं यदा याति मेघा वा विपरीतगाः ।
तदा न वृष्टिस्तन्मासे तदक्ष इति धारणा ॥ २९६ ॥
प्रारम्भे पश्चिमो वातो यदि याति चतुर्दिनम् ।
तदनावृष्टिदुर्भिक्षभयं तत्र प्रजायते ॥ २९७ ॥
उत्तरोत्तरमार्गेण चत्वारो घ्नन्ति चेद्दिशि ॥
चतुरो वार्षिकान् मासान्तदा वर्षति वासवः ॥ २९८ ॥
विपरीतं यदा याति चत्वारो घ्नन्ति वा दिशि ।
शीतकाले भवेद् वृष्टिर्वर्षाकाले न वर्षति ॥ २९९ ॥
वायव्यां पश्चिमे वातो नैर्ऋत्यां जायते सदा ।
श्रावणे कार्तिके छिद्रं द्वौ मासौ वृष्टिरुत्तमा ॥ ३०० ॥
पूर्वे वातस्तथैशान्यामाग्नेय्यां जायते सदा ।
भाद्रे तथाश्विने छिद्रं वृष्टिराद्यन्तमासयोः ॥ ३०१ ॥
ज्यैष्ठशुक्लचतुर्दश्यां पूर्णिमायां च वर्षति ।
गर्भनाशस्तदा ज्ञेयो वर्षाकाले न वर्षति ॥ ३०२ ॥
ज्यैष्ठस्य पूर्णिमायां तु यदीन्दुग्रहणं भवेत् ।

पीड्यन्तेऽन्नादिदौर्लभ्यात् कोशलांश्च कलिंगकाः २०२
ज्यैष्ठस्य पूर्णिमांते तु यदि स्रवति मूलभम् ।
षष्ट्यहानि न वृष्टिः स्यात् पश्चाद्वर्षति वासवः ॥२०३॥
मूलपादविभागेन परिस्रुत्थावकल्पयेत् ।
अहानि चावरोधस्य पश्चिमां वृष्टिमादिशेत् ॥ २०५॥
यदि ज्यैष्ठस्य पञ्चम्यां वृषार्के वृष्टिरुद्भवेत् ।
पूर्वाषाढादिने वा स्यान्मूलं वृष्टं न दोषकृत् ॥२०६॥
ज्यैष्ठे श्रुत्यां घनिष्ठायां गर्जनं वर्षणं तडित् ।
दृश्येत न तदा दोषो ज्येष्ठामूलपरिस्रुतेः ॥ २०७ ॥
पूर्णिमायां शुभं मूलं मध्यमं प्रतिपत्तिथौ ।
न शुभं तु द्वितीयायां न पूर्णा मैत्रभे शुभा ॥ २०८ ॥
ज्यैष्ठस्य कृष्णा प्रतिपद्विद्युद्गर्जितवर्षणैः ।
करोति तृणदुर्भिक्षं वर्षणं खण्डमंडले ॥ २०९ ॥
ज्यैष्ठ्यां तु समतीतायां पूर्वाषाढेऽतिगर्जिते ।
विद्युद्घनघटासत्वे प्रावृट्कालः सुवर्षति ॥ २१० ॥

प्रवर्षणाभिधिः ।

पूर्णिमामूलमुल्लङ्घ्य पूर्वाषाढादिभिः क्रमात् ।
सप्तविंशतिनक्षत्रैः प्रवर्षणपरीक्षणम् ॥ २११ ॥
ज्यैष्ठ्यां तु समतीतायां पूर्वाषाढादिवर्षणे ।
परिमापजलं वृष्टं विजानीयादृतुक्रमम् ॥ २१२ ॥

वृष्टौ हस्तविशाले तु कुण्डके पतिनं जलम् ।
मापयेदाढकेनैव पञ्चाशत्पलमाढकम् ॥ ३१३ ॥
द्रौणाः वृष्टेः परं मानं द्रोणः स्याच्चतुराढकः ।
द्रोणमानमप्यक्षाणां वृष्टौ भ्रमः स्वभावजम् ॥ ३१४ ॥
द्रोणपात्रा प्रस्थसंज्ञा द्रोणमक्षरसंज्ञकम् ।
जलानां गर्भविज्ञाने माने व्यवहरन्ति हि ॥ ३१५ ॥
धनिष्ठा रेवती चित्रा हस्तपूषामृगीषु च ।
द्रोणाः षोडश चत्वारः स्वातिज्येष्ठाशतोडषु ॥ ३१६ ॥
मघानुराभाभरणीश्रुतिमूले चतुर्दश ।
उषाद्वित्रिविशाखासु विंशतिर्दशवह्निभे ॥ ३१७ ॥
आर्द्रार्क्षेन्ये तु रोहिण्यां फल्गुन्योः पञ्चविंशतिः ।
त्रयोदशाहिभे पुष्या जयोः पञ्चदश स्मृताः ॥ ३१८ ॥
द्रोणा अष्टादशार्द्रायामाश्विन्यां द्वादशेति च ।
इमे वृष्टजलद्रोणा भेषु नोपद्रवो यदि ॥ ३१९ ॥
धरित्री मुद्रिता येन तृणाग्रे येन विन्दवः ।
वृष्टं तदपि मानाहं ततो न्यूनं न मापयेत् ॥ ३२० ॥
नात्यवृष्टं नातिवृष्टं दशयोजनमण्डलम् ।
द्वादशांतपरं यच्च तद्वृष्टं वृष्टमुच्यते ॥ ३२१ ॥
येषु भेषु यथा वृष्टं भूयस्तेष्वेव वर्षति ।
आप्यादिषु न वृष्टं चेदनावृष्टिस्तदा भवेत् ॥ ३२२ ॥

एकेन विपलेनेदं स्तनितं गच्छति द्रुतम् ।
शतत्रयं तु हस्तानां स्वभावाच्चतुरुत्तरम् ॥ ३२३ ॥
विद्युत्प्रदर्शनादूर्ध्वं यावच्छिर्विपलैरिदम् ।
स्तनितं श्रूयते तेन वृष्टौ दूरत्वमुन्नयेत् ॥ ३२४ ॥

इति प्रवर्णमितिः ।

ज्यैष्ठे श्रवःश्रविष्ठे भे वातवृष्टितडिद्भवैः ।
सुवृष्टिं कुरुतः काले घर्मो वृष्टिनिरोधकः ॥ ३२५ ॥
ज्यैष्ठकृष्णद्वितीयायामनावृष्टिस्तु मंगले ।
रवावुष्मा बुधेच्छाया शनिवारे प्रजाक्षयः ॥ ३२६ ॥
ज्यैष्ठकृष्णचतुर्थ्यां तु मेघैराच्छादितो रविः ।
मासत्रयमतिक्रम्य कुर्यान्मेघमहोदयम् ॥ ३२७ ॥
ज्यैष्ठे कृष्णचतुर्थ्यां तु भास्करेऽस्तमुपागते ।
न वर्षति यदा मेघस्तदा काष्ठेन वर्षति ॥ ३२८ ॥
कृष्णायां ज्यैष्ठपञ्चम्यां पश्चिमः पवनो यदि ।
घनुर्वृष्टिर्गर्जितं चेत् कार्तिकेऽन्नमहार्घता ॥ ३२९ ॥
चतुर्थी पञ्चमी षष्ठी सप्तमी च कुहूतिथिः ।
कृष्णज्यैष्ठगतास्वासु द्रष्टव्यं मेघलक्षणम् ॥ ३३० ॥
सूर्यास्तकाले पूर्वस्यां मेघैराच्छादितं नभः ।
पर्वतैर्गजराजादिनानाकृतिधरैरपि ॥ ३३१ ॥
पञ्चरात्रात् सप्तरात्रात् सद्यो वृष्टिर्निगद्यते ।

ईदृशरेव सन्ध्यायां मेघैरन्यासु दिक्ष्वपि ॥ ३३२ ॥
दक्षिणस्या यदा मेघाः स कोटीनारसम्भवाः ।
त्रिपंचसप्तरात्रांतः किंचिद्वृष्टिविधायकाः ॥ ३३३ ॥
पश्चिमायान्तु सन्ध्यायां श्यामा अस्तंगते रवौ ।
पर्वता इव मेघाः स्युः सद्यो वर्षाभिलक्षणम् ॥ ३३४ ॥
उत्तरस्यां तु सन्ध्यायां गिरिमालेव विस्तृताः ।
मेघास्तृतीयदिवसे तुष्टिकृद्वृष्टिहेतवः ॥ ३३५ ॥
आग्नेय्यां बहुतापाय मेघाः स्वल्पजलप्रदाः ।
नैर्ऋत्यामीतिसन्तापरोगवर्षाविधायिनः ॥ ३३६ ॥
वायव्यामुन्नता मेघा वातवृष्टिकरा मताः ।
ऐशान्यामशनि व्यक्ता मेघा दृष्ट्या सुखावहाः ॥३३७॥
ज्यैष्ठमासेऽष्टमी कृष्णा तथा कृष्णा चतुर्दशी ।
युक्ता दक्षिणवातेन परतो वृष्टिहेतवे ॥ ३३८ ॥
ज्यैष्ठकृष्णाष्टमीचन्द्रं मेघाच्छन्नं न दर्शयेत ।
जलपूर्णा तदा पृथ्वी निर्मलेन्दुरवृष्टिकृत ॥ ३३९ ॥
ज्यैष्ठकृष्णदशम्यां तु वृष्टिर्भाद्रेऽतिवृष्टये ।
ज्यैष्ठे दशम्यां रेवत्यां वर्षणं च शुभावहम् ॥ ३४० ॥
ज्यैष्ठकृष्णदशम्यां तु यदि वारो रवेः शनेः ।
अनावृष्ट्या च दुर्भिक्षपीडया पीडयते प्रजाः ॥ ३४१ ॥
ज्यैष्ठकृष्णे रेवतीभं दशम्यां चेत् सुभिक्षता ।

एकादश्यां महामारी दुर्भिक्षं द्वादशीतिथौ ॥ ३४२ ॥
ज्यैष्ठेऽपायां भवेदार्द्रा प्रथमायां पुनर्वसुः ।
द्वितीयायां भवेत्पुष्यं जलं धान्यं तृणं च नो ॥ ३४३ ॥
ज्यैष्ठेऽमायां पूर्णिमायां मेघच्छन्नं दिवानिशम् ।
आषाढश्रवणौ दर्शात् पूर्णाद्भाद्रपदाश्विनौ ॥ ३४४ ॥
दिनरात्रिविभागेन वातो वहति पश्चिमः ।
अनावृष्टिर्वायुदोषात् क्वचिद् वृष्टिस्तु भाग्यतः ॥ ३४५ ॥

मासांतरोहिणी ।

सूर्यभुक्तपरित्यक्तां रोहिणीमागते विधौ ।
वायुश्चतुष्पादभेदाच्छ्रावणादिषु वृष्टये ॥ ३४६ ॥
वृष्टिरग्निः सस्यनाशो दुर्भिक्षं च सुवर्षणम् ।
झञ्झा सुवृष्टिः स्वास्थ्यं च ब्राह्म्यां पूर्वादिवायुभिः ३४७
रोहिण्यां वाति पूर्वाह्णे वृष्टिः श्रावणभाद्रयोः ।
मध्याह्ने वाति वायुश्चेद् वृष्टिर्भाद्रे तथाश्विने ॥ ३४८ ॥
अपराह्णे वायुचारे वृष्टिराश्विनकार्तिके ।
अहः सर्वं शुभो वायुः सर्वमासेषु वर्षति ॥ ३४९ ॥
वाति चेदशुभो वायुर्व्यत्यासेन फलं वदेत् ।
तत्र यो बलवान् वायुस्तेन नेयं शुभाशुभम् ॥ ३५० ॥

---

१ समो भाव इति पाठान्तरम् ।

ज्यैष्ठस्य यदि कृष्णायामेकादश्यां तु रोहिणी ।
तदा सुभिक्षमादेश्यमन्यथा त्वन्यथा भवेत् ॥ ३५१ ॥
एकादश्यां ज्यैष्ठकृष्णो रोहिणी यावती भवेत् ।
तावती सस्यसम्पत्तिर्भविष्यति परीक्षयताम् ॥ ३५२ ॥
ज्यैष्ठस्य कृष्णपक्षे तु दशम्यां यदि रोहिणी ।
तदालवृष्टिदुर्भिक्षं प्रजा चैवावसीदति ॥ ३५३ ॥
ज्यैष्ठस्य कृष्णैकादश्यां कृत्तिका खंडकालकृत् ।
रोहिणी चेत्सुकालः स्याद् दुष्कालो मृगशीर्षतः ॥
ज्यैष्ठे मासि तथाषाढे रोहिणीदिवसे नभः ।
निवृष्टं वृष्टिनाशाय सुवृष्टं वृष्टिवर्द्धनम् ॥ ३५५ ॥
आषाढकृष्णे रोहिण्यां वर्ण्यते यद्यया फलम् ।
तत्तथा सर्वमेवेह ज्यैष्ठेऽपि परिचक्षते ॥ ३५६ ॥

इतिमासान्तरोहिणी ।

इति ज्यैष्ठमासः ।

आषाढः ।

आषाढे प्रथमे भौमे निरभ्रे यदि भास्करः ।
न विद्युद्गर्जितं तर्हि द्वौ मासौ स्यादवर्षणम् ॥ ३५७ ॥
आषाढशुक्लप्रतिपद्दिने प्रातः पुनर्वसौ ।
यावती दृश्यते शुक्तिस्तावती वृष्टिरिष्यते ॥ ३५८

आषढ़ाशुक्ले पक्षत्यां तद्द्वितीयातृतीययोः ।
वृष्ट्या वृष्टेः क्रमाद्द्रोणाः एको द्वादश षोडश ॥ ३५९॥
आषाढशुक्ले पक्षत्यां द्वादश्यां पूर्णिमातिथौ ।
यदि मण्डलः पवनस्तदा मेघो न दृश्यते ॥ ३६० ॥
आषाढशुक्ले प्रतिपत्तिथौ वा पञ्चमीतिथौ ।
गुरुशुक्रेन्दुवारेण सुवृष्टिश्च सुभिक्षता ॥ ३६१ ॥
शुक्लाषाढे द्वितीयायां नवम्यां वा तिथौ यदि ।
गुरुशुक्रेन्दुवाराः स्युः सुवृष्टिश्च समर्घता ॥ ३६२ ॥
उष्मा रवौ बुधे च्छाया भौमेऽनावृष्टिरीक्ष्यते ।
शनिवारे प्रजापीडा स्यादिति ब्रुवते परे ॥ ३६३ ॥
शुक्लाषाढद्वितीयायां पञ्चम्यां यदि वर्षति ।
मेघो वा दृश्यते तत्र श्रावणे बहु वर्षति ॥ ३६४ ॥
शुक्लाषाढतृतीयायां पवनः पूर्वतो यदि ।
पूर्वागामी च मेघश्चेद् वृष्टिर्भाद्रे तु भूयसी ॥ ३६५ ॥
चतुर्थ्यां यदि शुक्लायामाषाढे दक्षिणोऽनिलः ।
मेघो गच्छति पूर्वस्यामाश्विने तर्हि वर्षति ॥ ३६६ ॥
चतुर्थ्यां यदि शुक्लायामाषाढे गर्जितं तडित् ।
वृष्टिर्भवति चेत्तत्र तदानावृष्टिरुच्यते ॥ ३६७ ॥
आषाढशुक्लपञ्चम्यां वातवृष्टिर्यदा भवेत् ।
दुर्भिक्षं जायते तर्हि तत्र देशेऽतिवृष्टितः ॥ ३६८ ॥

आषाढशुक्लपञ्चम्यामुत्तरः पवनो यदि ।
दृश्यन्ते चोन्नता मेघा वृष्टिर्भवति कार्तिके ॥ ३६९ ॥

आषाढशुक्लपञ्चम्यां पश्चिमो यदि मारुतः ।
घनुर्गर्जितवर्षाभिः कार्तिके स्यान्महार्घता ॥ ३७० ॥

आषाढशुक्लपञ्चम्यां विद्युद् विद्योतते भृशम् ।
तदा सुवृष्ट्या सर्वत्र सुभिक्षं जायतेऽनिशम् ॥ ३७१ ॥

आषाढशुक्लपंचम्यां विंदुपाते सति ध्रुवम् ।
वृष्टिः प्राङ्मासतोऽपाते स्वल्पं कृष्णोऽभिवर्षति ॥३७२॥

आदौ तावद् द्वितीयायां शुक्लाषाढे प्रवर्षति ।
तृतीयायां पूर्ववातो दृश्यन्ते चोन्नता घनाः ॥ ३७३ ॥

चतुर्थ्यां दक्षिणो वातो मेघा गच्छन्ति पूर्वतः ।
पंचम्यामुत्तरो वातो दृश्यन्ते चोन्नता घनाः ॥ ३७४॥

चतुर्ष्वपि दिनेष्वेवं स्थित्या श्रावणमासतः ।
चतुर्ष्वपि च मासेषु साधु वर्षति वासवः ॥ ३७५ ॥

शुक्लाषाढे द्वितीयातो वृष्ट्यै दिनचतुष्टये ।
दृष्टे घनघटाटोपे वाते पूर्वोत्तरेऽपि वा ॥ ३७६ ॥

अतिवृष्टिः सुवृष्टिर्वा सुभिक्षं वा समर्घता ।
अवर्षणे स्वनभ्रे तु दुर्भिक्षं नैर्ऋतेऽनिले ॥ ३७७ ॥

तृतीयायां च पंचम्यां वायुर्दक्षिणपश्चिमः ।
तदा धान्यानि नश्यंति दुर्भिक्षं जायते ध्रुवम् ॥ ३७८॥

तृतीयायां च पंचम्यां वायुः पूर्वोत्तरो यदि ।
तदा स्याद्धान्यनिष्पत्तिर्बहुला वृष्टिरुत्तमा ॥ ३७९ ॥
शुक्ले चतुर्थीपंचम्योराषाढे विद्युदीक्षणम् ॥
पूर्वा विद्युत् पूर्ववायुः सुभिक्षं क्षेमसिद्धये ॥ ३८० ॥
आग्नेय्यां तावनावृष्ट्यै याम्यायां व्याधिमृत्यवे ।
नैर्ऋत्यामीतये मध्ये सस्यसिद्ध्यै तु पश्चिमे ॥३८१ ॥
वायव्यां मध्यसस्याय सौम्यायां भूरिसम्पदे ।
ऐशान्यां सुखसम्पत्त्यै सुवृष्ट्यै वायुविद्युतौ ॥ ३८२ ॥
करोति विषमां वृष्टिं सर्वदिक् प्रभवोऽनिलः ।
विद्युतः प्रतिलोमे तु वाते स्युर्बहुधेतयः ॥ ३८३ ॥
शुभायां स्यन्दमानायां प्रतिष्ठा स्पन्दते यदि ।
सम्पद्यते तदा सस्यं महांश्च स्यादुपद्रवः ॥ ३८४ ॥
अशुभा स्पन्दते पूर्वं तत्पश्चात् स्यन्दते शुभा ।
सुवृष्टिमेव तत्राहुर्न च सस्यं समृध्यति ॥ ३८५ ॥
चतुर्थीपंचमीषष्ठीसप्तमीषु शुचौ सिते ।
पीताभैः सन्ध्या कृष्णैरभ्रैर्वर्षा भविष्यति ॥ ३८६ ॥
षष्ठ्यामाषाढशुक्लायां वृष्ट्या नभसि वर्षति ।
षष्ठ्यामवृष्ट्याऽनावृष्टिं श्रावणे परिचक्षते ॥ ३८७ ॥
आषाढशुक्लसप्तम्यां वृष्ट्या भाद्रे सुवर्षणम् ।
अवर्षणात्तु सप्तम्यां भाद्रेऽनावृष्टिरुच्यते ॥ ३८८ ॥

आषाढ़शुक्लगाष्टम्यां विद्युद्गर्जितवर्षणैः ।
आश्विने साधुवृष्टिः स्यादवृष्ट्यै नात्र वर्षति ॥ ३८९ ॥
शुक्लाष्टम्यां तथाषाढे वायुः पूर्वश्च दक्षिणः ।
दुर्भिक्षाय सुभिक्षाय वायुः पश्चिम उत्तरः ॥ ३९० ॥
आषाढशुक्लपंचम्यारब्धे तिथिचतुष्टये ।
यावन्त्यभ्राणि दृश्यन्ते वृष्टिः प्रावृषि तावती ॥३९१॥

स्वातियोगः ।

द्वादशस्वपि मासेषु स्वातीयोगपरीक्षणम् ।
आषाढे तु विशेषेण फलपाकपरीक्षणम् ॥ ३९२ ॥
शुक्लाषाढनवम्यां तु शनिवारश्च मैत्रभम् ।
क्वचिद्धान्यार्घनिष्पत्तिः क्वचिद् दुर्भिक्षसंभवः ॥ ३९३ ॥
शुक्लाषाढनवम्यां तु विद्युद्घनघटा यदि ।
जलपातोऽपि वा तत्र तदा स्युरतिवृष्टयः ॥ ३९४ ॥
शुक्लाषाढे नवम्यां तु विद्युतद्घनघटा शुभा ।
न विद्युतो न वा मेघा दुर्भिक्षं स्यादवृष्टितः ॥ ३९५ ॥
शुक्लाषाढनवम्यां तु वृष्टौ प्रबलधारया ।
अत्यल्पवृष्टिरत्यल्पसस्यं चात्र भविष्यति ॥ ३९६ ॥
दुर्बलायां शनैर्वृष्टौ बहु सस्यं सुवर्षणात् ।
कथंचिद् विन्दुपाते तु सस्यनाशोऽतिवृष्टितः ॥
अस्तकाले नभोऽनभ्रं दुर्भिक्षं जनयिष्यति ।

अनूपदेश एवैतत् फलं वृष्टिविशेषजम् ॥ ३९८ ॥
अतिवृष्ट्यै तु नवमीदशम्योरतिगर्जनम् ।
केचिदाहुस्तु नवमी दुर्भिक्षायातिगर्जति ॥ ३९९ ॥
आषाढशुक्लनवमीदशम्योश्चन्द्रमा यदि ।
निशि च्छन्नो घनैस्तर्हि शीतकाले सुवृष्टिदः ॥४००॥
शुक्लाषाढे शुभा वृष्टिर्नवमीदशमीतिथौ ।
दुर्भिक्षं जायते नूनं वांते वृष्टिविनाकृते ॥ ४०१ ॥
शुक्लाषाढनवम्यां चेदनभ्रमुदयास्तयोः ।
मेघाच्छन्नस्तु मध्याह्नो वर्षर्तुः साधु वर्षति ॥ ४०२ ॥
अस्तोदयौ घनाच्छन्नौ मध्याह्ने निर्मलो रविः ।
तत्र तोयं न पश्यामि किञ्चिद् वृष्टिं समादिशेत् ४०३
उदयेऽस्ते च मध्याह्ने यदि स्यान्मेघडम्बरः ।
साधु वर्षति वर्षर्तुरवृष्टिर्निर्मले रवौ ॥ ४०४ ॥
उदये निर्मलो भानुर्मध्याह्नास्ते घनाकृते ।
अग्रे तोयं न पश्यामि वर्जयित्वा महानदीम् ॥ ४०५ ॥
उदये वाथ मध्याह्ने सन्ध्यायां सूर्यमण्डलम् ।
मेघच्छन्नं न शुभदं नवम्यां च शुचौ सिते ॥ ४०६ ॥
आषाढशुक्ले पूर्वाह्णे पराह्णे च सुवृष्टये ।
मध्याह्ने कीटसर्पाणां स्वाती वर्षति सृष्टये ॥ ४०७ ॥
पूर्वरात्रेऽखिलं सस्यं स्वाती वृष्ट्याभिवर्धयेत् ।
माषमुद्गतिलोत्पत्त्यै मध्यरात्रेऽभिवर्षति ॥ ४०८ ॥

वर्षत्यपररात्रे चेद् ग्रैष्म्यं स्यान्न तु शारदम् ।
दृष्टयां द्युनिंश दृष्टिः प्रावृषि स्यान्निरन्तरा ॥ ४०९॥
यत्फलं रोहिणीयोगे तत्स्वात्यामपि चिन्तयेत् ।
तत्र वायुवशात्तिसर्द्धि चातुर्मास्ये परीक्षते ॥ ४१० ॥
चित्रास्वातीविशाखासु त्र्यहमप्यतिवर्षति ।
न वर्षति तदा मेघो दुर्भिक्षस्य हि लक्षणम् ॥ ४११ ॥

इति स्वातीपरीक्षा ।

आषाढशुक्लैकादश्यां शनिर्वा मंगलो रविः ।
वारश्चेत् प्रबलो वायुरन्नं याति महार्घताम् ॥ ४१२ ॥
आषाढशुक्लैकादश्यां शन्यादित्यकुजैः समम् ।
सम्पूर्णतिथिभागश्चेत्तदा दुर्भिक्षमादिशेत् ॥ ४१३ ॥
आषाढशुक्लैकादश्यां यदि वर्षति वासवः ।
भाद्रा अपरपक्षे तु तदा वर्षा भविष्यति ॥ ४१४ ॥
आषाढशुक्लद्वादश्यां महावातो भवेद्यदि ।
तदा वर्षति यत्नेन तथाहुः प्रतिपद्यपि ॥ ४१५ ॥
शुक्लाषाढचतुर्दश्यां यदि वृष्टिर्भवेत्तदा ।
वृष्टिः श्रावणकृष्णैकादशीतो नववासरे ॥ ४१६ ॥

आषाढी परीक्षा ।

गर्भाः सृष्टिकराः सर्वे सुयोगा विलयं गताः ।
आषाढ्यां तु विनष्टायां सर्वमेवाशुभं भवेत् ॥ ४१७॥

गर्भनाशकराः सर्वे कुयोगा विलयं गताः ।
यद्याषाढी शुभा जाता तदा सर्वं शुभं भवेत् ॥ ४१८ ॥
आषाढे पूर्णिमायां तु यदीन्दुग्रहणं भवेत् ।
मासेऽर्घपञ्चमे सर्वद्रव्याणां हि महार्घता ॥ ४१९ ॥
दृष्टो यदीन्दुर्नाषाढ्यां वर्षर्तुर्वहु वर्षति ।
यदि तत्रामलश्चन्द्रोऽनावृष्टिर्दारुणा भवेत् ॥ ४२० ॥
यदि तत्रामलश्चन्द्रः परिवेषयुतोऽथवा ।
तदातिमात्रं दुर्भिक्षं तत्र देशेऽभिजायते ॥ ४२१ ॥
आषाढे पूर्णिमायां तु मूलभं यदि दृश्यते ।
यावदेव भवेन्मूलं तावद्दुर्भिक्षमादिशेत् ॥ ४२२ ॥
आषाढ्यां यदि मूलं स्यादुत्तराषाढमेव वा ।
आवर्षं मध्यमं धान्यं देशे सर्वत्र जायते ॥ ४२३ ॥
पूर्वाषाढा यदाषाढ्यां तदा वर्षं शुभं भवेत् ।
आवर्षं धान्यनिष्पत्तिः प्रजापि सुखमेधते ॥ ४२४ ॥
शुक्लाषाढे चतुर्दश्याः पूर्णिमा घटिकाऽधिका ।
समर्घं स्यात्समं साम्ये शून्यपाते तु निष्कणम् ॥४२५॥
आषाढ्याः पूर्णिमायास्तु यदि वृद्धिः प्रजायते ।
मासमेकं समर्घं स्यात् पश्चादन्नमहार्घता ॥ ४२६ ॥
आषाढ्यां षष्टिमानाथां यावत्सम्वत्सरं शुभम् ।
त्रिंशद्घटीभिः षण्मासान् तदर्द्धेन तदर्द्धके ॥ ४२७ ॥

न्यूनाभिः पञ्चदशतो घटीभिर्दुःखसंभवः ।
वातत्वार्द्रलसंयोगात् तारतम्यं फले पुनः ॥ ४२८ ॥
आषाढयां घटिका षष्टया मासा द्वादश भाविताः ।
पंचनाड्यो भवेन्मासो मासि मासि फलं वदेत् ॥४२९॥
यत्र मासविभागे वा रात्रौ चंद्रोऽतिनिर्मलः ।
तन्मासगर्भा उत्पातविनष्टा इति निश्चयः ॥ ४३० ॥
यत्र पंचसु नाडीषु निर्मलं दृश्यते नभः ।
तत्र मासत्रिभागे वै वृष्टिहानिर्भविष्यति ॥ ४३१ ॥
यत्र वा पंचनाडीषु मेघाः पूर्वोत्तरानिलौ ।
तत्र मासे भवेद् वृष्टिरित्येवं सर्वनिर्णयः ॥ ४३२ ॥
आद्ये यामें यदाभ्राणि वातौ पूर्वोत्तरौ तथा ।
आद्ये मासे तदा वृष्टिरुपयुक्ताधिका भवेत् ॥ ४३३ ॥
सर्वरात्रं यदाभ्राणि वातौ पूर्वोत्तरौ तथा ।
तस्मिन् वर्षे कणाः पुष्टाश्चातुर्मास्यं सुवर्षति ॥४३४॥
न वर्षति यदा देवो वातौ पूर्वोत्तरौ न हि ।
यदि वा नाभ्रलेशः स्यात् कालो दुष्टस्तदा मतः ४३५
आषाढ्या रात्रिकाले तु पवनः सर्वदिग्गतः ।
अभ्रैरवृष्टैरपि सा पौर्णमासी शुभावहा ॥ ४३६ ॥
आषाढयामप्यनभ्रायां वातौ पूर्वोत्तरौ यदि ।
यामार्द्धसंमिते मासे तत्र वृष्टिर्हि वा भवेत् ॥ ४३७ ॥

आषाढचामप्यनभ्रायां वातौ पूर्वोत्तरौ यदि ।
यत्र यामार्द्धके तत्र मासे वृष्टिर्हठाद् भवेत् ॥ ४३८ ॥
यद्याषाढचा अष्टयामं गर्भवातश्च पूर्वजः ।
शीतकालिकगर्भाणामविघातं तदा वदेत् ॥ ४३९ ॥
आषाढचां तु दिने रात्रौ पूर्वो वायुः सुवृष्टिकृत् ।
किन्तु पश्यंति दुर्भिक्षं मरुदेशे च गुर्जरे ॥ ४४० ॥
श्राज्नेय्यामल्पवृष्टिः स्यादग्निभीतिर्महार्घता ।
सर्वत्र कठिनः कालो मरुदेशे तु दुर्दशा ॥ ४४१ ॥
दक्षिणो स्यादनावृष्टिः प्रजापीडा महार्घता ।
नैर्ऋते स्यादनावृष्टिर्दुर्भिक्षं दारुणं भयम् ॥ ४४२ ॥
वारुण्यां तु महावृष्टिर्धान्योत्पत्तिस्तु मध्यमा ।
वायव्ये स्यादनावृष्टिर्वायुदोषेण दुर्दशा ॥ ४४३ ॥
उत्तरे स्यान्महावृष्टिरैशान्यां तु सुवृष्टयः ।
ऊर्ध्वे वायौ तु दुर्भिक्षमुग्रवायुरवृष्टिकृत् ॥ ४४४ ॥
अल्पवृष्टयै तु चत्वारो वाता वान्त्यप्रसव्यतः ।
अदक्षिणं तु ते यांति सुभिक्षक्षेमसंपदे ॥ ४४५ ॥
समन्ततो यदा यांति परस्परविघातिनः ।
खण्डवृष्टिं सस्यनाशं तृणनाशं च कुर्वते ॥ ४४६ ॥
शुभवातं नेष्टवातो हन्ति पापफलाय तु ।
नेष्टवातं शुभो वातो हत्वा प्रकुरुते शुभम् ॥ ४४७ ॥

दक्षिणः पौर्विकं वातं हन्त्यनावृष्टिहेतवे ।
वायुस्तम्भे तु पर्याप्ता वृष्टिः श्रावणभाद्रयोः ॥ ४४८ ॥
कुहूतः षोडशेऽह्नीदं चिंत्यं वाताभ्रलक्षणम् ।
अर्द्धमस्तमिते भानौ तस्माद्वर्षशुभाशुभम् ॥ ४४९ ॥
आषाढ़ीदिवसे वायुं सायंकाले परीक्षयेत् ।
पूर्वैशान्युत्तरावायुसञ्चारे समयः शुभः ॥ ४५० ॥
दुर्भिक्षमाग्निनैर्ऋत्यवायव्यानिलसंचरे ।
पश्चिमे दक्षिणे वायौ त्वर्धं समयमादिशेत् ॥ ४५१ ॥
सुभिक्षमग्निरापाढ्यां वृष्टिरल्पा समोत्तमा ।
बहुवाता सुपुष्टा च शुभा पूर्वादिवायुभिः ॥ ४५२ ॥
न चेत्पूर्वोत्तरौ वातौ न चाभ्रं न च वर्षणम् ।
आषाढ्यां तर्हि विज्ञेयं दुर्भिक्षं सर्वतोमुखम् ॥ ४५३ ॥
आषाढपूर्णिमायां तु विद्युद्गर्जितवर्षणैः ।
दुर्भिक्षलक्षणं नष्टं सर्वानंदः प्रवर्तते ॥ ४५४ ॥

इत्याषाढी परीक्षा ।

शुभो वारः सुभिक्षाय श्रवणेऽपाढयोरपि ।
दुर्भिक्षाद्यशुभप्राप्तिः शनौ सूर्ये च मंगले ॥ ४५५ ॥
कृष्णाषाढे पूर्वभाद्रे चतुर्थ्यां यदि वर्षति ।
पञ्चम्यां गर्जितं घोरं तदा वर्षर्तुरुत्तमः ॥ ४५६ ॥

कृष्णाषाढचतुर्थ्यां चेदभ्राच्छन्नो दिनोदयः ।
विद्युद्वा गर्जितं वृष्टिस्त्रीन् मासांस्तर्हि वर्षति ॥ ४५७ ॥
कृष्णाषाढचतुर्थ्यां चेन्निशि वर्षति वासवः ।
तदा मासद्वयं वृष्ट्वा पुनर्वर्षा विलीयते ॥ ४५८ ॥
कृष्णाषाढचतुर्थ्यां चेदस्ते भास्करमण्डले ।
न वर्षति न वा मेघस्तदा कष्टेन वर्षति ॥ ४५९ ॥
कृष्णाषाढचतुर्थ्यां चेत्तुषारानपि पातयेत् ।
तदा नास्ति जलक्लेशः सर्वं सुस्थं भविष्यति ॥ ४६० ॥
यदा घनघटावृष्टिः कृष्णाषाढेऽश्विनीदले ।
सर्वान् दोषान् निहत्येषा सुभिक्षं कुरुते तदा ॥ ४६१ ॥
आषाढकृष्णपञ्चम्यां निर्मलं गगनं शुभम् ।
तत्राष्टदशयामान्ते घनस्तोयं व्यपोहति ॥ ४६२ ॥
आषाढकृष्णपंचम्यां न विद्युन्नापि वार्दलम् ।
तदा वृष्टिर्न तत्रास्ति वृथा स्यात्कर्षणश्रमः ॥ ४६३ ॥
आषाढकृष्णपंचम्यां यदि वृष्टिर्भवेत्तदा ।
चत्वारो वार्षिका मासा भवेयुर्वारिसंप्लुताः ॥ ४६४ ॥
आषाढकृष्णपंचम्यां यदि वायोर्न संचरः ।
यदि वाऽत्युग्रसंचारो दुर्भिक्षं प्रबलं तदा ॥ ४६५ ॥
आषाढकृष्णपञ्चम्यां पश्चिमः पवनो यदि ।
गर्जितं च धनुर्वृष्टिः कार्तिके स्यान्महार्घता ॥ ४६६ ॥

आषाढकृष्णसप्तम्यां शनिवारः सुवृष्टिकृत् ।
आषाढकृष्णगाष्टम्यां रविवारः शुभावहः ॥ ४६७ ॥
आषाढकृष्णगाष्टम्यां दुर्भिक्षं दक्षिणोऽनिले ।
पूर्वानिले खण्डवृष्टिः सुवृष्टिः पश्चिमानिले ॥ ४६८ ॥
श्रावणे बहुवृष्टिः स्यादुत्तरो यदि मारुतः ।
तत्र चेद् गर्जितं वृष्टिश्चातुर्मास्यं सुवर्षति ॥ ४६९ ॥
आषाढकृष्णगाष्टम्यां शशिनो निर्मलोदये ।
अनावृष्टिः सुवृष्टिस्तु मेघाच्छन्ने विधूदये ॥ ४७० ॥
कृष्णापाढनवम्यां तु गुरुशुक्रेन्दुभिः शुभम् ।
कुजेन युद्धं दुर्भिक्षं शनिना रविणापि च ॥ ४७१ ॥
कृष्णापाढनवम्यां तु विद्युद् विद्योतते यदि ।
सुवृष्टिश्च सुभिक्षं च तदा तत्र भविष्यति ॥ ४७२ ॥
आषाढे कृत्तिकायान्तु यदि मेघः प्रवर्षति ।
तदा बहुजला पृथ्वी बहुधान्यधनाः प्रजाः ॥ ४७३ ॥
सप्तमी दशमी चैकादशी चापाढकृष्णगा ।
सन्ध्यायां मेघचिह्नन त्रिरात्रं वृष्टिकारिणी ॥ ४७४ ॥
आषाढकृष्णो जायेत पंचरात्रं झटी यदि ।
तदा तु ज्यैष्ठगे मूले गलितेऽपि सुवृष्टयः ॥ ४७५ ॥
आषाढकृष्णैकादश्यामभ्रच्छन्नो दिनोदयः ।
विद्युद्वा गर्जितं वृष्टिः सुभिक्षं तर्हि निर्दिशेत् ॥४७६॥

रोहिणीयोगः ।

आषाढकृष्णे चन्द्रेण संगतां पश्य रोहिणीम् ।
चंद्रप्रभाणवर्णाभा मार्गैर्वातैश्च तत्फलम् ॥ ४७७ ॥
नगरादुत्तरे पूर्वे स्थलं कृत्वा त्र्यहोषितः ।
शुस्थगिदलं कुशास्तीर्णंमावसेदग्नितत्परः ॥ ४७८ ॥
रत्नौषधिजलैः पूर्णान् प्रवालपिहितान् घटान् ।
अकृष्णाबुध्नानप्यत्र स्थापयेच्तु चतुर्दिशम् ॥ ४७९ ॥
महाव्रतेन मन्त्रेण बीजान्याहृत्य निक्षिपेत् ।
कुम्भे संप्लावयेत्तानि सुवर्णकुशवारिभिः ॥ ४८० ॥
पार्थैर्वारुणैः सौम्यैर्मंत्रैर्होमो विधीयते ।
योगान्तेऽङ्कुरितं बीजं वीक्ष्य तत्सिद्धिमूहयेत् ॥४८१॥
चन्द्रे योगं तु रोहिण्या गते वायुं परीक्षयेत् ।
आदौ दिक्साधनं कृत्वा दिक्साधनविधानतः ॥४८२॥
वंशे द्वादशभिर्हस्तैरुन्नते प्रतिरोपिताम् ।
पताकामसितां श्लक्ष्णां चतुर्हस्तायतां कुरु ॥ ४८३ ॥
सव्येन गच्छन् शुभदोऽपसव्येन तु निन्दितः ।
तद्दिश्य एव बलवान् यत्रासौ प्रतितिष्ठति ॥ ४८४ ॥
सस्यं चाग्निमकोपश्च सस्यहानिर्महार्घता ।
वृष्टिर्भ्रंशासुवृष्टिश्च शिवं पूर्वादिवायुभिः ॥ ४८५ ॥

रोहिण्यां वायुयोगेन चातुर्मास्यपरीक्षणम् ।
प्रहरैरर्धमासाः स्युस्तदंशैर्दिनकल्पना ॥ ४८६ ॥
नीयन्ते वायुना मेघास्तस्मात्तस्मिन् क्षणे पुनः ।
यद्दिगुत्था इमे मेघाः फलं तेषां च वायुवत् ॥ ४८७ ॥
सिताः क्वाप्यसिताः क्वापि स्थिताः क्वापि सितासिताः
सर्पैः समानाकृतयो वलितोदरपृष्ठकैः ॥ ४८८ ॥
अर्कांशुरञ्जितप्रांताः कमलोदरसन्निभाः ।
कुङ्कुमैः किंशुकैर्भृंगैः सदृशाः क्वापि चित्रिताः ॥४८९॥
असिता विद्युदाक्रांताः क्वचिदिंद्रधनुर्युताः ।
अञ्जनाद्रिशिलाघातप्रतिरूपधराः क्वचित् ॥ ४९० ॥
सन्ध्यानुरक्ते नभसि तत्र तत्रान्ववस्थिताः ।
क्वचिदिन्दीवरश्यामाः क्वचिन्मुक्ताहिमप्रभाः ॥४९१॥
सौदामिनी हेमकक्षाः सुखण्डाद्यखण्डादिमंडिताः ।
स्रवद्गखण्डा अभ्रखण्डा गजराजसमाः क्वचित् ॥
कृष्णौकांगाः खमाक्रम्य दिगन्तालंबिनो घनाः ।
मन्द्रस्वनाः क्षितौ नम्राः सलिलौघमुचः क्वचित् ४९२
एवंरूपा घनास्तूपा एकाहं वा द्व्यहं त्र्यहम् ।
स्थगयन्ति यदि व्योम वृष्टिः संभाव्यते तदा ॥४९४॥
नीरवैरूक्षतन्वभ्रैर्मरुताक्षिप्तविग्रहैः ।
शुष्कमर्कटकाकादिदुष्टरूपैरवर्षणम् ॥ ४९५ ॥

चन्द्रः कष्टाय जगतो रोहिण्या दक्षिणे पथि ।
करोति विपुलां वृष्टिं रोहिण्यां उत्तरश्चरन् ॥ ४९६ ॥
रोहिण्या उत्तरोऽर्पींदुर्यदि स्पृशति रोहिणीम् ।
तदोपसर्गान् बहुलान् कुरुते वृष्टिदोऽपि सः ॥ ४९७ ॥
रोहिणी शकटं भित्त्वा यदि गच्छति चंद्रमाः ।
तदा महत्यनावृष्टिः पृथ्वी दुर्भिक्षपीडिता ॥ ४९८ ॥
पृष्ठतोऽनुसरत्येषा शशिनं यदि रोहिणी ।
स्त्रियः कामातुराः पुंसां वशे तिष्ठन्ति भूयसा ॥ ४९९ ॥
यदि वा रोहिणी चन्द्रः पृष्ठतोऽनुसरत्ययम् ।
तदा तु पुरुषाः स्त्रीणां वशे गच्छन्ति कामिताः ५००
उदये चन्द्रमा ब्राह्म्या आग्नेय्यामुपसर्गकृत् ।
नैर्ऋत्यां संस्थितः सस्यं विनाशयति चेतिभिः ॥५०१॥
वायव्ये यदि रोहिण्याः समः सस्यचयस्तदा ।
ऐशान्यां सस्यवृद्ध्यादीन् गुणान् प्रकुरुते बहून् ॥५०२॥
रोहिणी तारकामिंदुस्ताडयन् भयकृद्भवेत् ।
आवृणवन् रोहिणीं चंद्रः कंचिद्धन्ति नृपं स्त्रिया ५०३
रोहिणीसंयुतश्चन्द्रो मेघाच्छन्नो न दृश्यते ।
बहुसस्या बहुजला पृथ्वी रोगेण पीड्यते ॥ ५०४ ॥
आषाढकृष्णे रोहिण्यां यदि वर्षति वासवः ।
तदा वृष्टिर्भवेत्तावद्यावन्नोत्तिष्ठते हरिः ॥ ५०५ ॥

अर्के रूर्के तु रोहिण्यां चंद्रे वृष्टिर्न जायते ।
तदा भवति दुर्भिक्षमित्याचष्टे पराशरः ॥ ५०६ ॥
आषाढकृष्णैकादश्यां कृत्तिकातः समं फलम् ।
सुभिक्षं रोहिणी कुर्याद् दुर्भिक्षं मृगशीर्षतः ॥५०७॥
आषाढकृष्णैकादश्यां रोहिणी घटिकामितिः ।
यावती लभ्यते तावद्धान्यर्विशोपका मताः ॥ ५०८ ॥
आषाढकृष्णैकादश्यामुत्तरो यदि मारुतः ।
भानूदयोऽभ्रछन्नो वा तदात्यन्तं शुभावहः ॥ ५०९ ॥
आषाढकृष्णैकादश्यां यदि वर्षा मनागपि ।
तदा शुभावहो योगः साधु वर्षां करिष्यति ॥ ५१० ॥
आषाढकृष्णैकादश्यां निशीथे यदि गर्जति ।
तदा दुर्भिक्षमादेश्यमनावृष्टिर्भविष्यति ॥ ५११ ॥
अभ्रशून्ये वियति चेत्तपति प्रखरो रविः ।
तारा च भासते रात्रौ तदापि स्यात्सुवृष्टिकृत् ॥५१२॥
कृष्णाषाढदशम्यान्तु सुभिक्षायैव रोहिणी ।
एकादश्यां समत्वाय दुर्भिक्षं द्वादशीतिथौ ॥ ५१३ ॥
रोहिणी च त्रयोदश्यां वायुः प्रबलमुद्वहेत् ।
आषाढे केचिदिच्छन्ति ज्येष्ठोक्तं रोहिणीफलम् ॥५१४॥
आषाढे रोहिणीयोगे वायुः पूर्वोत्तरः शुभः ।
तत्राभ्राणि तडिद् वृष्टिः प्रावृट्कालशुभावहाः ॥५१५॥

इति रोहिणीयोगः ।

आषाढे यद्यमावास्यादिने वृष्टिर्घनाघनाः ।
शुभयोगोऽयमाख्यातः सुभिक्षं जायते तदा ॥ ५१६ ॥
आषाढेऽमादिने गर्भः सायंसध्याफलावहः ।
पूर्वस्यां वार्दलं धूम्रं सूर्यास्ते याति कृष्णताम् ॥५१७॥
उत्तरस्यां मेघमाला प्रभाते विमला दिशः ।
मध्यकाले घर्मतापो निशीथे तर्हि वर्षति ॥ ५१८ ॥
आषाढस्य त्वमावास्या पुष्याश्लेषामघान्विता ।
मध्यमं वर्षमादेश्यं नाधिकं वर्षणं तदा ॥ ५१९ ॥
आषाढमासे संक्रान्तौ यदि वर्षति वासवः ।
व्याधिरुत्पद्यते घोरः श्रावणे च पुनः शुभम् ॥५२०॥

इत्याषाढमासः ॥

श्रावणे शुक्लपक्षे तु सिंहसंक्रांतिसम्भवः ।
समुद्रे पूर्णवृष्टिः स्यादन्यदेशे तु कुत्रचित् ॥ ५२१ ॥
कर्कसंक्रमणे वृष्टिरवृष्टिः सिंहसंक्रमे ।
कर्णापूरं वहेत् कन्या तुले निर्वातवृष्टयः ॥ ५२२ ॥
कर्कप्रवेशसमये सूर्यं पश्यति चेद् गुरुः ।
पूर्णां पादोनदृष्ट्या वा तत्र काले सुवृष्टयः ॥ ५२३ ॥
कर्कसंक्रमकालात्तु यदा दशदिनांतरे ।
समुदेति बुधस्तर्हि सुवृष्टिः श्रावणे सिते ॥ ५२४ ॥
सिंहसंक्रमकालात्तु यदा दश दिनान्तरे ।
समुदेति बुधस्तर्हि तत्र स्युरतिवृष्टयः ॥ ५२५ ॥

अस्तं गच्छति शुक्रश्चेदुदेति श्रवणे बुधः ।
तदा भाद्रपदे मासे मेघो नैव प्रवर्षति ॥ ५२६ ॥
कर्के बृहस्पतिः सिंहे शुक्रः स्यान्मंगलस्तुले ।
आषाढकृष्णोऽनावृष्ट्यै कलहः श्रावणे सिते ॥ ५२७ ॥
अनावृष्टिकरः शुक्रः सिंहे श्रावणशुक्लके ।
अतिवृष्टिकरो वा स्याद् रोगाः स्युस्तर्हि कार्तिके ५२८
चतुर्थ्यां श्रावणे शुक्ले भानुरुच्चन्न दृश्यते ।
मेघावरणतस्तर्हि पुष्यार्कौ नहि वर्षति ॥ ५२९ ॥
पञ्चम्याः श्रावणे शुक्ले वायुः पश्चिमदक्षिणः ।
द्वयहे यदि भवेद्वृष्टिर्दुर्भिक्षं तर्हि जायते ॥ ५३० ॥
श्रावणे शुक्लपञ्चम्यां वृष्टिश्चेदभ्रमेव वा ।
तदा तु चतुरो मासान् वृष्टिर्भवति भूयसी ॥ ५३१ ॥
श्रावणे शुक्लसप्तम्यामुदयास्तमने रवेः ।
मेघच्छन्ने यदि स्यातां तदा वृष्टिर्न चान्यथा ॥५३२॥
श्रावणे शुक्लसप्तम्यामस्तं याते दिवाकरे ।
न वर्षति न वा मेघास्तदानावृष्टिसंभवः ॥ ५३३ ॥
श्रावणे शुक्लसप्तम्यां सोमे हस्तसमागमे ।
दुर्भिक्षं जायते घोरं निर्जला जलदायिनी ॥ ५६४ ॥
श्रावणे शुक्लसप्तम्यां यदि स्वाती प्रवर्षति ।
निष्पत्तिः सर्वधान्यानां प्रजाश्च निरुपद्रवाः ॥ ५३५ ॥

श्रावणे शुक्लसप्तम्यां स्यात्यामुदयते रविः ।
यदि वर्षति पर्जन्यस्तदा जलमयी मही ॥ ५३६ ॥
चित्रा-स्वाती-विशाखासु श्रावणे चेन्न वर्षति ।
न च वृष्टिर्न वा सस्यं तद्देशे तर्हि जायते ॥ ५३७ ॥
अष्टम्यां श्रावणे शुक्ले प्रभाते मेघडम्बरम् ।
रविराच्छादितस्तेन महावृष्टिं करिष्यति ॥ ५३८ ॥
चतुर्थी पञ्चमी शुक्ला सप्तमी च चतुर्दशी ।
श्रावणेन विना पूर्णा वृष्टियुक्ताः शुभावहाः ॥ ५३९ ॥
दशम्यां श्रावणे सूर्यः सिंहे संक्रमते शनौ ।
तदा जलमयी पृथ्वी पूर्णाः सस्यसमृद्धयः ॥ ५४० ॥
श्रावणे पूर्णिमायां तु श्रावणा चेन्न वर्षति ।
तदा सुभिक्षमादेश्यमित्याहुर्दैवचिन्तकाः ॥ ५४१ ॥
मेघैराच्छादितं चन्द्रं श्रावणी पूर्णिमादिने ।
शुभमाहुः परे त्वाहुर्निरभ्रं निर्मलं शुभम् ॥ ५४२ ॥
श्रावणे पूर्णिमायां तु यदीन्दुग्रहणं भवेत् ।
यमुनांते कान्यकुब्जैर्दौर्लभ्यं रसमूलयोः ॥ ५४३ ॥
प्रतिपच्छ्रावणे कृष्णा श्रावणे गुरुवासरे ।
शुभः संवत्सरस्तर्हि सर्वसस्यसमृद्धयः ॥ ५४४ ॥
श्रावणस्य द्वितीयायां यदि चन्द्रो न दृश्यते ।
तदा तेन भवेद् वर्षे सस्यसंपत्तिरुत्तमा ॥ ५४५ ॥

श्रावणस्य तृतीयायां कृष्णे यामे तृतीयके ।
उत्तरस्यां धनैः सौख्यं षष्ठे मासि महार्घता ॥ ५४६ ॥

यदि वा श्रावणे कृष्णे चतुर्थी जायते शनौ ।
तदा दुर्भिक्षमादेश्यं देशभंगः प्रजायते ॥ ५४७ ॥

श्रावणे कृष्णसप्तम्यां रोहिणी गुरुणायवा ।
शुक्रेण शनिनार्केण संयुक्ता यदि दृश्यते ॥ ५४८ ॥

तदा तृतीयमासान्ते यवगोधूमशालयः ।
महार्घा ऐक्षवं हिंगुर्हरिद्राजीरकं तिलम् ॥ ५४९ ॥

यदि तु श्रावणेऽष्टम्यां कृष्णायां रोहिणी भवेत् ।
तदा सुभिक्षमादेश्यं प्रजापि सुखमेधते ॥ ५५० ॥

अमायां श्रावणे भानुवारे चेत्रश्चिमे धनुः ।
तदा सस्यमहार्घत्वं प्रजापीडा च जायते ॥ ५५१ ॥

इति श्रावणमासः ।

भाद्रः ।

प्रतिपद् सप्तमी भाद्रे द्वादशी च त्रयोदशी ।
पूर्णिमा चासुवारुण्यां श्रितैर्मेघैः प्रवर्षणम् ॥ ५५२ ॥

भाद्रशुक्लद्वितीयायां यदि चन्द्रो न दृश्यते ।
तदा तेन भवेद् वर्षे सस्यसंपत्तिरुत्तमा ॥ ५५३ ॥

भाद्रशुक्लतृतीयायां भौमे चोत्तरफाल्गुनी ।
प्रोन्नतोऽपि घनस्तत्र न च वृष्टिकरो भवेत् ॥ ५५४ ॥

भाद्रशुक्लचतुर्थ्यां चेद्वाराजीवेन्दुभार्गवाः ।
उत्तराहस्तचित्राभिः सुभिक्षं जायते ध्रुवम् ॥ ५५५ ॥
शुक्लायां भाद्रपञ्चम्यां स्वातीयं यदि जायते ।
तदा सुभिक्षमादेश्यमित्याहुर्दैवचिन्तकाः ॥ ५५६ ॥
शुक्लायां भाद्रपंचम्यां यदि वृष्टिर्न जायते ।
दुर्योगं तर्हि जानीयाद् दुर्भिक्षं दैवकोपतः ॥ ५५७ ॥
शुक्ले भाद्रपदे षष्ठीमनुराधा भवेद् यदि ।
नक्षत्रांतरदोषेऽपि सुभिक्षं जायते ध्रुवम् ॥ ५५८ ॥
यदि भाद्रपदे शुक्ले षष्ठ्यां भवति मैत्रभम् ।
तन्नाभ्राणि तद्विद्वृष्टिर्धान्यनिष्पत्तिहेतवे ॥ ५५९ ॥
भाद्रषष्ठ्यां यदा मैत्रे विद्युद्गर्जितवृष्टयः ।
सुभिक्षाय क्षतिर्नास्ति श्रावणे स्वात्यवर्षणात् ॥५६०॥
भाद्रषष्ठ्यां तु मैत्रेऽपि विद्युद्गर्जितवृष्टयः ।
न भवंति तदा तत्र देशे दुर्भिक्षमादिशेत् ॥ ५६१ ॥
सप्तम्यां भाद्रशुक्लायामनुराधा भवेद् यदि ।
न च वर्षति पर्जन्यस्तदानावृष्टिरुच्यते ॥ ५६२ ॥
चित्रास्वातीविशाखासु शुक्ले भाद्रपदे यदा ।
नातिवर्षति पर्जन्यः प्रावृट् संतिष्ठते तदा ॥ ५६३ ॥
प्रावृट्प्रांतेऽनुराधायां शुक्ले भाद्रपदे यदि ।
स्यादभ्रगर्जितं विद्युत् सुभिक्षं पूर्णमादिशेत् ॥५६४॥

सप्तम्यां भाद्रमासस्य न विद्युत्र च गर्जितम्।
न च वृष्टिस्तदा नूनं तत्र दुष्कालसंभवः॥ ५६५॥
मूलचन्द्रार्कसंयुक्ता शुक्ला भाद्रपदेऽष्टमी।
तदा स्यात् पंचमे मासि शस्यसूत्रमहार्घता॥ ५६६॥
भाद्रशुक्ले चतुर्थेऽह्नि पंचमे सप्तमेऽष्टमे।
पूर्णिमायां च गर्भेण सद्यो मेघमहोदयः॥ ५६७॥
पञ्चमी सप्तमी वा स्याद्दिनैरेकार्णवा मही।
नवम्यां भाद्रमासस्य वृष्टौ दुष्कालसंभवः॥ ५६८॥
भाद्रशुक्लदशम्यां चेन्मूलर्क्षं रविवासरे।
दुर्भिक्षं स्यादृक्षान्यत्र तिथौ मूलरविः शुभः॥ ५६९॥
एकादश्यां तु भाद्रस्य सुभिक्षायाभ्रडम्बरः।
निशि गर्जति चेत्तत्र शलभोपद्रवस्तदा॥ ५७०॥
भाद्रस्य पूर्णिमायां तु यदी दुग्रहणं भवेत्।
मासद्वयेन तत्र स्याद्दौर्लभ्यं रसमूलयोः॥ ५७१॥
भाद्रकृष्णचतुर्थ्यां चेद्वार्क्षलान्यरुणोदये।
तदा क्षेमाय लोकानां वृष्टिः संजायते शुभा॥ ५७२॥
अमा भाद्रपदे मासे शनिवारे भवेद् यदि।
तदा समर्घता नास्ति क्वचिद् दुर्भिक्षसंभवः॥ ५७३॥
प्रतिपत् पंचमी भाद्रेऽमावस्या च त्रयोदशी।
आसु पूर्वोत्थितैर्मेघैर्वृष्टिः स्यात् पंचयोजना॥ ५७४॥

भाद्रे पश्चिमतो वायौ मेघाभावं विनिर्दिशेत् ।
मेघे तु सत्यनेकाहं झञ्झावृष्टिर्भविष्यति ॥ ५७५ ॥
भाद्रे सर्वदिशीनस्तु यदा वहति मारुतः ।
आगत्यागत्य चाक्रम्य गच्छेन्मेघो न वर्षति ॥ ५७६ ॥
सिंहार्कदिवसे वृष्टिर्न शुभाय परन्तु चेत् ।
दिनद्वयांतरे वृष्टिर्मेघो वा तर्हि न क्षतिः ॥ ५७७ ॥
भाद्रे वृष्ट्या चतुर्दश्यां वृष्ट्या संक्रमणेऽहनि ।
जायन्ते बहवो रोगा आश्विने न शुभं भवेत् ॥ ५७८ ॥

इति भाद्रमासः ।

आश्विनः ।

नापेक्षते गर्भसिद्धिं चतुर्थी पंचमी तिथिः ।
अहयोगवशादेवाश्विने वर्षति तच्छुभम् ॥ ५७९ ॥
चतुर्थ्यामपि पञ्चम्यामाश्विने शीघ्रगर्भता ।
पंचभिः सप्तभिर्वा स्याद्दिनैरेकार्णवा मही ॥ ५८० ॥
आश्विनस्थ चतुर्थ्यां चेदभ्रं स्यादरुणोदये ।
तदा क्षेमाय लोकानां शुभा वृष्टिः प्रजायते ॥ ५८१ ॥
अष्टम्यां च दशम्यां च प्रतिपद्याश्विने यदि ।
दृश्यतेऽभ्रघटा व्योम्नि न चिरात्तर्हि वर्षति ॥ ५८२ ॥
आदित्यास्तमने मेघाः पर्वताकारसंनिभाः ।
यदि स्युर्जलपातः स्यात्तस्मिन्नेव दिने तदा ॥ ५८३ ॥

आश्विनी सप्तमी शुक्लाष्टमी यदि जलान्विता ।
तदा तत्र सुभिक्षं स्यादित्याहुर्दैवचिन्तकाः ॥ ५८४ ॥
सप्तम्यामाश्विने शुक्ले शनिवारो भवेद्यदि ।
श्रवणं च धनिष्ठा च तदा दुर्भिक्षसंभवः ॥ ५८५ ॥
आश्विनस्य त्रयोदश्यां शनिवारो भवेद् यदि ।
यदि संक्रमणं तत्र तदा सस्याकुला मही ॥ ५८६ ॥
आश्विने पूर्णिमायां तु यदीन्दुग्रहणं भवेत् ।
प्रयांति सर्वधान्यानि द्विमासांते महार्घताम् ॥ ५८७ ॥
दीपोत्सवदिनेऽमायां शनिभौमार्कवासराः ।
स्वातीभं योग आयुष्मान् कालः प्रलयवत्तदा ॥ ५८८ ॥
दीपावली त्वमावास्या स्वातीयोगेन दुष्यति ।
गोक्रीडा चेद् विशाखायां जातं सस्यं विनश्यति ५८९
आश्विने शनिवक्रं स्याद् बुधो राश्यन्तरं व्रजेत् ।
शुक्रश्चास्तमनं याति तदान्नाप्लाविता धरा ॥ ५९० ॥
नक्षत्रे वा तिथौ गर्भयोगा उक्ताः शुभाशुभाः ।
यत्र वर्षे शुभाधिक्यं तत्रानन्दः प्रवर्तते ॥ ५९१ ॥

इत्याश्विनमासः ।

सिंहावलोकः ।

माघे हिमं न पतितं वातो वाति न फाल्गुने ।
चैत्रे नाभ्राणि वैशाखे करकापतनं यदि ॥ ५९२ ॥

ज्यैष्ठे चण्डातपस्तु स्यात्प्रावृट्काले तदागते ।
अतितुच्छा भवेद् वृष्टिरित्याहुर्दैवचिन्तकाः ॥ ५९३ ॥
आषे घनघटा नास्ति चैत्रे वर्षति वारिदः ।
तृतीया नाशया गर्जेत्तदानावृष्टिसम्भवः ॥ ५९४ ॥
माघे भवति चेदूष्मा ज्येष्ठे शैत्यं प्रवर्तते ।
श्रावणे शीतलो वायुस्तदानावृष्टिसम्भवः ॥ ५९५ ॥
न माघे पतितं शीतं ज्येष्ठे मूला न निर्घृणा ।
नार्द्रायां पतितं तोयं कालो दुष्टस्तदेष्यते ॥ ५९६ ॥
विद्यन्न स्पन्दते चैत्रे वैशाखोपक्रमे जलम् ।
अत्युग्रस्तपति ज्यैष्ठे तदात्यन्तं सुवृष्टयः ॥ ५९७ ॥
शैत्येन कम्पनं चैत्रे वैशाखे करकाझटी
ज्यैष्ठे चेन्निर्मलं व्योम तदा वर्षा भविष्यति ॥ ५९८ ॥
ऊष्मा पौषे च वैशाखे शैत्यं भवति चेत्तया ।
वृष्टिः स्यात्पूर्वमाषाढे न तु श्रावणभाद्रयोः ॥ ५९९ ॥
चैत्रे सितप्रतिपदि रेवत्यां बहुलं जलम् ।
वैशाखशुक्लप्रतिपद् भरण्यां तृणसम्भवः ॥ ६०० ॥
ज्यैष्ठशुक्लप्रतिपद् मृगे वातः शुभो भवेत् ।
आषाढशुक्लप्रतिपदादितो धान्यसम्भवः ॥ ६०१ ॥
तृतीया त्वक्षया ज्ञाक्षया ज्यैष्ठी मूलेन युज्यते ।
विजया दशमी श्रुत्या सुभिक्षायान्यथा क्षतिः ॥ ६०२ ॥

ज्यैष्ठे मूला विगलिता पूर्वाषाढा न गर्जिता ।
आषाढी मूलपूर्णा चेदवृष्ट्या पीड्यते जगत् ॥ ६०३ ॥
श्रावणी कार्तिकी पौषेऽमा तृतीया तु माघवी
विष्वग्विनिर्ऋतिब्रह्मवर्जिता न शुभावहाः ॥ ६०४ ॥
सप्तमी पञ्चमी शुक्ला तृतीया प्रतिपत् क्रमात् ।
माघी च फाल्गुनी चैत्री वैशाखी गर्भतः शुभाः ॥६०५॥
कार्त्तिकद्वादशीमार्गदशमी पौषपञ्चमी ।
माघी च सप्तमीत्येताः सिता अभ्रध्रुवा मता ॥ ६०६ ॥
वातोऽभ्रं गर्जितं विद्युद् वृष्टिर्वा तत्र जायते ।
वर्षत्येव तदाषाढे श्रावणे भाद्र आश्विने ॥ ६०७ ॥
दीपावल्यामुग्रवायुर्दीलिकायान्तु दक्षिणः ।
आषाढ्यां नैर्ऋतः सायं महादुर्भिक्षकारकः ॥ ६०८ ॥
यदि शुक्लत्रयोदश्यां चैत्रवैशाखफाल्गुने ।
धूमिकां जायते तर्हि देवस्तत्र न वर्षति ॥ ६०९ ॥
आश्विनी कार्तिकी माघी चैत्री ज्यैष्ठी च फाल्गुनी ।
श्रावणी पूर्णिमा सप्त निरभ्राः शुभदायिकाः ॥६१०॥
पौषी भाद्री च वैशाखी मार्ग्याषाढी च पूर्णिमा ।
धूमिका मेघविद्युद्भिः शुभवातैः शुभावहाः ॥ ६११ ॥

इति सिंहावलोकः ।

इति चान्द्रनाक्षत्रिकम् ॥

अथ रविनाक्षत्रिकम्।

मघाप्रवेशदिवसं त्यक्त्वाऽन्यत्रार्कसंचरे ।
वर्षणं हर्षणं नृणां कर्षणं फलदायकम् ॥ ६१२ ॥
आर्द्राप्रवेशकालेऽपि वर्षणं न शुभावहम् ।
सार्द्धमासं न वृष्टिः स्यात्ततः पश्चात् प्रवर्षति ॥ ६१३ ॥
शुभो नार्द्रा प्रवेशोर्कौ नवम्यामष्टमीतिथौ ।
चतुर्थ्यां च तृतीयायां चतुर्दश्यमयोरपि ॥ ६१४ ॥
यमाग्नीशा हि पित्रिन्द्र रक्षोवारि भवासरे ।
शुभो नार्द्रा प्रवेशोऽर्कः शेषभेषु शुभो मतः ॥ ६१५ ॥
दिनान्त्ययामादारभ्य रात्रियामत्रयं शुभम् ।
आर्द्राप्रवेशे सूर्यस्य शेषकालो न शोभनः ॥ ६१६ ॥
शुभो नार्द्रा प्रवेशोऽर्कौ दिवारात्रौ शुभावहः ।
शनिमंगलसूर्यान्यवारेषु शुभदो मतः ॥ ६१७ ॥
आर्द्राप्रवेशे वृष्टिश्चेत् सार्द्धमासप्रवर्षणम् ।
रविरार्द्रां जलैर्गच्छन् जलक्षयकारकः ॥ ६१८ ॥
हस्तार्कसंक्रमाद्वर्षा सर्वामीतिं निवारयेत् ।
स्वातीवृष्टिर्मौक्तिकानि निष्पादयति नीरधौ ॥ ६१९ ॥
रेवती जलनाशाय सस्यनाशाय चाश्विनी ।
भरणी सर्वनाशाय यदि वर्षेन्न कृत्तिका ॥ ६२० ॥

पतन्ति कृत्तिकासूर्ये ५ऽवपा अपि विन्दवः ।
पूर्वपश्चाद्भवान दोषान् निरस्य जनयन्ति शम् ६२१
भवन्ति कृत्तिकासूर्ये यदि चातिमहृष्टयः ।
तदा तु मध्यमं वर्षं दुर्भिक्षं वा समादिशेत् ॥ ६२२ ॥
यदि वा कृत्तिकासूर्ये विन्दुपातोऽपि नो भवेत् ।
तदापि मध्यमं वर्षमवर्षं वा समादिशेत् ॥ ६२३ ॥
कृत्तिकायां रवौ दृष्टी रोहिण्या मबलातपः ।
मृगाद्ये वायुसंरोधो मृगान्ते वायुसंचरः ॥ ६२४ ॥
आर्द्रायां विन्दुपातः स्यादप्रचण्डोऽनिलो यदि ।
पुनर्वसौ वायुरोधः सुदृष्टेर्लिंगमिष्यते ॥ ६२५ ॥
न कृत्तिकायां नार्द्रायां विन्दुपातो भवेद्यदि ।
न रोहिण्यामातपोष्मा मृगशीर्षे न वायवः ॥ ६२६ ॥
रोहिण्यां वायवो वांति देवो वा तत्र वर्षति ।
मृगशीर्षे त्वातपोष्माथार्द्रायां वांति वायवः ॥ ६२७ ॥
कृत्तिकायामातपोष्मा रोहिण्यां यदि गर्जति ।
एतैर्निमित्तैस्तद्देशे दुर्भिक्षं प्रबलं भवेत् ॥ ६२८ ॥
रोहिण्यर्के न वायुः स्यन्नाभ्रं विद्युन्न गर्जति ।
तदार्द्रायां शुभा वृष्टिर्नक्षत्रेषूत्तरेष्वपि ॥ ६२९ ॥
रोहिण्याश्चतुरः पादा नातपन्ति खराः कराः ।
निश्चितं चतुरो मासान प्रवर्षन्ति पयोधराः ॥ ६३० ॥

रोहिण्यां यदि वृष्टिः स्याद्विन्दुपातोऽपि वा भवेत् ।
अवग्रहस्तदावश्यमुत्तरत्र प्रजायते ॥ ६३१ ॥
रोहिण्यर्के विद्युता च प्रतप्ता उन्नता घनाः ।
श्लेषार्के पुनरागत्य वर्षंति न ततः पुरा ॥ ६३२ ॥
रोहिण्यर्के तु वर्षं चेत्ततो द्यौर्याति शून्यताम् ।
द्वासप्ततिदिनान्यत्र संभविष्यत्यवग्रहः ॥ ६३३ ॥
रोहिण्यर्के विन्दुपातो वृष्टिरप्यशुभं दिशेत् ।
सरित्प्रवाहिका त्वेषा वर्षा नात्र विदूषिता ॥ ६३४ ॥
रोहिण्यर्के त्वनेकाहं विद्युतो वृष्टयो यदि ।
द्वासप्तत्यन्तरेऽपि स्युर्वृष्टयो न त्ववग्रहः ॥ ६३५ ॥
आद्यः पादो जलं हंति द्वासप्ततिदिनानि तु ।
परस्तृणं तृतीयस्तु चतुर्थो याति सागरम् ॥ ६३६ ॥
रोहिणी भानुभोग्येषु त्रयोदशदिनेष्वपि ।
यत्र यत्र भवेद् वृष्टिस्ततोऽवग्रहचिन्तनम् ॥ ६३७ ॥
रसैर्नभैर्धवै रावैर्धूलैर्भालैः पलैर्नलैः ।
हरैर्भरैः करैस्तापैरयैर्वृष्टिर्न वासरैः ॥ ६३८ ॥
कृत्तिकार्कस्य तपनाद् रोहिण्यर्कस्य गर्जनात् ।
मृगान्त्यचरणस्तम्भाद्रार्द्रावाताद् तृणक्षयः ॥ ६३९ ॥
मृगान्त्यचरणे नास्ति वायुर्वर्षति रोहिणी ।
तदा वदंति दैवज्ञा न विद्युन्नापि गर्जितम् ॥ ६४० ॥

मृगस्य प्रथमे पादे न सञ्चरति मारुतः ।
तदाभ्रं श्रावणे मासि दिवसान् दश गर्जति ॥ ६४१ ॥
मृगान्त्यचरणे वायुस्तम्भश्चोष्मा च वर्तते ।
निर्जलाः श्रावणे मासि तदा षोडश वासराः ॥६४२॥
मृगशीर्षे तपतु वा रोहिण्यां वान्तु वायवः ।
आर्द्रायां यदि वृष्टिः स्यात्सर्वानंदः प्रवर्तते ॥ ६४३ ॥
आश्लेषामागतो भानुर्यदि वृष्टिं न मुञ्चति ।
मघादिपञ्चनक्षत्रेष्वसौ दास्यत्यलं जलम् ॥ ६४४ ॥
इत्थं गर्भध्रुवा उक्ता एते द्वादशमासिकाः ।
भवारतिथिसंक्रांतिसंक्रांता वर्षपूरकाः ॥ ६४५ ॥

इति मधुसूदनविद्यावाचस्पतिप्रणीतायां कादम्बिन्यां
द्वादशमासिकोऽध्यायो द्वितीयः ।

अथ निमित्तध्यायः ।

वैकारिका गर्भरूपाण्युल्का रविकरा अपि ।
प्रकीर्णकाश्च पञ्चैते विकारा दिवि सर्गजाः ॥ १ ॥
वाताद्याः खपुराद्याश्च सन्ध्याद्याः कुलिशादिकाः ।
ग्रहणाद्या विकाराः खे जलदोषांशुशंकजाः ॥ २ ॥
एषां प्रभेदा उच्यन्ते नाम रूपं च कर्म च ।
यैर्विशेषा विधीयन्ते प्रतिवर्षं प्रवर्षणे ॥ ३ ॥

गर्भरूपम् ।

गर्भरूपाणि वाताभ्रविद्युत्स्तनितवृष्टयः ।
एषां भेदा महावातझञ्झावातादयः पृथक् ॥ ४ ॥

वातः ।

पूर्वोऽभ्रजननो वायुरितरोऽभ्रविनाशनः ।
उत्तरो वृष्टिजनको वर्षत्येव च दक्षिणः ॥ ५ ॥
वातस्त्रिधा भावकश्च स्थापको ज्ञापकस्तथा ।
अभ्राद्युत्पादयेदाद्यो दिवि संचारयेत् परः ॥ ६ ॥
ज्ञापको भाविनीं वृष्टिं पूर्वमेव निवेदयेत् ।
आद्यस्तु वृष्टिं तत्काले कुर्यात्कालांतरेऽपि वा ॥ ७ ॥
सूर्यचन्द्रकुजादीनां ज्योतिर्भिर्भैश्च योगतः ।

भवेदुत्पातको वायुर्गर्भप्रसवकालयोः ॥ ८ ॥
आर्तवो निपतो वायुः स्थापकः स्थापयेद्दिवि ।
समुद्रादुत्थितं तोयं दोषाद् व्यभिचरत्यपि ॥ ९ ॥
ज्ञापका धारणाकाले ये चोक्ता गर्भमासिके ।
तिथिसम्बन्धजा वाता इत्थं वातस्त्रिधोदितः ॥ १० ॥

उत्पादकः ।

करकायास्तुषारस्याम्बुनो वा वर्षणं क्वचित् ।
प्रचण्डवायुना विद्यादर्वाक् क्रोशचतुःशतात् ॥ ११ ॥
पूर्वतो दक्षिणात् पश्चादुत्तरादुग्रमारुतः ।
याम्ये च वारुणः सौम्ये शाक्रे वर्षणतः क्रमात् ॥ १२ ॥
पूर्वस्यामथवोदीच्यां पवनः शीघ्रवृष्टये ।
दक्षिणस्यां वृष्टिनाशं पश्चिमायां विलम्बकृत् ॥ १३ ॥
आग्नेयो विग्रहं वह्निभयं वृष्टिविघातनम् ।
नैर्ऋतः पवनो यावत्तावत्कुर्यान्महातपम् ॥ १४ ॥
वायव्यो वायुः कुरुते वृष्टिं पवनसंयुताम् ।
पतंगदंशमशकक्षुद्रजन्तुसमुद्भवम् ॥ १५ ॥
ऐशानः पवनो विश्वहिताय जलवृष्टये ।
आनन्दं वर्धयत्येवं वायुचक्रमिदं मतम् ॥ १६ ॥
आग्नेयो न कदापीष्ट ऐशानः सर्वदा शुभः ।
नैर्ऋतः कुरुते रोगं दुर्भिक्षं विग्रहं भयम् ॥ १७ ॥

सगर्जितान् सविद्युत्कान् महतोऽपि घनाघनान् ।
वाता नूनं विनिघ्नंति नैर्ऋताग्नेयदक्षिणाः ॥ १८ ॥
सौम्यं निवर्त्य शाक्रश्चेत् पञ्चाहाद् वृष्टयः परम् ।
शाक्रं निवर्त्य याम्यश्चेद् वृष्टयः स्युस्त्रयहोत्तरम् ॥ १९ ॥
निवर्त्य वारुणं वायुर्नैर्ऋतः संचरेदिति (द् यदि) ।
तदातिवायवो घ्नन्ति जलमल्पं च वर्षति ॥ २० ॥
दिग्भ्यो वहति सर्वाभ्यो यदि वायुर्यदा तदा ।
तदा वदन्ति दैवज्ञा अत्यल्पं वर्षति क्वचित् ॥ २१ ॥
न कुण्डलं न च धनुर्वायुश्चेत् सर्वदिग्भवः ।
दूरदेशांतरोद्भूतां स घटामानयिष्यति ॥ २२ ॥

स्थापकः ।

हेमन्ते दक्षिणो वायुः शिशिरे नैर्ऋतः शुभः ।
वसन्तः वारुणः श्रेष्ठः फलं शरदि वारुणात् ॥ २३ ॥
शरत्काले पूर्ववायुः वसन्ते चोत्तरानिलः ।
विहन्ति फलपुष्पाणि न पोषस्तेषु जायते ॥ २४ ॥
आषाढे चाश्विने वृष्टिं पश्चिमः कुरुते दृढम् ।
श्रावणे तूत्तरो वायुः पूर्वो भाद्रपदेऽनिलः ॥ २५ ॥
आषाढे यदि वायव्यः कदाचित्तत्र चोत्तरः ।
श्रावणे पुनरैशानस्तदा भाद्रे न वर्षति ॥ २६ ॥

आषाढे यदि वायव्यः श्रावणे यदि पूर्वजः ।
भाद्रे पश्चिमतो वाति स्यात्तदान्नमहार्घता ॥ २७ ॥
आषाढे दक्षिणो वायुः श्रावणे यदि पूर्वतः ।
भाद्रे तूत्तरतो याति जलं तर्हि न वर्षति ॥ २८ ॥
आषाढे नैर्ऋतो वाति श्रावणे वाति दक्षिणः ।
आश्विने यदि चाग्नेयः क्षेत्रं सस्यं स शोषयेत् ॥२९॥
श्रावणे नैर्ऋतो वायुर्भाद्रे वहति दक्षिणः ।
आश्विने पूर्वदायुश्चेत् क्षेत्रं सस्यं विशुष्यति ॥ ३० ॥
श्रावणे यदि चाग्नेयो भाद्रे वहति नैर्ऋतः ।
न वर्षेदथ वर्षेच्चेन्न विद्युन्नापि गर्जितम् ॥ ३१ ॥
श्रावणे चाग्निको वायुर्भाद्रे नैर्ऋत्यतो यदि ।
मेघा आलम्ब्य वर्षति विद्युद्गर्जितवर्जितम् ॥ ३२ ॥
श्रावणे पश्चिमो वायुर्भाद्रे वहति नैर्ऋतः ।
आश्विने पूर्वतो वाति फलं पुष्पं च नश्यति ॥ ३३ ॥
भाद्रे पश्चिमतः वायौ याति मेघो न वर्षति ।
बहून् वा दिवसांस्तत्र घटाटोपेन वर्षति ॥ ३४ ॥
भाद्रे वहति सर्वासु वायुर्दिक्षु विदिक्षु वा ।
अपि मेघघटाटोपं स तत्र विलयं नयेत् ॥ ३५ ॥
श्रावणे यदि वायव्यो भाद्रे वहति पूर्वतः ।
आश्विने पश्चिमो वाति कार्तिके सस्यसिद्धयः ॥ ३६ ॥

मेघः ।

धराधरो जलधरो वारिवाहो बलाहकः ।
अम्बुभृद् वारिदो मेघो जीमूतो मुदिरो घनः ॥ ३७ ॥
जलमुग् जलदो न भ्राडब्दोनदनुरम्बुदः ।
धूमयोनिः पयोगर्भस्तडित्वांस्तनयित्नुकः ॥ ३८ ॥
धूमाग्निमरुदंबूनां संघातो मेघ उच्यते ।
मेघस्थितिश्चतुर्धाभ्रं वार्दलं च घनो घटा ॥ ३९ ॥
अभ्रं नभः प्रसारि स्याद् घनखण्डं तु वार्दलम् ।
घनस्तु प्रसृताः खण्डा अखण्डा प्रसृता घटा ॥ ४० ॥
मेघश्चतुर्विधो नागः पर्वतो वृषभोऽर्बुदः ।
नागशैलगजाभ्राणां योनिरेकैव तूदकम् ॥ ४१ ॥
हिमवृष्टिन्तु कुर्वंति शीतकाले हि दिग्गजाः ।
पुष्करावर्तसंवर्तद्रोणाः स्युर्मेघजातयः ॥ ४२ ॥
पुष्करो दुष्करोदः स्यादावर्तो निर्जलो घनः ।
बहूदकस्तु संवर्तो द्रोणः सस्यप्रपूरकः ॥ ४३ ॥
अग्निर्ब्रह्म च पक्षं च त्रिविधा मेघयोनयः ।
एषामाप्यायनं धूमः सर्वेषामविशेषतः ॥ ४४ ॥
अग्निजा ऊष्मजा मेघा स्विन्नजा गर्भजाश्च ते ।
धूमैः प्रवर्तिताश्चेषु श्रेष्ठा दुर्दिनवातजाः ॥ ४५ ॥

मातंगैर्महिषैः कोलैः सदृक्षाः क्षितिमागताः ।
विपिने पर्वताग्रे च वर्षंति विचरन्ति च ॥ ४६ ॥
मृदुसेका महाकायाः प्रत्यासन्नाश्च ते भुवः ।
क्रोशार्द्धे क्रोशमात्रे वा वर्षन्त्यवहुदूरतः ॥ ४७ ॥
खयोगाच्च भयोगाच्च ग्रहयोगाच्च सम्भवः ।
येषां ते ब्रह्मजा मेघा अग्निजादूर्ध्वखं गताः ॥ ४८ ॥
धारासाराः प्रवर्षंति प्रदेशे वहुयोजने ।
अग्निजा अपि वर्षंति ब्रह्मजानां प्रसंगतः ॥ ४९ ॥
गोत्रविच्छिन्नपक्षा ये पर्वतास्ते तु पक्षजाः ।
अनेकरूपसंस्थाना महाघोरस्वनाश्च ते ॥ ५० ॥
युगान्ते चातिवर्षंति पूरयन्तो महीं जलैः ।
कल्पांतदृष्टेः स्रष्टारः संवर्ताग्नेर्नियामकाः ॥ ५१ ॥
अतिवातं च निर्वातमत्युष्णमतिशीतलम् ।
अत्यभ्रं च निरभ्रं च षड्विधं मेघलक्षणम् ॥ ५२ ॥
आषाढी रोहिणी स्वाती योगे द्वादशमासिके ।
मेघे विशेषा आख्याता यत्परं तदिहोच्यते ॥ ५३ ॥
भानुत्यक्ता तदाक्रान्ता तदेष्या दीप्तदिङ्मता ।
इतरास्तु दिशः पञ्च शान्ता इत्यभिचक्षते ॥ ५४ ॥
श्यामो रक्तोऽथवा पीतः शान्तायां दिशि दृश्यते ।
स्निग्धो मन्दगतिर्मेघस्तदा विद्याज्जलागमम् ॥ ५५ ॥

शुक्लवर्णास्तु यो मेघः शान्तायां दिशि दृश्यते ।
स्निग्धो मन्दगतिश्चापि निवृत्तः स जलावहः ॥ ५६ ॥

स्निग्धवर्णास्तु ये मेघाः स्निग्धनादा भवन्ति ये ।
मन्दगाः सुमुहूर्ताश्च ते सर्वत्र जलावहाः ॥ ५७ ॥

मेघाः सुविद्युदाक्रान्ताः सुगन्धाः सुस्वराश्च ये ।
सुवेषाश्च सुवाताश्च सुधाराश्च सुभिक्षदाः ॥ ५८ ॥

रूक्षा वातं प्रकुर्वन्ति व्याधींश्चानिष्टगन्धिनः ।
कृशाब्दाश्च विवर्णाश्च मेघा वर्षं न कुर्वते ॥ ५९ ॥

कुङ्कुमोदकसंकाशो नीलो वाञ्जनसप्रभः ।
याम्यातोऽग्निदिशं गच्छन् मेघस्तत्रैव वर्षति ॥ ६० ॥

रक्तपीतोऽथवा नीलो दक्षिणादुत्तरां व्रजन् ।
मेघः क्षिप्रं सर्ववातं कृत्वा पश्चात् प्रवर्षति ॥ ६१ ॥

दक्षिणादुत्तरां गच्छेदुत्तरादपि दक्षिणाम् ।
न वर्षति तदा यद्वाऽनेकाहं स प्रवर्षति ॥ ६२ ॥

पश्चिमेन यदा मेघाः कोणं गच्छन्ति चञ्चलाः ।
अल्पोदका भवन्त्येते ततो वृष्टिर्न जायते ॥ ६३ ॥

पश्चिमेन यदा मेघा आगच्छन्ति समाकुलाः ।
वातवृष्टिं तदा कृत्वा जलवृष्टिं प्रकुर्वते ॥ ६४ ॥

पश्चिमाद्वा गच्छति प्राचीं प्राच्या गच्छति पश्चिमाम् ।
परस्पराहतो मेघो दिनानि दश वर्षति ॥ ६५ ॥

प्रशान्तार्तववाताया दिशो यांति शनैर्दिशि ।
उद्दामार्तववातायां धवला अभ्रपर्वताः ॥ ६६ ॥
उद्दामार्तववाताया दिशो यांति शनैर्दिशि ।
प्रशान्तार्तववातायां तूलपुञ्जनिभा घनाः ॥ ६७ ॥
तूलपुञ्जनिभाः मेघा वायव्योत्तरतो यदि ।
वेगादायांति ते नूनं यामेष्वष्टसु वर्षति ॥ ६८ ॥
तूलपुञ्जनिभा मेघा याम्यनैर्ऋत्यतो यदि ।
आयांति तर्हि करका शीते वर्षासु वर्षति ॥ ६९ ॥
तमालाञ्जननीलाञ्जप्रभामौक्तिकरौप्यभाः ।
गर्भे जलचराकारा वारिदा बहुवारिदाः ॥ ७० ॥
पुराकारा द्रुमाकारा जन्त्वाकाराश्च वारिदाः ।
तद्विकारास्तु खपुराभ्रवृक्षपरिघादयः ॥ ७१ ॥

विद्युत् ।

विद्युत् क्षणप्रभा मेघप्रभा वीणाऽचिरप्रभा ।
ह्रादिन्यैरावती चम्पा शम्पा सौदामिनी तडित् ॥७२॥
आकालिकी शतावर्ता जलदा जलपालिका ।
क्षणांशु क्षणिका राधा चटुला चिकमीलिका ॥ ७३ ॥
सर्जूरचिररोचिश्च चपला चञ्चला चला ।
शतह्रदाऽशनिर्नीलांजना च तटिदस्थिरा ॥ ७४ ॥
ऐन्द्री जलप्रदा विद्युदाग्नेयी जलनाशिनी ।

दक्षिणोत्था स्वल्पजला नैर्ऋत्या डमरप्रदा ॥ ७५ ॥
प्रभूतजलदा सर्वसस्यदा पश्चिमोत्थिता ।
वातं करोति वायव्या कौवेरी जलवर्षिणी ॥ ७६ ॥
शीघ्रवृष्टिकृदैशानी दिग्यं वैद्युतलक्षणम् ।
यत्र देशे सुभिक्षं स्याद् विद्युत् तत्रैव गच्छति ॥ ७७ ॥
उत्तरस्थां यदा विद्युत् स्वर्णवर्णां प्रदीप्यते ।
साक्षय्यं जलदा ज्ञेया शीघ्रं मेघमहोदयः ॥ ७८ ॥
स्निग्धेष्वभ्रेषु संप्राप्या स्निग्धा विद्युज्जलावहा ।
कृष्णा तु कृष्णमार्गस्था वातवर्षावहा भवेत् ॥ ७९ ॥
स्निग्धा रश्मिवती विद्युद्धरिता हरितप्रभा ।
दक्षिणा दक्षिणावर्ता कुर्य्यादुदकसंप्लवम् ॥ ८० ॥
रश्मिभिर्भासयन्ती गां या स्यादपरदक्षिणा ।
हरिताऽतिरोमा च सोदकं बहु वर्षति ॥ ८१ ॥
विद्युच्चरति या नूनमपरेणोत्तरामुखी ।
कृष्णाभ्रसंस्थिता स्निग्धा सापि कुर्य्याज्जलागमम् ८२
श्वेता पूर्वोत्तरा विद्युद्दक्षिणास्यां प्रधावति ।
तिर्यगूर्ध्वं च चरति सापि कुर्याज्जलागमम् ॥ ८३ ॥
अधश्चोर्ध्वं च चरति स्निग्धा रश्मिवती भृशम् ।
अघोषा वा सघोषा वा विद्युत् सर्वत्र वर्षति ॥ ८४ ॥
नीला ताम्रा गौरवर्णा श्वेता वाऽभ्रान्तरं चरेत् ।

मन्दघोषातिघोषा वा कुर्यादुदकसंप्लवम् ॥ ८५ ॥
वाताय कपिला विद्युदातपाय तु लोहिता।
पीता वर्षाय विज्ञेया दुर्भिक्षायासिता भवेत् ॥ ८६ ॥
विद्युतो न च वर्षन्ति श्यामास्ताम्रा हिमर्तुषु।
रक्ताः पीताश्च शिशिरे नीलाः श्वेता वसन्तके ॥८७॥
हरिन्मधुनिभा ग्रीष्मे या रूक्षा याश्च निश्चलाः।
वर्षासु ताम्राश्च गौराश्च नीलाः शरदि निर्जलाः ८८
अभ्रेषु रक्ता रक्तेषु हरिता हरितेषु च।
नीला नीलेषु वर्षंति विद्युतस्ताः स्वयोनिजाः ॥८९॥
(स्विष्टयोनिषु)
महामेघेतरे मेघा न वर्षन्ति जलं बहु।
न गर्जन्ति च ते जातु विना विद्युद्विकाशतः ॥ ९० ॥
मुसलो गजनीलश्च दुन्दुभिः क्रमपार्थिवौ।
पर्जन्यो माधवो धाता महामेघाः प्रकीर्तिताः ॥ ९१ ॥
विद्युतं नानुरुन्धन्ति न वा गर्जन्ति तेऽधिकम्।
सकृत् प्रवर्षणादेव प्लावयन्ति जगज्जलैः ॥ ९२ ॥

गर्जितम्।

मेघाद् वज्राच्च वाताच्च शब्दश्चेधाऽन्तरिक्षजः।
गर्जितं स्तनितं मेघनिर्घोषो रसितं च तत् ॥ ९३ ॥

आप्तभाषितवत् सत्यं प्रभाते देवगर्जितम् ।
यामद्वयेन वर्षा वा वातो वा जायते ध्रुवम् ॥ ९४ ॥

वृष्टिः ।

आदित्यरश्मिभिः पीतं जलमभ्रेषु तिष्ठति ।
पुनः पतति तद् भूमौ पूर्यन्ते तेन चार्णवाः ॥ ९५ ॥
(कौर्मे-उपरिभागे ४२ अ०)

तेजो हि सर्वभूतेभ्य आदत्ते रश्मिभिर्जलम् ।
साम्बुद्रादम्भसो योगाद्रश्मयः प्रवहन्त्यपः ॥ ९६ ॥
(ब्रह्माण्डे)

ततोऽयनवशात् काले परावृत्तो दिवाकरः ।
नियच्छति पयो मेघे शुक्लाशुक्लैर्गभस्तिभिः ॥ ९७ ॥

अभ्रस्थाः प्रपतन्त्यापो वायुना समुदीरिताः ।
भ्रमिष्यंति यथा चापस्तदन्तं कवयो विदुः ॥ ९८ ॥
(ब्रह्माण्डे)

तीव्रार्ककिरणोत्तप्ता जलदा मन्दमारुताः ।
प्रावृट्कालेऽभिवर्षन्ति धाराभी रुषिता इव ॥ ९९ ॥

यदि प्रभातसमये पतंति जलविन्दवः ।
तदा यामे चतुर्थे वा पंचमे वा प्रवर्षति ॥ १०० ॥

अद्यस्तमनवेलायां पतंति जलविन्दवः ।
तदाऽहनि चतुर्थे वा पञ्चमे वा प्रवर्षति ॥ १०१ ॥

क्षारं वा कटुकं वापि दुर्गन्धं सस्यनाशनम् ।
यत्र वर्षति देशोऽसौ कृषिनाशाद् विनश्यति ॥ १०२॥
सुभिक्षं जायते वृष्टौ मत्स्यमण्डूकवर्षणात् ।
शङ्खशम्बूककर्कठीवृष्टौ दुर्भिक्षमादिशेत् ॥ १०३ ॥
भिन्नवर्णवृत्तप्रभृतयो वृष्टेरष्टौ विशेषकाः ।
पुरो वातादिभिर्भेदे कृत्स्ना योगविशेषजाः ॥ १०४ ॥
धारासम्पात आसारः सीकरोऽम्बुकणाः स्मृताः ।
द्रप्सः स्तोकः पृषद्बिन्दुः पृषतो विप्रुडित्यपि ॥ १०५ ॥
वृष्टिर्विष तद्विघातेऽवग्रहावग्रहौ समौ ।
करका हिमपातश्च वृष्टेरेवापरा विधा ॥ १०६ ॥

इति वातादिगर्भरूपाधिकारः ।

वैकारिकाधिकारः ।

खपुरं शाखि परिधौ निर्घातः करका हिमम् ।
वैकारिका इमे भावा जीमूतादिप्रभेदजाः ॥ १०७ ॥

खपुरम् ।

अनेकवर्णाकृतिकं पताकाध्वजतोरणैः ।
युक्तं गन्धर्वनगरं पुरवत् खे प्रकाशते ॥ १०८ ॥

शुभ्रैरभ्रैर्यदा मिश्रं सविद्युत्सघलाहकम् ।
गन्धर्वनगरं स्निग्धं तदा विद्याज्जलागमम् ॥ १०९ ॥
कपिलं सस्यनाशाय मांजिष्ठं पशुघातकम् ।
अव्यक्तवर्णं कुरुते बलक्षोभं विदुर्बुधाः ॥ ११० ॥

अभ्रतरुः ।

शाखी खशाखी खतरुरभ्रतर्वादयोऽपि च ।
दिवि द्रुविटपाकारे मेघे शब्दा उदाहृताः ॥ १११ ॥
नीलो दधिवदग्रोऽर्कच्छादी शाखी खमध्यगः ।
घनमूला घनाः पीतच्छुरिता भूरिदृष्टिदाः ॥ ११२ ॥

परिघः ।

परिघस्तु तिरश्चीना मेघरेखाऽभ्रणोपरि ।
ह्रस्वा वा यदि वा दीर्घा सिता वा यदि वाऽसिताः ॥
राजान्तं परिघः श्वेतः शोणः सैन्यप्रकोपनम् ।
बलवृद्धिं सुवर्णाभः करोत्यर्कोदयोत्थितः ॥ ११४ ॥

निर्घातः ।

स्फूर्जथुर्वज्रनिर्घोषो निर्घातोऽनभ्रगर्जितम् ।
अनभ्रगर्जितं याति यस्यां दिशि विहंति ताम् ॥११५॥
गगनादवनौ यातिः पवनः पवनाहतः ।
घोरं नादं प्रकुर्वाणः स निर्घात इतीर्यते ॥ ११६ ॥

करका ।

धाराङ्कुरो, राधरङ्कुवर्षोपलघनोपलाः ।
मेघोपलश्च मेघास्थि मटची पुंजिकापि च ॥ ११७ ॥
वीजोदकं घनकफो वार्चरः करकापि च ।
भूपसा करकापाते दुर्भिक्षं तत्र जायते ॥ ११८ ॥

हिमम् ।

हिमं चतुर्विधं दृष्टं प्रालेयं च तुषारकः ।
धूमिका चाप्यवश्यायस्तेषां सूक्ष्मं परं परम् ॥ ११९ ॥
जले तु कठिने भूते प्रालेयं तुहिनं समम् ।
मेरुप्रांते हिमाद्रौ च करकादौ च दृश्यते ॥ १२० ॥
स्ववर्षणांते करकावर्षणांते द्व्यहं त्र्यहम् ।
योत्यर्थकम्पनो वृक्षान्नाशयेत् स तुषारकः ॥ १२१ ॥
प्रातःकाले विशेषेण धूमिका पौषमाघयोः ।
क्षिणोत्यर्कंकरं सर्वमावृणोति च धूमवत् ॥ १२२ ॥
कुहिढश्च कुहेडिश्च कुहेलिश्च कुहेलिका ।
नभोरेणुः कुज्झटिका कुज्झटिः कुज्झटी च सा १२३
धूमिका धूममहिषी स्तान्धीति च कथ्यते ।
सा चात्यर्थघनीभूतावश्यायपतनोद्भवा ॥ १२४ ॥
प्रतिवासरमुत्थाय क्षुद्रक्षुद्रा अपां कणाः ।
प्रतिरात्रं प्रवर्षंति सोऽवश्याय इतीर्यते ॥ १२५ ॥

इति खपुरादिवैकारिकाधिकारः ।

रविकराधिकारः ।

सन्ध्या च कुण्डलं शक्रायुधं दण्डस्त्रिशूलकम् ।
मत्स्यो मेघश्च सप्तैते विकारा रविरश्मिजाः ॥ १२६ ॥

सन्ध्या ।

सन्ध्या भवत्यहोरात्रसन्धिस्था नाडिकद्वयी ।
नाडी त्रयी वा यावद्वा ज्योतिषां दर्शनं भवेत् ॥ १२७ ॥
सन्ध्यायां सुरभिः शीतो मृदुश्चरति मारुतः ।
शुभाय विमलं व्योम दिशः पद्मारुणप्रभाः ॥ १२८ ॥
द्योतयन्ती दिशः सर्वा यदि सन्ध्या प्रदृश्यते ।
महामेघोदयं विद्याद् वृष्टिस्तर्हि भविष्यति ॥ १२९ ॥
वैडूर्याम्बुजकिंजल्कप्रभा कुवलयप्रभा ।
सन्ध्या करोति निर्वाता वृष्टिं सद्योऽर्कभासिता ॥१३०॥
मत्स्यामोघपरीवेषपरिधीन्द्रायुधादिभिः ।
स्निग्धै रविकरैर्वृष्टिरदृष्टौ रूक्षवैकृतैः ॥ १३१ ॥
सायं सन्ध्या सहाभोघा प्रातः सन्ध्या समत्स्यका ।
मेघयोगोऽयमन्यर्थो वृष्टिस्तत्र भविष्यति ॥ १३२ ॥
दुष्टाकृतिघनैर्धूमैर्नीहारैः पांसुभिः पुरैः ।
सन्ध्या करोत्यनावृष्टिमकाले शस्त्रकोपनम् ॥ १३३ ॥

शोणा पीता सिता चित्रा पद्माभा शोणितप्रभा ।
शिशिरादिषु सन्ध्येयं स्वर्तुमकृतितः शुभा ॥ १३४ ॥
पूर्वेण यदि सन्ध्यायां मेघैराच्छाद्यते नभः ।
महिषोष्ट्रवराहाभैर्वृषकुञ्जरपर्वतैः ॥ १३५ ॥
पंचरात्रे तदा सप्तरात्रे वा तत्र वर्षति ।
ऐशान्यामीदृशैर्मेघैरर्धरात्रेण वर्षति ॥ १३६ ॥
उत्तरे यदि सन्ध्यायां दृश्यते गिरिमालिका ।
तृतीये दिवसे तर्हि तत्र वृष्टिर्भविष्यति ॥ १३७ ॥
वायव्ये तादृशैर्मेघैर्वातवृष्टिरहर्निशम् ।
सप्ताहं वा त्र्यहं वृष्टिः पश्चिमे गिरिमालया ॥ १३८ ॥
दक्षिणे तादृशैर्मेघैः कोटिनारसमप्रभैः ।
त्रिरात्रं पञ्चरात्रं वा सप्तरात्रं प्रवर्षति ॥ १३९ ॥
आग्नेय्यामीदृशैर्मेघैः सन्ध्याकाले समुत्थितैः ।
तस्यामेव ध्रुवं रात्रौ तत्र वर्षा भविष्यति ॥ १४० ॥
सायं बहुपुटास्तुल्याः केकिचाषजपाशुकैः ।
जलजन्तूर्मिगिरिभिर्वर्षंति न चिराद् घनाः ॥ १४१ ॥
वृष्ट्यै वीरणगुल्माभैर्मेघैः शान्तदिगुद्भवैः ।
सितैः सितान्तैः सव्येन भवेदावरणं रवेः ॥ १४२ ॥
गजाश्वपर्वतच्छत्रध्वजरूपा घनाः शुभाः ।
पलालधूमभाः स्निग्धा बलवृद्ध्यै तु सन्ध्ययोः १४३

पुराकृशा द्रुमाकाराः खरारुणविकाशिनः ।
भवंति शुभदा मेघाः सन्ध्ययोः सुविलम्बिनः ॥१४४॥

कुण्डलम् ।

परिधिः परिवेषश्च कुण्डलं द्विविधं मतम् ।
प्रत्यर्कः प्रतिचन्द्रश्च द्विविधः परिधिर्भवेत् ॥ १४५ ॥

प्रत्यर्कपरिधिः ।

प्रतिसूर्यः समः स्निग्धः स्वर्तुवर्णः प्रशस्यते ।
वैदूर्याभः सितः स्वच्छः सुभिक्षं क्षेममावहेत् ॥१४६॥
रवेरुत्तरगो वृष्टिं वायुं दक्षिणगस्तथा ।
उभयस्थो जलत्रासं करोति प्रतिसूर्यकः ॥ १४७ ॥
बिम्बान्वितौ तु परिधी रवेरुभयपार्श्वगौ ।
बहुतोयौ निर्जलस्तु सर्वदिक्परिवस्थितः ॥ १४८ ॥

परिवेषः ।

रवेरिन्दोः करा व्योम्नि वायुना प्रतिमूर्च्छिताः ।
क्षुद्मेऽभ्रे मण्डलीभूताः परिवेषाख्यया मताः ॥१४९॥
ताराग्रहाणां ताराणां परिवेषाश्च तत्समाः ।
चातुर्मास्ये तु वर्षर्तौ परिवेषा जलप्रदाः ॥ १५० ॥
ते च रक्ताः सिता नीलाः कापोताः पाण्डवोऽभ्रवत् ।
मेचका शबलाः कृष्णा दिग्गीशैः संकरा अपि ॥१५१॥

रक्ताः नीलाः पांडुराश्च कपोताभ्रापि कापिलाः ।
पीताः शुक्राभा वर्षाय प्रागादिष्विति नारदः ॥१५२॥
चापैर्मयूरै रजतैस्तैलैः क्षीरैर्जलैः समाः ।
शिशिरादिस्वकालोत्था वृत्ताः स्निग्धाः शुभायते १५३
एकेनैव सवर्णेन युक्तः स्निग्धः सुविस्तृतः ।
क्षुराभ्रकयुतः स्वर्तौ सद्यो वर्षं करोति सः ॥ १५४ ॥
सर्वाकाशपरिव्यापी नैकाभः शोणितप्रभः ।
रूक्षः पापाय संभग्नधनुः शकटवत् स्थितः ॥ १५५ ॥
परिवेषो मन्दफलो यो विलीनो मुहुर्मुहुः ।
मयूरगलतुल्याभो बहु वर्षं करोति सः ॥ १५६ ॥
शुभास्तु कपिलाः स्निग्धाः क्षीरतैलांबुसंनिभाः ।
चापशृंगाटकरथक्षतजाभारुणाः शुभाः ॥ १५७ ॥
(नारदः)

ग्रहर्क्षं मण्डलान्तःस्थे त्र्यहेण स्यात् प्रवर्षणम् ।
क्षुद्रधान्यक्षयो वातवृष्टिर्मण्डलगे शनौ ॥ १५८ ॥
दुर्भिक्षं मण्डले शुक्राद् वृष्टिः सस्यक्षतिर्बुधात् ।
ग्रहयुद्धादनावृष्टिर्ग्रहयोगादपि क्षतिः ॥ १५९ ॥
वर्षं स्यात् पञ्चभिर्यामैः कुंडले सूर्यचन्द्रयोः ।
नितान्तं निकटे रक्ते सद्यो गर्जति मेघराट् ॥ १६० ॥
द्वे द्वे क्षुद्रविशाले चेत् कुण्डले सूर्यचन्द्रयोः ।

बहुवृष्टिरनेकाहं तदा तत्र भविष्यति ॥ १६१ ॥
द्वे द्वे सूर्यस्य चन्द्रस्य कुण्डले पञ्चवर्णके ।
त्र्यंह यावत्तदा तत्र बहुवृष्टिर्भविष्यति ॥ १६२ ॥
कुण्डलानि यदि त्रीणि त्रीणि स्युः सूर्यचन्द्रयोः ।
मासि भाद्रपदे तर्हि यावन्मासं सुवृष्टयः ॥ १६३ ॥
नित्यं नवनवं यत्र कुण्डलं सूर्यचन्द्रयोः ।
विघ्नंति कर्तरीकीटाः शलभा वा भृशं कृषिम् ॥१६४॥
एकं तु कुण्डलं चंद्रे सूर्ये चेत् कुंडलद्वयम् ।
तृतीये दिवसे तत्र भूरि वर्षं भविष्यति ॥ १६५ ॥
शशिनः कुंडलं श्वेतं रक्तं सूर्यस्य वर्षति ।
वैपरीत्ये घटाटोपो जायते स न वर्षति ॥ १६६ ॥
सूर्यस्य कुण्डलं श्वेतमेकं वा कुण्डलद्वयम् ।
तदा पादपविध्वंसी प्रचण्डः पवनो वहेत् ॥ १६७ ॥
सूर्यस्य कुण्डलं पञ्चवर्णं चेद् बहुविस्तृतम् ।
तदा घनघटाटोपो बहुवृष्टिश्च जायते ॥ १६८ ॥
सद्यो वर्षं भवेत् पीते दीप्ताङ्के रविमण्डले ।
स्निग्धे क्षुराभ्रकाकीर्णे सुविस्तीर्णे सुवर्तुले ॥ १६९॥
कुंडलं निशि चन्द्रस्य मातर्वातं प्रचारयेत् ।
अपि प्रवर्तयेद्वर्षां परिधिः सहकुंडलः ॥ १७० ॥
इन्दोः क्षुद्रविशाले द्वे भवेतां धूम्रकुण्डले ।

अनावृष्टिस्तदा तत्र जायते वायुसंचरः ॥ १७१ ॥
कुण्डले तु सुविस्तीर्णे यदि तारान्तराश्रिता ।
वायुर्वृष्त्यवृष्टिर्वा वृष्टिर्वा बहुवासरा ॥ १७२ ॥
उदितं तु निशानाथं परिवेषो रुणद्धि चेत् ।
जीमूतवर्णः स्निग्धश्च महामेघस्तदा भवेत् ॥ १७३ ॥

इन्द्रायुधम् ।

इन्द्रायुधं तु द्विविधं धनुरैंरावतं तथा ।
इन्द्रः सूर्यकरस्थानः प्राणो योऽयं प्रकाशते ॥ १७४ ॥
नीरांतराः करा भानोः पवनेन विघट्टिताः ।
सप्तवर्णा धनुःसंस्था दृष्टा इन्द्रधनुर्मतम् ॥ १७५ ॥
आच्छिन्नं द्युतिमत् स्निग्धं भूगाढं द्विःकृतं धनुः ।
अनुलोमं प्रशस्तं स्याज्जलं तद्धि प्रयच्छति ॥ १७६ ॥
अवनिगाढमच्छिन्नं प्रतिकूलं धनुर्द्वयम् ।
कदाचिदपि दृश्येत न प्रशस्तं तदिष्यते ॥ १७७ ॥
अवृष्टिकृज्जलोद्भूतं भूमिजं सस्यनाशकृत् ।
वल्मीकजं संगरकृद् वृत्तजं व्याधिकृद्धनुः ॥ १७८ ॥
अवृष्ट्यां कारयेद् वृष्टिं वृष्टिं वृष्ट्यां निवारयेत् ।
पूर्वस्यां पश्चिमायां तु दृष्टं वृष्ट्यै सदा भवेत् ॥ १७९ ॥
सूर्यास्तसमये प्राच्यां भवेदिन्द्रधनुर्यदि ।
द्वादशे महरे तत्र पूर्णं वर्षा भविष्यति ॥ १८० ॥

प्रभाते पश्चिमं यत्र दृश्यते वासवं धनुः ।
वारुणे सति नक्षत्रे शीघ्रं वर्षति वासवः ॥ १८१ ॥
यद्युत्तरादिन्द्रधनुस्तदाऽकस्मात् प्रवर्षति ।
दक्षिणाऽग्रहं कुर्य्याद् वर्षं वा बहुवासरम् ॥ १८२ ॥
अर्द्धबिम्बं यदाकाशे धनुरैन्द्रं प्रदृश्यते ।
तदाऽत्यन्तं सुवृष्टिः स्याद्रत्यन्तं च समर्घता ॥ १८३ ॥
बुधसूर्यातिरिक्तेषु वारेष्विन्द्रधनुर्यदि ।
तदा वर्षति पर्जन्यश्चतुर्थे पञ्चमेऽहनि ॥ १८४ ॥
एतदिन्द्रधनुर्वक्रं तदेव ऋजुरोहितम् ।
ऐरावतं च तत् प्रोक्तं फलमस्य धनुःसमम् ॥ १८५ ॥

दण्डः, त्रिशूलं, मत्स्यः, अमोघाः,—

सूर्यात् समुत्थिता रेखाऽमोघ इत्यभिधीयते ।
साऽग्रेण खण्डिता दण्डस्तिस्रो रेखास्त्रिशूलकम् १८६
द्वाभ्यामग्रमोघरेखाभ्यां भिन्नदिग्भ्यां तु मत्स्यकः ।
सत्स्वप्येवं विशेषेषु सांकर्य्येणोच्यते फलम् ॥ १८७ ॥
रवेः कराः सिताः स्निग्धा आदिमध्यांतगामिनः ।
अव्युच्छिन्ना अमोघाख्या ऋजवो वृष्टिहेतवः ॥१८८॥
अमोघा दक्षिणावर्ता दीर्घा उद्द्योतिनोऽमलाः ।
सरला विरले व्योम्नि दृष्टाः श्रेयस्करा मताः ॥१८९॥

अमोघाः कलुषा ह्रस्वाः कुटिला विकृता अपि ।
विच्छिन्ना विषमा ध्वस्ता वामावर्ता अदृष्टिदाः ॥१९०॥
बभ्रुकल्माषकपिलाः शबला हरितोऽरुणाः ।
विचित्रा अपि सप्ताहादमोघा दृष्टिकारिणः ॥ १९१ ॥
अमोघकिरणा भानोः सन्ध्यायां घननिःसृताः ।
भूसमे रसिंत मेघे बहुवर्षणलक्षणम् ॥ १९२ ॥
वर्षन्त्यमोघकिरणा उदितस्यास्तमेष्यतः ।
तत्रैवाहन्येकरेखास्त्रिरेखास्तु त्र्यहांतरे ॥ १९३ ॥
अमोघरेखा सन्ध्यायामुत्तरां बहु लम्बते ।
तदा तृतीयदिवसे वृष्टिस्तत्र भविष्यति ॥ १९४ ॥
अमोघरेखा सन्ध्यायामुत्तरां यदि लम्बते ।
शीतकालेऽतिशीतं स्याद्वर्षाकाले तु वर्षति ॥ १९५ ॥
पश्चिमादुत्थिता सायं रेखा खे खण्डिता यदि ।
तदातिवर्षा जायेत निशांते वा परेऽहनि ॥ १९६ ॥
प्रातः पूर्वोत्थिता रेखा पश्चिमामुत्तरामपि ।
यदि याति तदा वर्षा दशाहं वायवोऽथवा ॥ १९७ ॥
द्वौ चत्वारोऽपि वा षड् वा मत्स्या यदि भवन्ति चेत् ।
एवमिन्द्रधनुस्तर्हि वायुरत्युग्रमुद्वहेत् ॥ १९८ ॥
सूर्यांशुमरुदभ्राणां संघातो दण्डवत्स्थितः ।
स दण्डः कोणगो राज्ञां द्विजानां दिक्षु दुःखदः ।

प्राङ्मध्यसन्धिदृष्टोऽयं युद्धसम्भावनाकरः ।
श्वेतादिवर्णा विप्रादीन् हन्ति स्वाभिमुखां दिशम् २००

इति संध्यादिरविकराधिकारः ।

उल्काधिकारः ।

वज्रं विद्युन्महोल्का च धिष्ण्या तारेति पञ्चधा ।
उल्केति संज्ञया ख्याता अन्तरिक्षोद्भवाग्नयः ॥ २०१॥
विद्युत्तारादिदैनैः षड्भिरुल्का पक्षेण वीक्षिता ।
वज्रं धिष्ण्या त्रिभिः पक्षैः फलपाकाय कल्पते ॥२०२॥
अशनिर्विद्युदुल्का वा धत्ते यादृत् फले बलम् ।
धिष्ण्या तदर्द्धं तारा तु धिष्ण्यार्द्धं कुरुते फलम् २०३
नादेन महता वज्रं विदारयदिलातलम् ।
अश्मवेश्मतरुप्राणितनूपरि पतत्यलम् ॥ २०४ ॥
ह्रादिनी वज्रमापोत्रं भिदिरं भिदुरं भिदुः ।
जम्भारिर्जाम्बविर्दम्भो दम्भोलिरशनिः पविः ॥२०५॥
शतधारं शतारंगौ मेघभूतिर्गिरिद्विषः ।
शतकोटिः स्वरुः शम्बः कुलिशं गिरिकण्टकः ॥२०६॥
विद्युत्तटत्तटारावा सहसा त्रासकारिणी ।
ज्वलिता निपतत्याशु जन्तुष्विन्धनराशिषु ॥ २०७ ॥

धिष्ण्या कृशाल्पपुच्छा च धनूंषि दश दृश्यते ।
ज्वलितांगारसंकासा द्विहस्ता चान्तराधिका ॥ २०८॥
तारा शुक्ला हस्तदीर्घा ताम्रा वाम्बुजतन्तुवत् ।
याति तिर्यगधश्चोर्ध्वं बहुधात्तिप्रवाणवत् ॥ २०९ ॥
अश्वनिश्चक्रसंस्थाना विशालकुटिला तडित् ।
रेखेव लिखिता व्योम्नि ताराधिष्ण्यापि तादृशी २१०
दृहच्छिखा च क्षुद्रमाग्रा रक्तनीलशिखोज्ज्वला ।
पौरुषप्रमिता नानाविधोल्केत्याह काश्यपः ॥ २११ ॥
पतन्ती वर्द्धते तूल्का दीर्घा पुरुषसंमिता ।
शिरःस्थूला दीर्घतनुपुच्छा बहुविधाकृतिः ॥ २१२ ॥
हलास्त्रकपिनक्रोष्टूदंष्ट्रिप्रेतखराकृतिः ।
गोधा हि धूमरूपा च पशा या च द्विमस्तका ॥२१३॥
गजाश्वगिरिचन्द्राब्जहंसमीनध्वजाकृतिः ।
श्रीवत्सस्वस्तिकाकारा सुभिक्षादिशुभावहा ॥ २१४ ॥
चन्द्रार्कस्पर्शिनी योल्का या च चन्द्रार्कनिःसृता ।
सभूकम्पा च दुर्भिक्षानावृष्ट्याद्यशुभावहा ॥ २१५ ॥

इति वज्राशुल्काधिकारः ।



अथ प्रकीर्णकाधिकारः ।

राहवः केतवस्तारा दिग्दाहः पांसुवर्षणम् ।
भूकम्पश्चेति षड् भावा उक्ता वैकारिकाह्वयाः ॥२१६॥

राहवः ।

राहवः स्वपरज्योतीराहित्यादप्रकाशिनः ।
अपि सन्तोऽपि गच्छन्तो द्युमार्गेषु न भान्ति ये ॥२१७॥
ग्रहवत् गतिमन्तस्ते तस्मादुक्तादुपग्रहाः ।
कीलाः स्वर्भानवो नागाः पाता इति चतुर्विधाः ॥२१८॥
ते कीलका अप्रकाशाः पिण्डा व्योम्नि भ्रमंति ये ।
स्वर्भानवः परद्योत्यपिण्डच्छायामयार्द्धकाः ॥ २१९ ॥
ग्रहाणां गतिमार्गा ये कक्षावृत्तेति विश्रुताः ।
बहुधाऽवर्तिता भोगास्ते नागा नागविग्रहाः ॥ २२० ॥
एतेषामेव नागानां ये संपाताः परस्परम् ।
त एव पातास्ते सर्वे राहवो निष्प्रभा यतः ॥ २२१ ॥

कीलकराहवः ।

निष्प्रभाः सतमस्कत्वाददृश्याः संति भूरिशः ।
चन्द्रशुक्रादिवत् पिण्डाश्चन्द्रार्काद्यनुगामिनः ॥२२२॥
तत्रेन्दुवन्महाबिम्बस्त्वष्टा नाम महाग्रहः ।

विना पर्व नयत्यर्कमण्डलं सतमस्कताम् ॥ २२३ ॥
ततोऽल्पबिम्बाः सन्त्यन्ये ग्रहास्तामसकीलकाः ।
त्रयस्त्रिंशन्मिता राहुपुत्राख्या राहवश्च ते ॥ २२४ ॥
ध्वाङ्क्षः कबन्धो दण्डश्च ध्वजच्छत्रं च चामरम् ।
एते छिद्रकराः सूर्ये भूयोदृष्टास्तमोग्रहाः ॥ २२५ ॥
रूपाणि तेषामुदये चंडो वायुः सशर्करः ।
रजोद्भूतं खं, कालुष्यं जले, भूकम्पनं भवेत् ॥ २२६ ॥
निर्घातश्च दिशां दाहो द्रुपस्त्वर्तुविपर्ययः ।
मृगपक्षिगणा दीप्ताः कीलकानां प्रभावतः ॥ २२७ ॥
केतूनामपि राहूणां कीलकानां च दर्शने ।
पृथक्फला न चोत्पातास्ते हि तत्प्रभवा मताः ॥२२८॥
कीलका येषु देशेषु दृश्यन्ते सूर्यबिम्बगाः ।
अवृष्ट्या चातिवृष्ट्या च प्रजा तेषु प्रणश्यति ॥२२९॥
धूमस्फुलिंगज्वालादियुक्तास्ते प्रभवंति चेत् ।
तदाऽत्यन्तं प्रजापीडा दुर्भिक्षमरकादिभिः ॥ २३० ॥
एको द्वौ बहवो वा ते सदा पापफला रवौ ।
दंडध्वाङ्क्षकबन्धान्ये चन्द्रे दृष्टाः शुभावहाः ॥ २३१ ॥

स्वर्भानु-राहवः ।

ये परज्योतिषः पिंडाः पृथ्वीचन्द्रबुधादयः ।
तेषां प्रकाशितादर्द्धादर्द्धमन्यत् तमोमयम् ॥ २३२ ॥

तज्जाश्छायामयास्तेयस्तद्याः उक्ताः स्वर्भानुराहवः ।
स्वर्भानौ भानुरस्त्येषा तस्मात् स्वर्भानवः स्मृताः ॥२३३॥
मूर्तिच्छायामयी ज्योतीराहित्याद्राहुरुच्यते ।
अर्द्धं तमोमयं सिंही तज्जोऽसौ सैंहिकेयकः ॥ २३४ ॥
अहर्मित्रं ततो देवा वारुणी रात्रिरासुरी ।
रात्रौ सुदर्शनच्छिन्नमूर्द्धा राहुस्ततोऽसुरः ॥ २३५ ॥
छाया हि सा तमस्तस्मात् द्युचारी स ततो ग्रहः ।
भूच्छायया गृहीतेन्दुरुपरक्तो न दृश्यते ॥ २३६ ॥
न दृश्यते दृशा सूर्यश्चन्द्रच्छाया गृहीतया ।
तदित्थं ग्रहणं राहुग्रस्तयोः सूर्यचंद्रयोः ॥ २३७ ॥
(स्वर्भानुर्हि वा आसुरिः सूर्यं तमसा विध्यांध)
अत्रयस्तमन्वविन्दन् न ह्यन्ये अशक्नुवन् ॥ २३८ ॥
दूर्वाश्यामश्च हारिद्रो मरकाय तमोग्रहः ।
शुक्लाभः सस्यनाशाय वज्रपाताय पाटलः ॥ २३९ ॥
सुभिक्षाय सितो धूम्रः पीतो विमलकप्रभः ।
दुर्भिक्षायारुणश्यामकापोतकपिलप्रभः ॥ २४० ॥
अर्चिष्मानग्निभश्चाग्निभिये युद्धाय गैरिकः ।
जालार्कैन्द्रधनुः पद्मरूपः शस्त्रप्रकोपकृत् ॥ २४१ ॥
अरुणांशुः पांसुधूमलोहितो दृष्टिनाशकृत् ।
आधूम्रोऽत्यरुपकं कृष्णः कापोतश्चातिवर्षति ॥२४२॥

अस्तं दृष्ट्वा शनिर्दृष्टिं शुक्रं सस्यं विघातयेत् ।
दृष्ट्वा ग्रस्तं गुरुर्दुष्टदृष्टिदोषं निवारयेत् ॥ २४३ ॥
कार्तिके ग्रहणं हन्यात् मगधान् काशिकोशलान् ।
शूरसेनान् कलिंगांश्चान्यत्र क्षेमसुभिक्षकृत् ॥ २४४ ॥
मार्गे तु ग्रहणं हन्यात् पुण्ड्रकाश्मीरकौशलान् ।
तथाऽपरान्तकान् शेषे दृष्टिक्षेमसुभिक्षकृत् ॥ २४५ ॥
पौषे दृष्टं हंति सिंधून् विदेहान् कुकुरांस्तमः ।
देशान्तरे तु कुरुते दुर्भिक्षं स्वल्पवर्षणम् ॥ २४६ ॥
माघे तु ग्रहणे राहुर्हन्ति काश्यङ्गवङ्गजान् ।
देशान्तरे तु कुरुते दृष्टिं कर्षकसंमताम् ॥ २४७ ॥
फाल्गुने हन्त्यगुर्वंगावन्तिकाश्मकमेकलान् ।
चैत्रे कैकयपौण्ड्रौड्राश्मकान् वर्षति चित्रितम् ॥ २४८॥
राधे कलिंगान् यौधेयान् हन्ति चेदशाकुजान् शकान् ।
ज्यैष्ठे साल्वान्निषादांश्च सस्यं वृष्टिं च नाशयेत् ॥२४९॥
आषाढे चीनकाश्मीरगान्धारकपुलिन्दकान् ।
हंति माण्डलिकीं वृष्टिं कुरुते राहुरीक्षितः ॥ २५० ॥
श्रावणे चीनकाश्मीरगान्धारकपुलिन्दकान् ।
मध्यदेशकुरुक्षेत्रकाम्बोजयवनानपि ॥ २५१ ॥
हंति शारदधान्यं च शेषे क्षेमसुवृष्टिकृत् ।
भाद्रे सुराष्ट्रमगधसौवीरदरदाश्मकान् ॥ २५२ ॥

म्लेच्छान् कलिंगान् वङ्गाश्च हन्त्यन्यत्र सुभिक्षकृत् ।
आश्विने हंति वाल्हीकचीनकाम्बोजयावनान् ॥२५३॥
किरातानर्तपौण्ड्रांश्च शेषे भूरिसुभिक्षकृत् ।
शंसुः सुभिक्षकृद्राधे श्रावणादिषु पञ्चसु ॥ २५४ ॥
प्रचण्डः पवनो विद्युद् गर्जितं परिवेषकः ।
भूकम्पश्चेति सप्ताहे जाता ग्रहणतोऽशुभा ॥ २५५ ॥
ग्रहणाद् यदि सप्ताहे सुवृष्टिर्जायते तदा ।
सर्वान् ग्रहणजान् दोषान्निपात्य कुरुते शिवम् ॥२५६॥

नागराहवः ।

येन येन यथा खेटा गच्छन्तः प्रतिभांति ते ।
स पन्था नाग इत्युक्तो यत्र खेटस्तदाननम् ॥ २५७ ॥
खेचरा दिवि यावन्तो नागास्तावन्त एव खे ।
दिवि भुव्यन्तरिक्षे च नागानन्त्येपि तेऽष्टधा ॥ २५८ ॥
ग्रहस्वकक्षावृत्तानां ये संयोगाः परस्परम् ।
त एकविंशतिः पाता याम्यसौम्यास्ततो ग्रहाः ॥२५९॥
दक्षिणो राहुरित्युक्तः पातः केतुस्तथोत्तरः ।
राहोरुत्तरतो यांति केतोर्दक्षिणतो ग्रहाः ॥ २६० ॥
पातः सर्वो राहुसंज्ञस्तस्य संज्ञाद्वयी पुनः ।
राहुः केतुरिति क्लृप्ते दक्षिणोत्तरभेदतः ॥ २६१ ॥
पातस्यानस्थयोरत्यासन्नयोर्ग्रहयोः सतोः ।

ग्रहणं वा युतिर्वेति द्विविधो योग इष्यते ॥ २६२ ॥
तत्र सूर्यग्रहे चन्द्रग्रहे चोक्तं शुभाशुभम् ।
ताराग्रहाणां ग्रहणे सांग्रतं फलमुच्यते ॥ २६३ ॥
पातास्थानादविच्छिन्नश्चन्द्रेणार्केण वैकभः ।
ताराग्रहो ग्रस्तबिम्बो जायते ग्रहणं हि तत् ॥ २६४ ॥
आवन्तिकाश्च कावेर्या नर्मदायाश्च कूलगाः ।
सर्वे प्रदेशाः पीड्यन्ते मंगलग्रहणे सति ॥ २६५ ॥
गंगायमुनयोर्मध्ये सरयूशोणयोस्तटम् ।
पूर्वोदधिश्च नेपालः पीड्यन्ते छादिते बुधे ॥ २६६ ॥
उत्तरस्यां तु ये देशा ये च सिंधुतटाश्रयाः ।
ते सर्वे परिपीड्यन्ते राहुग्रस्ते बृहस्पतौ ॥ २६७ ॥
दासेरकाश्च कैकेया यौधेयाः शिवयोजनाः ।
आर्यावर्ताश्च पीड्यन्ते शुक्रे राहुमुपागते ॥ २६८ ॥
अर्बुदं पारियात्रं च संश्रिताः पुष्करांतिकाः ।
सौराष्ट्रका मरुप्रान्ताः पीड्यन्ते छादिते शनौ २६९
गतिमन्त इमे पाता य उक्ता एकविंशतिः ।
अधस्त्वे यत्र ये पातास्ते दर्श्यन्ते पृथग्विधाः ॥२७०॥

सूर्यपाताः ।

आदित्यार्द्धे च पूषान्ते संपातः शनिसूर्ययोः ।
राशेरष्टादशे त्वंशे तुर्य्यस्य दशमस्य च ॥ २७१ ॥

आर्द्रातृतीये पूषाद्ये संपातो गुरुसूर्ययोः ।
अंशे तु दशमे राशेस्तुर्य्यस्य दशमस्य च ॥ २७२ ॥
भरण्यंते विशाखार्द्धे संपातो भौमसूर्ययोः ।
राशेरष्टादशे त्वंशे द्वितीयस्याष्टमस्य च ॥ २७३ ॥
रोहिण्यंते च ज्येष्ठार्द्धे संपातः शुक्रसूर्ययोः ।
अंशे सप्तदशे राशेस्तृतीयस्य नवमात्मनः ॥ २७४ ॥
भरण्यंते विशाखार्द्धे संपातो बुधसूर्ययोः ।
अंशे सप्तदशे राशेर्द्वितीयस्याष्टमस्य च ॥ २७५ ॥
सूर्ये पातः क्रांतिपातादष्टोत्तरशते शनेः ।
शते शुरोरष्टचत्वारिंशेऽशे, मंगलस्य तु ॥ २७६ ॥
क्रांतिपाताच्च शुक्रस्य पातोंऽशे सप्तसप्ततेः ।
सप्तचत्वारिंशके तु बुधपातो बुधेक्षितः ॥ २७७ ॥

चन्द्रपातः ।

सूर्यमार्गे चन्द्रमार्गसंपातः पात उच्यते ।
स द्वेधा दक्षिणो राहुरुत्तरः केतुरुच्यते ॥ २७८ ॥
रविमार्गेऽन्वहं राहुः पश्चिमामनुगच्छति ।
तिस्रः कलाः सार्द्धदश विकला गतिराह्निकी ॥ २७९ ॥
प्राचां मते कलास्तिस्रो विकला दश तद्गतिः ।
अष्टचत्वारिंशदनुविकला विंशतिः परा ॥ २८० ॥
अंशानां च कलानां च राहोरेकोनविंशतिः ।

विकलानां चतुश्चत्वारिंशदन्दगतिर्मता ॥ २८१ ॥
वर्षैरष्टादशैरष्टविंशद्विशतवासरैः ।
घटीभिः पञ्चदशभीराहुश्चक्रं भुनक्ति सः ॥ २८२ ॥
अंशैस्तु सप्तदशभिरेकविंशकलोत्तरैः ।
पातसंनिहिते चन्द्रेऽमांतेऽर्के उपरज्यते ॥ २८३ ॥
एकादशभिरंशैस्तु चतुस्त्रिंशत्कलोत्तरैः ।
पातसंनिहितश्चन्द्रः पूर्णिमास्वपरज्यते ॥ २८४ ॥

ताराग्रहपाताः ।

श्रवणाप्रथमे पुष्यतृतीये शनिजीवयोः ।
षष्ठेंऽशे पञ्चमस्यैकादशस्य क्रांतिराश्रितः ॥ २८५ ॥
पूफातुरीयके पूभाद्वितीये शनिभौमयोः ।
राशेरष्टादशे त्वंशे षष्ठस्य द्वादशस्य च ॥ २८६ ॥
पौष्णद्वितीयके हस्तातुरीये शनिशुक्रयोः ।
अंशे पञ्चदशे राशेराद्यस्य सप्तमस्य च ॥ २८७ ॥
आश्विन्यर्द्धे च विक्रांते संपातः शनिसौम्ययोः ।
राशेरंशे सप्तविंशे त्वादद्यस्य सप्तमस्य च ॥ २८८ ॥

इति शनेः ।

रेवत्यंते च चित्रार्द्धे संपातो गुरुभौमयोः ।
राशेरंशे चतुर्विंशे त्वादद्यस्य सप्तमस्य च ॥ २८९ ॥

अश्वयन्ते विशाखार्द्धे संपातो गुरुशुक्रयोः ।
राशेरष्टादशे त्वंशे द्वितीयस्याष्टमस्य च ॥ २९० ॥
अश्विन्यन्ते स्वातिकार्द्धे संपातो गुरुसौम्ययोः ।
अंशे तु सप्तमे राशेर्द्वितीयस्याष्टमस्य च ॥ २९१ ॥

इति गुरोः ।

पुष्यात्तृतीये श्रवणाप्रथमे भौमशुक्रयोः ।
अंशे तु पञ्चमस्यैकादशस्यापि च सप्तमे ॥ २९२ ॥
याम्या तृतीये राधाद्ये संपातो भौमसौम्ययोः ।
अंशे षोडशे राशेर्द्वितीयस्याष्टमस्य च ॥ २९३ ॥

इति भौमस्य ।

यातोऽश्विन्यास्तृतीये तु स्वात्याद्ये शुक्रसौमयोः ।
राशेरंशे तृतीये तु द्वितीयस्याष्टमस्य च ॥ २९४ ॥

इति शुक्रस्य ।

ताराग्रहेन्दुपातः ।

उच्चावचश्चन्द्रमार्गो नित्यमेति विशेषताम् ।
तस्मात् तत्र गताः पाताः पञ्चलक्ष्याः स्वयं बुधैः २९५

इति प्रकीर्णके चतुर्विधा राहवः ।

केतवः ।

विकीर्णतेजसः केचित् स्वप्रकाशमया दिवि ।
दृश्यन्ते जातुचित् पिण्डापिण्डास्ते केतवो मताः २९६
इन्द्रगोपकृमिं यक्षस्थानं रत्नं मणिं भुवि ।
दिव्युल्काग्रहभं त्यक्त्वाऽनग्नौ ज्योतींषि केतवः २९७
गर्गादयस्तु केतूनां सहस्रं परिचक्षते ।
पराशरादयस्त्वेकशतमेकं तु नारदः ॥ २९८ ॥
कियन्त्यहानि दृश्यास्ते किं किमृक्षोदयास्तकाः ।
एतत्पुराविदैर्दृष्टमपि हन्त न दर्शितम् ॥ २९९ ॥
नैषां यथावद्विज्ञानं न च निर्द्धारिता गतिः ।
संख्यानं च फलं चैषां प्रतीतं तदिहोच्यते ॥ ३०० ॥
सहस्रं केतवस्तेषां किरणाग्नेयमृत्युदा ।
पार्थिवाः सोमजा ब्रह्मदण्डोऽप्यथ विसर्पका ॥३०१॥
तस्कराः कौङ्कुमाः कीलाः कनका विकचा अपि ।
अरुणा विश्वरूपाश्च गणका ब्रह्मजास्तथा ॥ ३०२ ॥
कंकाः कबन्धा विपुला ऊनविंशतिजातयः ।
वक्ष्यन्ते लक्षणान्यासां संख्याश्चाथ विशेषकाः ३०३
मुक्ताहारसुवर्णाभा मृणालरजतप्रभाः ।
स्फटिकाभाश्च सशिखाः किरणाः पंचविंशतिः ॥३०४॥

बन्धुजीवाग्निलाक्षाभाः शोणा दीप्ता विचूलिनः ।
उद्दिश्यन्त इवाग्नि खादाग्नेयाः पञ्चविंशतिः ॥ २०५ ॥
रूक्षा वक्रशिखाः कृष्णा मृत्युदाः पञ्चविंशतिः ।
भौमा द्वाविंशतिर्वृत्ता विचूलास्तैलतोयभाः ॥ २०६ ॥
हिमेन्दुकुन्दरौप्याभास्त्रयः सौम्याः शुभावहाः ।
क्रूरस्त्वेको ब्रह्मदंडस्त्रिवर्णस्त्रिशिखो मतः ॥ २०७ ॥
सौम्या उदीच्यामैशान्यां भौमा याम्ये तु मृत्युदाः ।
आग्नेया अग्निगाः प्राचीप्रतीच्योः किरणोदयः २०८
विसर्पकास्तु चतुराशीतिः स्थूलैकतारकाः ।
अर्चिष्मन्तः सिताः स्निग्धाः प्रसन्नास्तीव्रविग्रहाः २०९
कनकाः षष्टिराख्याता द्विशिखाः सप्ततारकाः ।
रश्मिमंतश्च सुस्निग्धा घोरा कष्टफला हि ते ॥२१०॥
विकचाः पञ्चषष्टिस्तु विशिखा रश्मिभिर्वृताः ॥
अपुष्पमन्तः सिताः स्निग्धाः प्रसन्ना एकतारकाः ॥२११॥
तस्करा एकपंचाशद् दीर्घा रूक्षाश्च पांडवः ।
अरुन्धतिवदव्यक्ततारकाः रश्मिभिर्वृताः ॥ २१२ ॥
कुंकुमाः केतवः षष्टिस्त्रितारास्त्रिशिखा अपि ।
अग्निप्रभा शोणितामाः पापा लोहितरश्मयः ॥ २१३ ॥
कीलकास्तु त्रयस्त्रिंशत् कृष्णान्ताः कृष्णरश्मयः ।
दारुणा मंडले भानोर्दृश्यन्ते शशिनोऽपि च ॥ २१४॥

पराशरमते सन्ति त्रयस्तामसकीलकाः ।
अंगिराः कीलकः काकस्त्रयोऽप्यसितकेतवः ॥ ३१५ ॥
सूर्यबिम्बे त्रयोऽप्येते चन्द्रं द्वौ कालकीलकौ ।
अंगिराः सरथो धन्वी दृश्यते पुरुषाकृतिः ॥ ३१६ ॥
काकः कालाकृतिर्घोरस्त्रिकोणो वापि लक्ष्यते ।
मण्डलं कीलकं मध्ये मण्डलस्यासितो ग्रहः ॥ ३१७ ॥
विश्वरूपाः शतं विंशं शोणा दीप्ता विचूलिनः ।
उद्गिरन्त इवाग्निं खादग्निभा ज्वालमालिनः ॥ ३१८ ॥
अतारांश्चामरांकारा रूक्षा व्याक्षिप्तरश्मयः ।
श्यामारुणा वातरूपा अरुणाः सप्तसप्ततिः ॥ ३१९ ॥
अष्टौ तु गणकास्तारापुञ्जवन्मंडलस्थिताः ।
चतुरस्राः श्वेतशिखा ब्रह्मजा द्वे चतुःशते ॥ ३२० ॥
मयूखोत्सर्गिणः स्निग्धाः कंकाद्वात्रिंशदिन्दुभाः ।
काकतुण्डनिभैर्वंशगुल्मभै रश्मिभिर्वृताः ॥ ३२१ ॥
कबन्धाः नवतिः षट् च भस्मकर्पूररश्मयः ।
विरूपतारकापुंजाः पीतारुणकबन्धवत् ॥ ३२२ ॥
शुक्लैकतारा विपुला विपुला नव केतवः ।
इत्थं सहस्रं केतूनां जातयस्तूनविंशतिः ॥ ३२३ ॥
पराशरादिभिर्दृष्टाः पुरा ये केतवो यथा ।
ते तथा परिसंख्याता रूपकालफलादिभिः ॥ ३२४ ॥

चलो जलोऽष्ट चोर्म्यर्घा भट औद्दालकस्ततः ।
पद्मः काश्यप आवर्तो रश्मिरेते क्रमोदयाः ॥ ३२५ ॥
वसाकेतुश्च कुमुदः कपालश्च मणिः कलिः ।
क्रमोदयाः परेषां तु क्रमचारो न दृश्यते ॥ ३२६ ॥

चलकेतुः ।

चलकेतुर्दक्षिणाग्रांगुलोच्छ्रितशिखोदितः ।
उत्तरेण व्रजन् दीर्घो भवच्छूलाग्रवच्छिखः ॥ ३२७ ॥
प्रतीच्यामुदितो गत्वोदीच्यां सप्तर्षिमंडलम् ।
ध्रुवं चाभिजितं ब्रह्मराशिं दृष्ट्वा निवर्तते ॥ ३२८ ॥
व्योम्नोर्ध्वमात्रमागत्य याम्येनास्तं प्रयाति सः ।
शोष्य पञ्चदशं वर्षशतमायाति दर्शनम् ॥ ३२९ ॥
याम्ये यावदवन्तीं च देविकां यावदुत्तरे ।
आपुष्करादामयागादश मासान् स पीडयेत् ॥ ३३० ॥

जलकेतुः ।

जलकेतुः पश्चिमाग्रशिखः स्निग्धस्य पश्चिमे ।
चलकेतोरुदयते नवमासावशेषके ॥ ३३१ ॥
सुभिक्षं क्षेममारोग्यं नवमासान् करोति सः ।
अहान्तरकृतान् दोषानपि सर्वान्निवर्तयेत् ॥ ३३२ ॥

ऊर्मि—शीत—केतवः—

जलकेतोस्तु कर्मान्ते क्रमादुद्यन्ति केतवः ।
आष्टावूर्म्यादिशीतांता धृतिमन्वब्दसांतराः ॥ ३३३ ॥
ऊर्मिः शंखो हिमो रक्तः कुक्षिः कामो विसर्पणः ।
शीतश्चेत्यष्ट सहजाः केतवोऽमृतजा मताः ॥ ३३४ ॥
क्षुद्रजंतुहरा रूक्षा दुर्भिक्षाद्यशुभावहाः ।
स्निग्धाः सुभिक्षक्षेमाय तेऽष्टावूर्म्यादिकेतवः ॥ ३३५ ॥

भटकेतुः, भवकेतुः ।

गते तूर्म्यादिशीतान्तकेतूनां चारकर्मणि ।
भटकेतुर्निशामेकां दृश्यते सूक्ष्मतारकः ॥ ३३६ ॥
पूर्वस्यां दक्षिणावर्तहरिलांगूलवच्छिखः ।
स्निग्धः स कृत्तिकागुच्छमुख्यतारामप्रमाणकः ॥ ३३७ ॥
यावन्मुहूर्तान् दृश्योऽसौ तावन्मासान् सुभिक्षकृत् ।
स्निग्धो रूक्षस्तु कुरुते रोगान् प्राणांतिकान् भटः ॥ ३३८ ॥

औद्दालकः, श्वेतकेतुः, ककेतुश्च ।

औद्दालकः श्वेतकेतुर्याम्याग्रोऽर्द्धनिशोदयः ।
प्राच्यां प्रतीच्यां युगपत् कसंज्ञोऽन्यो युगाकृतिः ३३९
स्निग्धावुभौ सप्तरात्रं दृश्येते कोऽधिकं क्वचित् ।
शुभदौ दशवर्षाणि रूक्षौ शस्त्रादिनार्तिदौ ॥ ३४० ॥

केतुरौद्दालको वर्षशतं भोग्य दशोत्तरम् ।
भटकेतोः स चारांते पूर्वस्यां दिशि दृश्यते ॥ ३४१ ॥

पद्मकेतुः ।

श्वेतकेतुफलान्ते तु पद्मकेतुः सितो भवेत् ।
एकरात्रं पश्चिमायां सप्तर्षाणि हर्षदः ॥ ३४२ ॥

काश्यपः श्वेतकेतुः ।

काश्यपः श्वेतकेतुस्तु रूक्षः श्यावो जटाकृतिः ।
नभसस्त्र्यंशमाक्रम्य सोऽपसव्यं निवर्तते ॥ ३४३ ॥
भोग्य पञ्चदशं वर्षशतमिन्द्रांशकः शिखी ।
पद्मकेतोः स चारान्ते सहजस्योपदृश्यते ॥ ३४४ ॥
दृश्यते यावतो मासांस्तावद्वर्षं सुभिक्षकृत् ।
मध्यदेशगतार्घ्याणामौदीच्यानां च नाशकृत् ॥३४५॥

आवर्तकेतुः ।

श्वेतकेतोस्तु कर्मांते पश्चिमायां निशीथके ।
आवर्तकेतुः शंखाभो दक्षिणारुणचूडकः ॥ ३४६ ॥
यावन्मुहूर्तान् दृश्येत तावन्मासान सुभिक्षकृत् ।
आवर्तकेतुः कुरुते नित्ययज्ञोत्सवं जगत् ॥ ३४७ ॥

रश्मिकेतुः ।

रश्मिकेतुः फलं दत्ते काश्यपश्वेतकेतुवत् ।
आधूम्रया तु शिखया दृश्यते कृत्तिकानुगः ॥ ३४८॥

स विभावसुजो रश्मिकेतुः प्रोक्ष्य समाशतम् ।
आवर्तकेतोश्चारांते कृत्तिकास्वपदृश्यते ॥ ३४९ ॥

वसाकेतुः ।

वसाकेतुर्महान स्निग्धसुभिक्षमरकमदः ।
त्रिंशद्वर्षशतं प्रोक्ष्या परोदप्युदगा यतः ॥ ३५० ॥
वसाकेतुसमो रूक्षोऽस्थिकेतुः क्षुद्भयावहः ।
प्राच्यां वसासमो दृष्टः शस्त्रकेतुर्मरमदः ॥ ३५१ ॥

कुमुदकेतुः ।

कुमुदः कुमुदाभासः प्राक्शिखः स्निग्धदुग्धभः ।
एकरात्रं वसाकेतोश्चारांते पश्चिमे चरेत् ॥ ३५२ ॥
एकामेव निशां दृष्टः सुभिक्षं जनयत्ययम् ।
दशवर्षाणि सौहार्दं पाश्चात्येषु रुजोऽस्थिकाः ॥ ३५३ ॥

कपालकिरणः ।

कपालकेतुरुदितोऽसाया प्राच्यां नभोऽर्द्धगः ।
धूम्ररश्मिशिखो रोगाद्दृष्टिक्षुन्मरकमदः ॥ ३५४ ॥
पञ्चविंशाब्दकशतं प्रोक्ष्य पक्षत्रयाधिकम् ।
चारान्ते कुमुदाख्यस्यामृतजस्यैति चोदयम् ॥ ३५५ ॥
यावन्त्यहानि दृश्यंते तावन्मासं फलोदयः ।
यावन्मासं च वर्षाणि त्रिपक्षात् परतः फलम् ॥३५६॥

मणिकेतुः ।

मणिकेतुस्तन्यधारासमस्निग्धशिखः सितः ।
त्रियामायामेकयामं दृश्यते सूक्ष्मतारकः ॥ ३५७ ॥
कपालकेतोश्चारान्ते प्रतीच्यामुदयन्नयम् ।
तद्दिनादेव चतुरो मासान् सार्द्धान् सुभिक्षकृत् ॥३५८॥

कलिकिरणः रौद्रकेतुः (किरणः)

रौद्रकेतुः कलिर्वैश्वानरवीथ्यां तु पूर्वतः ।
उद्यन् खत्र्यंशमागत्य ततो गच्छत्यदर्शनम् ॥ ३५९ ॥
त्रीणि वर्षशतान्येष प्रोक्ष्य मासान्नवाधिकान् ।
चारान्ते मणिकेतोश्चामृतजस्यैति चोदयम् ॥ ३६० ॥
तीक्ष्णा रूक्षा श्यावताम्राङ्गा शूलाकृतिः शिखा ॥
दक्षिणाभिनता यस्य फलं मासे त्रयोदशे ॥ ३६१ ॥
यावतो दृश्यते मासांस्तावद्वर्षाणि तद्भयम् ।
क्षुदनावृष्टिमरकै रोगैः संपीड्यते प्रजा ॥ ३६२ ॥

संवर्तकेतुः ।

संवर्तः प्रोक्ष्य वर्षाणामष्टोत्तरसहस्रकम् ।
पश्चिमे दृश्यते सायमाक्रम्य त्र्यंशकं दिवः ॥ ३६३ ॥
धूम्रताम्राङ्गशूलाभरूक्षचूडः स यावतः ।
मुहूर्तान्निशि दृश्येत तावद्वर्षाण्यनिष्टकृत् ॥ ३६४ ॥

अवर्षणं च दुर्भिक्षं रोगं शस्त्रमकोपनम् ।
कुरुते पीडनं राज्ञां स्वचक्रपरचक्रतः ॥ ३६५ ॥
यत्रोत्तिष्ठति नक्षत्रे प्रवासं यत्र गच्छति ।
यद्धूपयेत् स्पृशेद्वा भं देशान् हन्यात् तदाश्रितान् ३६६

ध्रुवकेतुः ।

ध्रुवकेतुस्त्वनियतप्रमाणगतिवर्णकः ।
नानाकृतिः सर्वदिक्षु यत्र तत्र प्रदृश्यते ॥ ३६७ ॥
दिव्यन्तरिक्षे भूमौ वा स्निग्धो दृष्टः शुभावहः ।
गृहांगे गृहिणां राज्ञां सेनांगेऽपि विनाशकृत् ॥ ३६८॥

अमृतजाः ।

जलो भटश्च पद्मश्चावर्तश्च कुमुदो मणिः ।
संवर्त इत्यमृतजाः केतवः सहजा मताः ॥ ३६९ ॥

दुष्टकेतुफलम् ।

अश्मकेशं किरातेशं कालिंग शौरसेनिकम् ।
औशीनरं च जलजाजीवमाश्मकमागधौ ॥ ३७० ॥
तथा सिकांगपाण्ड्येशानावन्त्यं दण्डकेश्वरम् ।
कौरक्षेत्रं च काम्बोजकाश्मीरमवधेश्वरम् ॥ ३७१ ॥
पुण्ड्रेशं कान्यकुब्जेशं मद्रकान्ध्रेशकाशिपौ ।
अर्जुनायनयौधेयशिवि चैद्येश्वकैकयौ ॥ ३७२ ॥
घ्नंति पाञ्चनदं सिंहलेशं वाङ्गं च नैमिषम् ।
किरातं केतवो दुष्टा अश्विन्यादिगताः क्रमात् ॥३७३॥

यावन्त्यहानि दृश्यन्ते तावन्मासं फलोदयः ।
यावन्मासं च वर्षाणि त्रिपक्षात् परतः फलम् ॥ ३७४॥
हूणावंगाणचीनेभ्यश्चोलाच्चान्यत्र देशके ।
डल्काताडितचूडस्तु केतुः श्रेयस्करो मतः ॥ ३७५ ॥
शुक्लः स्निग्धतनुर्ह्रस्वः प्रसन्नोऽचिरसंस्थितः ।
ऋजुर्यस्योदयाद् दृष्टिः स च केतुः शुभावहः ॥ ३७६॥

इति केतवः ॥

ताराः ।

विमलस्फटिकाभासा रोचते तारकावली ।
तत्र मासे सुभिक्षाय मेघो नूनं प्रवर्षति ॥ ३७७ ॥
सप्तरात्रं जलाभासा भासते तारकावली ।
तदावश्यं सुभिक्षाय मेघस्तत्र प्रवर्षति ॥ ३७८ ॥
प्रति क्षणं प्रस्फुरन्ती चञ्चच्चारुरुचा यदि ।
तारावली चमत्कारं कुरुते सातिवर्षति ॥ ३७९ ॥

दिग्दाहः ।

सूर्यांशु मंगलं षष्ठे चन्द्रः पञ्चमसप्तमे ।
दिग्दाहोत्पादको योगो दिग्दर्शनमिदं मतम् ॥३८० ॥
सायं मातर्दिशां दाहोऽपसव्यपवनोऽरुणः ।
सस्यनाशं प्रकुरुते सोऽन्यवर्णोऽपि नो शुभः ॥३८१ ॥
वातः प्रदक्षिणं वाति प्रसन्नं भं नभोऽमलम् ।
दिग्दाहः कनकाभासः सर्वलोकहितावहः ॥ ३८२ ॥

धूमः सस्यविनाशायारुणवर्णोऽनिलप्रदः ।
दिग्दाहः स्वर्णवर्णाभः शुभ इत्याह नारदः ॥ ३८३ ॥

वासवः ।

रजः समुत्थितं भूमेश्छादयत्यखिलां दिशम् ।
तिमिरेण विभाव्यंते न गिरिर्न तरुः पुरः ॥ ३८४ ॥
वायुना तु विनाध्वान्तमुत्थितं कुरुते रजः ।
तदा तु लक्षभिः पक्षैस्तत्र वर्षा भवेद् ध्रुवम् ॥ ३८५ ॥
धूमिका वा तुषारो वा यत्र प्रकुरुते तमः ।
तत्र चैकादशे पक्षे ध्रुवं वर्षति वासवः ॥ ३८६ ॥
रजोऽभ्येति रविं सान्ध्यं बन्धूकाञ्जनचूर्णभम् ।
रोगैर्निपीड्यते लोकः शुक्लेन रजसा सुखी ॥ ३८७ ॥
शिशिरे तु रजो नास्ति दोषकृत् स्वर्तुजं हि तत् ।
ऋतावन्यत्र रोगादिदोषावहमिदं रजः ॥ ३८८ ॥

भूकम्पः ।

तमसः सप्तमे भौमे भौमात् पञ्चमगे बुधे ।
बुधाच्चतुर्थ्ये चन्द्रे भूकम्प इति दिग्विधिः ॥ ३८९ ॥
भागस्तुर्य्यस्तृतीयोऽर्हो द्वितीयः प्रथमः क्रमात् ।
वरुणेन्द्राग्निवायूनां मण्डलानि प्रचक्षते ॥ ३९० ॥
स्वातीचित्रे नुफाहस्तौ मृगाश्विन्यौ पुनर्वसू ।
वायव्यं मण्डलं तस्य सप्ताहाद् रूपदर्शनम् ॥ ३९१ ॥

धूमाकुलाशे नभसि वायुर्भौमं रजः क्षिपन् ।
द्रुमांश्च विरुजन् याति रविर्मन्दप्रभो भवेत् ॥३९२॥

पुष्याग्नेयविशाखाजभरणीभाग्यपित्र्यभम् ।
आग्नेयं मण्डलं तस्य सप्ताहाद्रूपदर्शनम् ॥ ३९३ ॥

अत्युष्णवायुसंचारस्तारोल्कापतनं दिवः ।
दिग्दाहः सन्ध्ययोर्नित्यमादीप्तमिव खं भवेत् ॥३९४॥

रौहिणैन्द्रे वैश्वमैत्रे धनिष्ठा श्रवणाभिजित् ।
ऐन्द्रं तु मण्डलं तस्य सप्ताहाद् रूपदर्शनम् ॥ ३९५ ॥

प्रचलन्तस्तडित्वन्तः सर्वतः पर्वता इव ।
गभीरनादा वर्षन्ति गवलालिकुलाहिभाः ॥ ३९६ ॥

श्लेषार्द्धे आप्यरेवत्यौ मूलार्हिर्बुध्न्यवारुणम् ।
वारुणं मण्डलं तस्य सप्ताहाद् रूपदर्शनम् ॥ ३९७ ॥

बहुला मधुरारावा नीला भिन्नाञ्जनत्विषः ।
विद्युदुज्ज्वासिता मेघा वर्षन्त्यासारवर्षिणः ॥ ३९८ ॥

वायव्ये भूमिकम्पे तु जलसस्यौषधिक्षयः ।
पीडा मत्स्ये दशार्णे च सौराष्ट्रे मगधे कुरौ ॥ ३९९ ॥

आग्नेये भूमिकम्पे तु मेघतोयाशयक्षयः ।
पीडा कलिंगवंगांगबाह्लीकद्रविड़ाश्मके ॥ ४०० ॥

यथेष्टे जायते वृष्टिर्भूकम्पे त्वैन्द्रमण्डले ।
पीडा काश्यां सुवास्तौ च मालवार्बुदपौरवे ॥ ४०१ ॥

वारुणे भूमिकम्पे तु महावृष्टिं प्रचक्षते ।
चैदि-गोनर्द-वैदेह-किरात-कुकुरक्षितम् ॥ ४०२ ॥
हन्यते फलमन्योयं भिन्ने वेलाभमण्डले ।
ऐन्द्रवारुणयोर्वेगे सुभिक्षं दृष्टिरुत्तमा ॥ ४०३ ॥

इति प्रकीर्णकाधिकारः ।

सर्वशेषः ।

उल्का निर्घातभूकम्पा दिग्दाहः खपुरं रजः ।
उपरागो महावातः फलदा मण्डलाश्रयात् ॥ ४०४ ॥
चतुर्भिरनिलः पक्षैः पाकमेति त्रिभिः शिखी ।
सप्ताहाद्वासवः सद्यो वरुणोऽनुक्तकालके ॥ ४०५ ॥
प्रत्यर्कः परिवेषोऽभ्रं चापो मोघास्तडिद्रजः ।
सद्यस्त्र्यहे वा सप्ताहे फलदाः परिघादयः ॥ ४०६ ॥
वायुः कम्पयति द्रोणीं योजनानां शतद्वयम् ।
अशीति-षष्टिद-श-युक्छतं पार्श्वान्द्रवन्हयः ॥४०७॥
सन्ध्यैकं योजनं भाति त्रीण्युपार्कौ धनुर्दश ।
निर्घोषपरिवौ पंच परिवेषस्तडिच्च षट् ॥ ४०८ ॥
उल्कानिपतने संख्या योजनानां न विद्यते ।
एतानि यत्र दृश्यंते फलं तत्रैव कुर्वते ॥ ४०९ ॥

इति दिव्यलक्षणाध्यास्तृतीयः ॥

अथ शाकुनाध्यायः । तत्कालाध्यायः ।

अथ सद्योलक्षणाध्यायः ।

हस्ती सशुण्डादादाय जलमघ्राय यच्छति ।
वातप्रेरितमभ्रं तु काले स्थानेऽभिवर्षति ॥ १ ॥
तज्ज्ञानाय निमित्तं स्याद्बहुभेदं चतुर्विधम् ।
पार्थिवं चान्तरिक्षं च दिव्यं मिश्रमिति क्रमात् ॥ २ ॥

दैवनिमित्ताधिकारः—

दृष्टिः प्रश्नार्थशकुने श्यामगोघटदर्शनम् ।
स्त्रियां वा श्यामवस्त्रायां दृष्टायां दृष्टिमादिशेत् ॥ ३ ॥
जलासन्नो जलं वार्द्रं स्पृशन् यच्छति तत्क्षणे ।
श्रूयते जलशब्दो वा नचिराद् वर्षणं वदेत् ॥ ४ ॥
दृष्टिं ब्रूयात् प्रश्नकाले वामतः स्वरसञ्चरे ।
अनावृष्टिं वदेत्तत्र दक्षिणस्वरसञ्चरे ॥ ५ ॥
पञ्चांगुलिस्पर्शनेऽपि यद्यंगुष्ठं जनः स्पृशेत् ।
तदा दृष्टिस्तु महती सावित्रीस्पर्शनेऽल्पिका ॥ ६ ॥
तत्कालघटिकद्विघ्ना त्रिहतैकेन सत्वरम् ।
द्वाभ्यां किञ्चिद्विलम्बेन शून्यशेषे त्ववर्षणम् ॥ ७ ॥

इति प्रश्नशकुनं नाम मिश्रनिमित्ताधिकारः ।

दिव्यनिमित्ताधिकारः ।

वर्षतौ वर्षणप्रश्ने तोयलग्नेऽथ तोयभे ।
केन्द्रे शुभेक्षिते चन्द्रः शुक्रो वा वर्षति द्रुतम् ॥ ८ ॥

लग्ने वा जलराशिस्थे चन्द्रे वा स्याद्ह्रदकम् ।
मश्नलग्ने शिलादृष्टिः शनिज्ञशशिभिः स्थितैः ॥ ९ ॥

मश्नलग्नगते भौमे विद्युल्लसति चञ्चला ।
घनगर्जनसंयुक्ता वृष्टिर्भवति भूयसी ॥ १० ॥

लग्ने चन्द्रः कुजः शुक्रः शनिश्च सहिता यदि ।
सवाता करकावृष्टिर्विद्युच्चलति सर्वतः ॥ ११ ॥

पूर्णेन्दुबुधशुक्रेज्यैर्बलिभिः क्रूरवर्जितैः ।
केन्द्रस्थकर्कमकरमीनगैर्वृष्टिमादिशेत् ॥ १२ ॥

त्रिभागवृष्टिर्लग्नस्थजलराशिगतैर्ग्रहैः ।
अनावृष्टिस्तु केन्द्रस्थसजला जलराशिगैः ॥ १३ ॥

पादेन वृष्टिरक्रूरै. शुभैर्लग्ने च कण्टके ।
शुष्कलग्नगतैः क्रूरैर्वृष्टिरोधं विनिर्दिशेत् ॥ १४ ॥

सर्वे ग्रहाश्चरे राशौ द्वादशैः प्रहरैर्जलम् ।
जलराशौ लग्नगते सद्यो वृष्टिः शुभैर्युते ॥ १५ ॥

धने सौम्ये चरे लग्ने मासाद् वृष्टिः स्थिरोदये ।
द्विर्द्वादशदिनैर्द्विश्च भावे षट् त्रिंशता दिनैः ॥ १६ ॥

लग्नाद् द्विके त्रिके वापि जलराशिर्भवेद्यदि ।
जलखेटोऽपि तत्रैव जलपातस्तदा ध्रुवम् ॥ १७ ॥

द्वितीये वा तृतीये वा लग्ननाथः शुभान्वितः ।
सप्तविंशदिने लग्नान्नदीपूरप्रवर्षणम् ॥ १८ ॥

सुधांशुबुधशुक्रेज्यैर्लग्नात्तुर्यगृहस्थितैः ।
शुभः कालो महावृष्ट्या तत्र देशे भविष्यति ॥ १९ ॥

प्रश्नलग्नाच्चतुर्थस्थौ शनिराहुयुतौ यदि ।
भयंकरं तु दुर्भिक्षं तत्र वर्षे भवेत्तदा ॥ २० ॥

सुखेऽष्टमे सप्तमे वा चन्द्रार्काभ्यां सितार्किजैः ।
वर्षासु वृष्टयै दुश्चिक्यद्वितीयस्थौ च लग्नतः ॥ २१ ॥

चतुर्णामपि केन्द्राणां मध्ये यत्र शुभा ग्रहाः ।
तस्यां दिशि सुनिष्पत्तिः सुभिक्षं च प्रजायते ॥ २२ ॥

यस्यां दिशि शनिर्दृष्टः क्रूरश्चात्र गृहे स्थितः ।
दिशि तस्यां तु दुर्भिक्षं भविष्यति न संशयः ॥ २३ ॥

अस्मदीये पुनः क्षेत्रे वृष्टिर्भव्या भविष्यति ।
एष प्रश्नो बुधैश्चिन्त्यो लग्ने व्योम्नि चतुर्थके ॥ २४ ॥

मूषका शलभा वृष्टौ तुलसिंहवृषोदये ।
मृगमेषालिकुम्भेषु वायुवह्नीलिकादयः ॥ २५ ॥

युग्ममीनधनुः स्त्रीषु शलभाः कृमिकर्तराः ।
कर्कटे जलशीतार्तिरल्पा तु स्वामिदर्शनात् ॥ २६ ॥

सस्याधिक्यं लग्नबलात् क्षेत्रसम्पच्चतुर्थतः ।
खबलात् कर्मसाफल्यं शुभग्रहबलं बलम् ॥ २७ ॥

चतुर्थे चन्द्रशुक्राद्यैर्महावृष्टिः प्रतीयते ।
तत्र क्रूरैरनावृष्टिर्भवतीति वदन्ति हि ॥ २८ ॥

खमध्ये शुभखेटाभ्यां विवाहादौ तु वर्षणम् ।
लग्ने त्रिभिः शुभैर्दृष्टिर्महतीति विनिर्दिशेत् ॥ २९ ॥

इति प्रश्नज्यौतिषम् ॥

दक्षिणायनवेलायां कन्यामिथुनमीनगैः ।
दृष्टिः सितज्ञचन्द्रेज्यैः स्वल्पा शनिकुजागुभिः ॥ ३० ॥
कर्के वृषे वा शुक्रे ज्ञे जीवेन्दोर्मीनकन्ययोः ।
शुक्रे ज्ञे मिथुनेऽजे वा चपे चन्द्रेज्ययोः सतोः ॥ ३१ ॥
पापैस्तुलालिसिंहस्थैः दृष्टिर्याम्यायनादिगैः ।
कर्के वृषे शनौ भौमे द्वन्द्वेऽगौ चाल्पवर्षणम् ॥ ३२ ॥
शुभाशुभग्रहैर्मिश्रैः फलं मिश्रं प्रजायते ।
सूर्ये क्रूरान् गुरुः पश्येत्तदा दृष्टिः सुमध्यमा ॥ ३३ ॥

इत्ययनज्यौतिषम् ॥

यद्यग्रतः पृष्ठतो वा ग्रहाः सूर्यसमीपगाः ।
तदा दृष्टिं प्रकुर्वन्ति न ते चेत् प्रतिलोमगाः ॥ ३४ ॥
ज्ञशुक्रयोस्तु संयोगे ज्ञगुर्वोर्गुरुशुक्रयोः ।
जलं पतति वायुर्वा वह्निर्वा यमभौमयोः ॥ ३५ ॥
शुक्राद् सप्तमगश्चन्द्रस्त्रिकोणे सप्तमे शनेः ।
जलराशिस्थितः शुक्रदृष्टो वा वर्षति द्रुतम् ॥ ३६ ॥
गुरोः सप्तमराशिस्थः प्रत्यग्रो भृगुजो यदि ।
तदातिवर्षणं भूरि प्रावृट्काले बलोज्झिते ॥ ३७ ॥

(नारदः)

सुखेऽष्टमे सप्तमे वा चन्द्रार्काभ्यां सितार्कजौ ।
वर्षासु हृष्टयै दुश्चिक्यद्वितीयस्थौ न लग्नतः ॥ ३८ ॥

इति ऋतुज्यौतिषम् ।

इति दैवनिमित्तकसद्योवर्षाधिकारः ॥

दिविष्ठनिमित्ताधिकारः ।

"प्रावृट्काले यदा सूर्यः प्रखरो दुःसहो भवेत् ।
तद्दिने वृष्टिदः प्रोक्तो घृतवर्णसमप्रभः ॥ ३९ ॥"

(मयूरचित्रे)

अतिदीप्त्या दुर्निरीक्ष्यो भास्वानुदयकालिकः ।
द्रुतस्वर्णनिभः स्निग्धवैदूर्यमणिसप्रभः ॥ ४० ॥
मलपत्यतितीक्ष्णस्तु खमुच्चैरपि वा गतः ।
तदहन्येव कुरुते दर्षाकाले सुवर्षणम् ॥ ४१ ॥
उदयेऽस्तमये वापि विवर्णोऽर्कोऽथवा शशी ।
मधुवर्णोऽतिवायुश्चेदतिवृष्टिर्भवेत्तदा ॥ ४२ ॥
अमोघकिरणा भानोः सन्ध्यायामुच्छ्रिता यदि ।
भूसमं रसते मेघस्तन्महावृष्टिलक्षणम् ॥ ४३ ॥
कपोतशुकवद्वृत्तुल्यः शशी मधुनिभोऽपि वा ।
अतिचन्द्रो यदि व्योम्नि न चिरात्तर्हि वर्षति ॥ ४४ ॥
वृष्टयै चन्द्रपरीवेषाः कृकवाकुवृशा समाः ।
विपत्तितिरपक्षाभमेघाच्छन्नं च वृष्टये ॥ ४५ ॥

परिवेषो भवेच्चन्द्रे तारा स्युस्तीव्रतेजसः ।
मेघास्तितिरपक्षाभा ध्रुवं वर्षति वारिदः ॥ ४६ ॥
दिशस्तु विमला वृष्ट्यै काकाण्डाभं नभो यदि ।
वातावरोधागमनं गोनेत्राभं च वृष्टये ॥ ४७ ॥
उदेति प्रखरः सूर्यो गौराभासं तथाम्बरम् ।
प्रफुल्लिता च सन्ध्या स्यादतिवृष्टिर्भविष्यति ॥ ४८ ॥
रात्रौ नागा झलत्कारः प्रातश्चात्यरुणो रविः ।
अवृष्टौ शक्रचापश्च सद्यो वृष्टिस्तदा भवेत् ॥ ४९ ॥
प्रभाते पश्चिमायां चेदिन्द्रचापः प्रदृश्यते ।
वारुणैश्चैव नक्षत्रैः शीघ्रं वर्षति वासवः ॥ ५० ॥
नीलच्छायाऽभ्रके वृष्ट्यै रवेः परिधिकुण्डले ।
यदि विद्युद्दिवैशान्यां तदा बहुजलं पतेत् ॥ ५१ ॥
रोहितं कुण्डलं विद्युत् प्रत्यर्कः परिघो धनुः ।
उदयेऽस्तमये दृष्टा वर्षन्ति न चिराद्बहु ॥ ५२ ॥
श्रावणे गर्जिते प्रातर्नीरोपरि झषभ्रमः ।
तदाष्टादशयामात् प्राग्जलैः पूर्णा मही भवेत् ॥ ५३ ॥
दक्षिणः प्रबलो वातः सकृदेव प्रजायते ।
वारुणे तत्र नक्षत्रे शीघ्रं वर्षति वासवः ॥ ५४ ॥
धूम्रिताः स्युर्दिशः सर्वाः पूर्ववाते भवत्यपि ।
चतुर्यामान्तरे मेघः सरांसि परिपूरयेत् ॥ ५५ ॥

स्तनितं निशिशोणाभा दिवा विद्युच्च दण्डवत् ।
शीतलः पवनः प्राच्यां न चिरात्तर्हि वर्षति ॥ ५६ ॥

सन्ध्याकाले च ये मेघाः पर्वताकारसंनिभाः ।
आदित्यास्तंगमेतर्हि यामानष्टौ प्रवर्षणम् ॥ ५७ ॥

पूर्वस्यां वार्दलं धूम्रं सूर्यास्ते याति कृष्णताम् ।
उत्तरस्यां मेघमाला शीघ्रं वर्षा प्रवर्तयेत् ॥ ५८ ॥

प्रभाते निर्मला आशा मध्याह्ने ताप आतपः ।
अर्द्धरात्रे तदा वृष्टिः प्रजातोषाय जायते ॥ ५९ ॥

अतिवातं च निर्वातमत्युष्णमतिशीतलम् ।
अत्यभ्रं च निरभ्रं च षड्विधं मेघलक्षणम् ॥ ६० ॥

निर्वातमतिवातं वा सर्ववातं सहोष्मणा ।
जनयन् परितो जातो ध्रुवं वर्षति वारिदः ॥ ६१ ॥

वर्षाकालसमारम्भे दक्षिणस्यां प्रजायते ।
वायुर्वा वार्दलं विद्युद् ध्रुवं वर्षति वारिदः ॥ ६२ ॥

तिष्ठन्ति शनिवारान्तं शुक्रवारोदिता घनाः ।
अवृष्ट्वा नैव गच्छन्ति ध्रुवं वर्षन्ति वारिदाः ॥ ६३ ॥

उत्तरस्यां घटाटोपः पूर्वतो वायुसञ्चरः ।
तदावश्यं भवेद्वर्षमवृष्ट्वा नैव गच्छति ॥ ६४ ॥

परावर्त्यान्यतो वायुः पूर्वतो यदि संचरेत् ।
यदि तत्र घटाटोपो ध्रुवं वृष्टिर्भविष्यति ॥ ६५ ॥

पूर्वस्यां स्पन्दते विद्युद्वायुर्वाऽभ्रपूर्वतः ।
चातको रौति सोत्कंठमकस्मादु बहु वर्षति ॥ ६६ ॥
यद्यम्बरं बहुपटैरभ्रैः सर्वं समावृतम् ।
परितः पवनः स्तब्धो न चिराद् बहु वर्षति ॥ ६७ ॥
अत्युष्मणा व्याकुलता सर्वतो जलदोदयः ।
प्रतिकूलो न चेद् वायुर्न चिरात्तर्हि वर्षति ॥ ६८ ॥
सर्वरात्रस्थिरो मेघः प्रभाते यदि गर्जति ।
अत्युष्मणा व्याकुलत्वे बहुगात्रे स वर्षति ॥ ६९ ॥
बार्दलैरभिसंमर्दो बार्दलानां यतस्ततः ।
सर्वतो द्वित्रयामान्ते घटाटापो भविष्यति ॥ ७० ॥
सायं बहुपुटास्तुल्याः केकिचापजपांशुकैः ।
जलजन्तुर्मिगिरिभिर्वर्षन्ति न चिरात् घनाः ॥ ७१ ॥
पश्यन्तधवला नीलाः स्निग्धा नैकपुटा घनाः ।
यान्तः प्राचीं प्रतीचीं वा वर्षंति न चिराद् बहु ॥७२॥
चित्रास्तित्तिरपक्षाभा उदयेऽस्तमये घनाः ।
दृश्यन्ते चेदहोरात्रं वर्षन्ति न चिराद् बहु ॥ ७३ ॥

इति दिविष्टनिमित्ताधिकारः ।

भूमिष्ठ निमित्ताधिकारः ।

घटस्थं जलमुष्णं स्याद् सर्वा ऊर्ध्वमुखा लताः ।
निर्गच्छेत् कुङ्कुमं तेजः स्नानं कुर्वन्ति पक्षिणः ॥७४॥

सायं रटति गोमायुः सप्ताहं दुर्दिनं यदि ।
खद्योतो जलदासन्नं निशि याति सुवृष्टये ॥७५॥
नयत्यण्डानि चेदुच्चैर्निराबाधे पिपीलिकाः ।
पिपीलिकाः शिरश्छन्ना भविष्यद्वृष्टिसूचिकाः ॥७६॥
द्रुमादिरोहः सर्पाणां व्यवायः सर्पयोस्तथा ।
गवां प्लुतं मतीन्दुश्च भविष्यद्वृष्टिसूचिकाः ॥ ७७ ॥
गोमये चोत्कराः कीटाः परितापोऽतिदारुणः ।
चातकानां रवौ दृष्टिः सद्यो वृष्टिं प्रचोदयेत् ॥ ७८ ॥
धूमिताः निविडाः शैलाश्चर्मादिषु तथार्द्रता ।
अम्लं तु तर्कं जायेत न चिरात्तर्हि वर्षति ॥ ७९ ॥
जलं चेत् विरसं मीनाः पोप्लुयन्ते स्थलानुगाः ।
बहूच्चैर्भेकनिर्ह्रादा न चिरात्तर्हि वर्षति ॥ ८० ॥
विलिखन्ति नखैर्भूमिं मार्जाराः सुभृशं तथा ।
लोहकिट्टं विसृगन्धि न चिरात्तर्हि वर्षति ॥ ८१ ॥
गिरयोऽञ्जनपुञ्जाभा वाष्पमोद्वारिकन्दराः ।
वाष्परुद्धगुहा वापि न चिरात् तर्हि वर्षति ॥ ८२ ॥
कुकलासास्तरुशिरःस्थिताः पश्यन्ति खं बहु ।
गावो रविमुदीक्ष्यन्ते न चिरात्तर्हि वर्षति ॥ ८३ ॥
पशवः कुक्कुराश्चापि धुन्वन्ति श्रवणान् खुरान् ।
नेच्छन्ति निर्गमं गेहान्न चिरात्तर्हि वर्षति ॥ ८४ ॥

गृहाणां पटले स्थित्वा यदि श्वानो दिवोन्मुखाः ।
उदीक्षन्ते शंकितास्या न चिरात्तर्हि वर्षति ॥ ८५ ॥
..... ॥ ८६ ॥
पक्षौ प्रसार्य्य तिष्ठन्ति वका यदि यतस्ततः ।
सर्वतो द्वित्रयामान्ते घटाटोपो भविष्यति ॥ ८७ ॥
द्रुमारूढा हि चीत्कारा भेका गम्भीरनादिनः ।
दिनत्रयान्तरे तत्र देवो गर्जिष्यति ध्रुवम् ॥ ८८ ॥
चटका रजसि स्नाति पयसि स्नाति टिट्टिभः ।
अत्युग्रं चातको ब्रूते ध्रुवं वर्षति वासवः ॥ ८९ ॥
नवनीतद्रवः कुम्भ्यामहिफेनगुडद्रवः ।
लवणं विक्रियां याति ध्रुवं वर्षति वासवः ॥ ९० ॥
बहुकालमजा तिष्ठेत् पवनाभिमुखी यदि ।
क्षुद्रसर्पा द्रुमारूढा ध्रुवं वर्षति वासवः ॥ ९१ ॥
क्षुद्राणां कुड्मला दग्धा अर्कादौ कुड्मलोदयः ।
वटशाखाः सुरुङ्गाः स्युर्ध्रुवं वर्षति वारिदः ॥ ९२ ॥
सार्द्रस्निग्धमृदुः श्मश्रुपाणिनोऽत्युष्णाऽकुलाः ।
आलस्यं श्लथता निद्रा ध्रुवं वर्षति वारिदः ॥ ९३ ॥
गोमये कृमयो भृङ्गं पत्तयोर्भम्भलायितम् ।
कृकलासा रक्तभासा ध्रुवं वर्षति वारिदः ॥ ९४ ॥
चातका वा मयुरा वा रुवन्ति बहुफेरवाः ।
निशीथे कुक्कुटारावा ध्रुवं वर्षति वारिदः ॥ ९५ ॥

मक्षिका बहु सर्पंति भ्रमंति भ्रमरा बहु ।
नयन्ति गोशकृत्पिंडं ध्रुवं वर्षति वारिदः ॥ ९६ ॥
किट्टमुत्पद्यते कांस्ये व्याकुला जलजन्तवः ।
नाडिकास्फुष्णता तोये ध्रुवं वर्षति वासवः ॥ ९७ ॥
स्नुहीपत्रेषु दृश्यन्ते यत्र तत्रांगरोदयाः ।
वृष्टिभावकवायूनां विद्यात्तत्रागमं तदा ॥ ९८ ॥
अच्छिद्रस्निग्धपत्रा हि वृक्षा गुल्मा लता यदि ।
दृश्यन्ते सर्वतस्तर्हि निर्दोषा वर्षवायवः ॥ ९९ ॥
उद्गाढनिद्रो दृश्येत पित्तप्रकृतिको नरः ।
वृष्टिभावकवायूनां विद्याद्तत्रागमं तदा ॥ १०० ॥
वातपित्तप्रधानानां भूरि भ्रमति चेच्छिरः ।
वृष्टिभावुकवायूनां तीव्राणामागमस्तदा ॥ १०१ ॥
लेखनीयोगतः पत्रे प्रसरत्येव चेन्मसी ।
केशाश्छुष्यति वा तर्हि भावको वायुरागतः ॥ १०२ ॥

इति भूमिष्ठनिमित्ताधिकारः ।

अनावृष्टि हेतवः.

उल्कापातो दिशां दाहो निर्घातः पांशुवृष्टयः ।
इन्द्रायुधं खेटयुद्धं पडेते वृष्टिघातकाः ॥ १०३ ॥
नैर्ऋतं पश्चिमोवायुर्नाडयापः शीतनिर्मलाः ।
दशाहानि तदा तत्र वर्षाणां न भविष्यति ॥ १०४ ॥

प्रभातेऽभ्रघटाटोपो मध्यान्हे प्रखरो रविः ।
सायं तु शीतलो वायू रात्रौ तारा न वर्षति ॥ १०५ ॥
दिवा घनघटाटोपो रात्रौ विपलमम्बरम् ।
दुर्भिक्षलक्षणं ज्ञेयं न देवस्तत्र वर्षति ॥ १०६ ॥
संपन्नाऽप्युत्तरप्रान्ते साध्वी धनघटा छटा ।
अदृष्टैव विलीयेत मारुतो यदि दक्षिणः ॥ १०७ ॥
संवृत्तायां झटीवृष्टौ वायुश्चरति पश्चिमः ।
यदि चेन्द्रधनुर्व्योम्नि तदा श्वभ्रं विलीयते ॥ १०८ ॥
आर्द्रायां च भरण्यां च रोहिण्यां उत्तरात्रये ।
मघायां मंगलो यावत्तावद्देवो न वर्षति ॥ १०९ ॥
रोहिणी दुर्ग्रहा यावद्रक्षो यावदहस्करः ।
यावच्च सन्ति दुर्योगास्तावद्देवो न वर्षति ॥ ११० ॥
यावत्काकोदरा मेघा यावच्चंद्रसमो रविः ।
यावत्नैर्ऋतो वायुस्तावद्देवो न वर्षति ॥ १११ ॥
प्रातस्तृणाग्रे मुक्तावद् भान्ति नीहारबिन्दवः ।
वातश्च शीतलो वाति तदा प्रावृट् समाप्यते ॥ ११२ ॥

इत्यनावृष्टिलक्षणम् ।

इति सद्यो लक्षणाध्यायश्चतुर्थः ।

अथ ग्रहयोगाध्यायः

पलेशाः स्युः शनिर्ज्ञोऽर्को गुरुरिन्दुर्भृगुः कुजः ।
होरेशाश्च शनिर्जीवो भौमोऽर्कोऽच्छो बुधः शशी ॥१॥

वारेशाः शनिसूर्येन्दुभौमज्ञगुरुभार्गवाः ।
मासेशास्तु शशी ज्ञोऽच्छो रविर्भौमो गुरुः शनिः ॥ २ ॥
वर्षेज्ञाः शनिरारोच्छश्चन्द्रो जीवो रविर्बुधः ।
मेषार्कदिवसे वारा वारेशैर्लुप्ततुर्यकैः ॥ ३ ॥
चन्द्रो बुधश्च शुक्रश्च त्रयोऽप्यन्तर्ग्रहा इमे ।
बहिर्ग्रहास्त्रयोऽप्येवं शोणितश्चांगिरा यमः ॥ ४ ॥
गुरुः शुक्रश्च चन्द्रश्च बुधश्चेति शुभग्रहाः ।
शनिश्च मंगलश्चार्कस्त्रयः क्रूरग्रहा इमे ॥ ५ ॥
आर्द्रं चतुर्ग्रहं जीवशनिशुक्रनिशाकरम् ।
त्रयः शुष्कग्रहा उक्ताः बुधः सूर्यश्च मंगलः ॥ ६ ॥
रूक्षौ भौमशनी स्निग्धा गुरुशुक्रदिवाकराः ।
द्विधर्मिणौ चन्द्रचान्द्री योगिदृष्टग्रहानुगौ ॥ ७ ॥
शीतं चतुर्ग्रहं सौम्यशनिशुक्रनिशाकरम् ।
मंगलद्युमणी तूष्णौ शीतोष्णसुहृदस्पतिः ॥ ८ ॥
शर्निर्बृहस्पतिः सौम्यो वायुप्रकृतिकास्त्रयः ।
शोषप्रकृतिको भौमः स्नेहप्रकृतिकाः परे ॥ ९ ॥
पुंग्रहा गुरुभौमार्काः स्त्रीग्रहौ शशिभार्गवौ ।
नपुंसकौ शनिबुधावौष्ण्यशैत्यादिकल्पनात् ॥ १० ॥
शुक्रो निसर्गतो वृष्ट्यै निग्रहाय निमिचत्तः ।
शोणितो निग्रहायैव वर्षणाय निमिचतः ॥ ११ ॥

शुक्रश्च शोणितश्चैतौ परीक्ष्यौ जीवनोदये ।
जीवनं हि तदायत्तं तदुपोद्बलकाः परे ॥ १२ ॥
वायुं बुधशनी शुक्रगुरू जनयतो जलम् ।
मंगलश्चमणी घर्मं स्वभावादिति चक्षते ॥ १३ ॥
शनिः पूर्वं गुरुः पूर्वोत्तरं भौमस्तु पश्चिमम् ।
शुक्रस्तु दक्षिणं वायुं संचारयति योगतः ॥ १४ ॥
शनिर्गुरु घनं शीतं रूक्षं वायुं प्रवाहयेत् ।
आर्द्रं तु शीतलं शुक्रो मंगलो रोगकारकम् ॥ १५ ॥
नात्युष्णं नातिशीतं च गुरुरार्द्रं प्रवाहयेत् ।
चन्द्रश्चान्द्रिश्च संयुक्तदृष्टखेटानुसारतः ॥ १६ ॥
अभ्रं प्रचण्डवातं च शनिः सम्पादयत्यपि ।
शीततौं विन्दुपाताय ग्रीष्मतौं शुक्र उष्मणे ॥ १७ ॥
उल्कापाततडित्गर्जाधुत्पातं जनयेत्कुजः ।
ऋतुं जनयते जीवः सर्वेषां सुप्रसादकम् ॥ १८ ॥
येन येन ग्रहेणायं सन्निधत्ते सुधाकरः ।
तत्स्वभावानुसारेण फलं दत्ते तदा तदा ॥ १९ ॥

इति ग्रहाणां स्वभावाधिकारः ।

अष्ट विकाराः ।

वर्णोऽयनगती वक्रमुदयोऽस्तं च मण्डलम् ।
राशिर्नक्षत्रमित्येतैः फलमादिश्यते ग्रहे ॥ २० ॥

भौमेऽयने संक्रमे च बुधो जीवस्तथोदये ।
शुक्रोऽस्तगमने वृष्टिं करोति च शनिस्त्रिषु ॥ २१ ॥
गच्छन्नुदयमस्तं वा बुधः शुक्रश्च वर्षति ।
शुक्रोदये ग्रहा अस्तं गता वर्षन्ति भूरिशः ॥ २२ ॥
गुरुणा यदि दृष्टः स्यादुच्चस्थमयन ग्रहः ।
पूर्णां पादोनदृष्ट्यः वा तदा वर्षति नान्यथा ॥ २३ ॥
जलनाडीगताः सर्वे संगमे चोदयास्तयोः ।
अयने संक्रमे वक्रमार्गयोर्वृष्टिहेतवः ॥ २४ ॥
आर्द्रादिषु भवते सूर्ये दृष्टः प्रायेण जायते ।
ग्रहाणामुदयेऽस्ते च संगमे मण्डलान्तरे ॥ २५ ॥
एकराशौ शुक्रशन्योरन्यभावाऽतिदुःखदः ।
क्रूराः शुभाः स्युर्वक्रस्थे वक्रत्वेऽपि गुरुः शुभः ॥ २६ ॥
अतिचारगताः क्रूराः कुर्वते स्वल्पवर्षणम् ।
अवर्षणं तु कुर्वन्ति यदि शीघ्राः शुभग्रहाः ॥ २७ ॥
क्रूरैर्वक्रैरतिदृष्टैर्वृष्टिरेकैः शुभग्रहैः ।
क्रूरं वक्रं गते सौम्ये शीघ्रे घोरमवर्षणम् ॥ २८ ॥
अतीचारगते जीवे शनौ वक्रत्वमागते ।
आत्यन्तिकयुतत्वनादृष्ट्या पृथ्वी सर्वत्र शुष्यति ॥२९॥
वक्रीभूत्वा यदा शुक्रं बुधस्त्यजति कर्हिचित् ।
तदा वर्षति पर्जन्यः सप्त वाहानि पंच वा ॥ ३० ॥

इत्थं वैकारिका देशा उक्ताः साधारणा हि ये ।
मतिग्रहं विशेषेण वैकारिकमयवे ॥ ३१ ॥

इति साधारणवैकारिकाधिकारः ।

शनिः ।

विपुलो विमलस्निग्धः शनिर्नीलमणिप्रभः ।
वाणातसी प्रसूनाभः शुभो रूक्षस्तु नेष्टकृत् ॥ ३२ ॥
दक्षिणे पथि दुर्भिक्षं सुभिक्षं तूत्तरे पथि ।
कृत्तिकायास्तु रोहिण्या उत्तरोऽप्यशुभः शनिः ॥३३ ॥
सप्रदक्षिणमृक्षाणां सुभिक्षं कुरुते चरन् ।
संचरन्नपसव्यं तु दुर्भिक्षाय शनिश्चरः ॥ ३४ ॥
हस्ता स्वाती भरण्यार्द्रा श्रवणा पूर्वफाल्गुनी ।
शनिः स्निग्धश्चरन्नाशु वर्षति प्रचुरं जलम् ॥ ३५ ॥
श्लेषा शताभिषज्ज्येष्ठा स्वल्पवृष्टिकरः शनिः ।
घोरा वृष्टिकरो मूले रेवत्युत्तरभाद्रयोः ॥ ३६ ॥
चित्राराधाऽनुराधासु पूर्वाषाढधनिष्ठयोः ।
पुनर्वसु मघा पुष्येष्ववग्रहकरः शनिः ॥ ३७ ॥
मूलश्रुत्योर्मध्यवृष्टिः सुवृष्टिर्मृगचित्रयोः ।
मन्दवृष्टिः प्रोष्ठपदे हस्ते पुष्ये च वारुणे ॥ ३८ ॥
अनावृष्टिर्मघा श्लेषा कृत्तिकारेवतीषु च ।
विशाखायां शनौ पूर्वं वृष्टिः पश्चादवर्षणम् ॥ ३९ ॥

भरण्यां श्रावणे वृष्टिर्नैत्युक्तं रुद्रयामले ।
विसंवादं प्रमाणं स्यात् प्रत्यक्षं युक्तिमच्च यत् ॥ ४० ॥
मंगलश्च शनिः शुक्रो धनिष्ठायां स्थिता यदि ।
गर्जन्तोऽपि न वर्षन्ति पयोबिंदुं पयोधराः ॥ ४१ ॥
धनिष्ठायां शनिर्यत्र मंगलेनैव युज्यते ।
तदापि वर्षणं नास्ति सस्यहानिश्च जायते ॥ ४२ ॥
विश्वशमि भगेमन्दः सप्तमर्क्षे यदा रविः ।
तदा जलविनाशः स्यात् प्रजानां कदनं महत् ॥ ४३ ॥
शनिर्दुष्टो धनुर्मीनकन्यायुग्मवृषस्थितः ।
अतिदुष्टमाचष्टे तुलाबृश्चिकयोरपि ॥ ४४ ॥
सुभिक्षं मकरे कुम्भे मीने सर्वप्रजाक्षयः ।
गुर्जरेऽजे शनौ पीडा प्रभासे तु वृषस्थिते ॥ ४५ ॥
मरुस्थलेषु मिथुने कर्के काश्मीरमण्डले ।
इन्द्रप्रस्थे तु सिंहस्थे कन्यास्थे मालवे तथा ॥ ४६ ॥
तुलावृश्चिकचापेषु यदि याति शनैश्चरः ।
अनावृष्टिं तदा कुर्यात् पृथ्वीं दुर्भिक्षपीडिताम् ॥ ४७ ॥
अन्तर्वेदश्च विन्ध्याद्रिर्मकरे नर्मदातटः ।
कुम्भे तु पश्चिमो देशः पीड्यते गौतमीतटः ॥ ४८ ॥
मीने तु सर्वदेशोऽपि मेषस्थे यमुनातटः ।
वृषे च मिथुने गोदावरीतीरः प्रपीड्यते ॥ ४९ ॥

कर्के वर्गश्च सिंहे तु कान्यकुब्जः प्रपीड्यते ।
कन्यायां म्लेच्छदेशोऽपि तुलायामुत्तरापथः ॥ ५० ॥
वृश्चिके पूर्वदेशो वा कान्यकुब्जो धनुष्यपि ।
शनिना पीड्यते देश इत्युक्तं रुद्रयामले ॥ ५१ ॥
वक्रीभूत्वा शनिः पूर्वद्वारभेषु न वर्षति ।
दुर्भिक्षं कुरुते मीनकन्ययोर्वक्रतां गतः ॥ ५२ ॥
अस्तंगतस्तुले मीने सुवृष्टिं कुरुते शनिः ।
अवृष्टिं मिथुने कर्के सिंहकन्यामृगालिषु ॥ ५३ ॥
साधु वर्षति सर्वत्र मिथुनेऽस्तगतः शनिः ।
वृश्चिके वर्षति स्वल्पं मकरेऽस्तो न वर्षति ॥ ५४ ॥
मीनेऽस्तगमने साधुवृष्टिमेके विदो विदुः ।
परे त्वाहुर्वृष्टिं मांक्ष्यात् जलं वाप्यादिषु क्वचित् ॥५५॥
उदयं मिथुने मेषे शनिर्गच्छन् प्रवर्षति ।
कर्के तुले त्वनावृष्टिं विदध्यात्युदयादयम् ॥ ५६ ॥
मण्डलेषु च सर्वेषु संक्रमन्तं ग्रहं गुरुः ।
पूर्णं पश्यति पादोनं तत्र वृष्टिर्भविष्यति ॥ ५७ ॥

इति शन्यधिकरणम् ।

बृहस्पतिः ।

अकलषांशुजटिलः कुन्दस्फटिकसप्रभः ।
सत्पथानुगतः खेटैरहतश्च गुरुः शुभः ॥ ५८ ॥

अनावृष्टिं धूम्रनिभः प्रकरोति बृहस्पतिः ।
इषामादिवर्णविकृतिं गच्छन्नपि स नेष्टकृत् ॥ ५९ ॥
क्षेमारोग्यसुभिक्षाय भानामुत्तरतो गुरुः ।
अनिष्टकृद्दक्षिणतो मध्यतस्तु स मध्यमः ॥ ६० ॥
आच्छाद्य रोहिणीं तारःमारुह्य शकटं तथा ।
संचरन् गुरुरत्यन्तं प्रजःपीडाद्यनर्थकृत् ॥ ६१ ॥
कृत्तिकातो द्विभं कृत्वा चक्रं द्वादशधा भजेत् ।
एकादशं द्वादशं च पञ्चमं च त्रिभं नयेत् ॥ ६२
गुरूदयो यत्र भागे तन्नक्षत्रोपलक्षिताः ।
मासवद् द्वादशैव स्युर्गुरुचारेण वत्सराः ॥ ६३ ॥
क्षुदग्निभिः कार्तिकेऽब्दे मार्गे चात्यल्पवर्षणम् ।
पौषे माघे चाविशेषात् सुभिक्षं च सुवृष्टयः ॥ ६४ ॥
क्वचिद् वृष्टिः क्वचित् सस्यं क्वचिद् वृष्टिश्च फाल्गुने ।
चैत्रेऽब्दे मध्यमा वृष्टिर्वशाखे सर्वसस्यता ॥ ६५ ॥
ज्यैष्ठेऽब्दे तु वृषाषाढे सस्यं वृष्टिः क्वचित् क्वचित् ।
श्रावणे मध्यमा वृष्टिः सस्यं पूर्णं पुनः क्षयः ॥ ६६ ॥
भाद्रे सुभिक्षं दुर्भिक्षमतिवृष्टिः क्वचित् क्वचित् ।
आश्विने तु सुवृष्टिः स्यात् सर्वसस्यसमृद्धयः ॥ ६७ ॥
मूले मघायां रोहिण्यां रेवत्यां चोदिते गुरौ ।
एष्वेव च शनौ प्राप्ते दुर्भिक्षं जायते ध्रुवम् ॥ ६८ ॥

सुवृष्टिं कुरुते नक्रे कुम्भे मेषे गुरूदयः।
कर्के मीने धनुष्यलग्नगतोऽतिवृष्त्युदयः॥ ६९॥
माघफाल्गुनयोः खण्डवृष्टिः पौषे सुवृष्टयः।
मार्गशीर्षेऽल्पवृष्टिः स्याच्चूतक्षयो बहुवृष्टयः॥ ७०॥
आश्विने मध्यमा वृष्टिरवृष्टिर्ज्यैष्ठकार्तिके।
चैत्रे विचित्रवृष्टिः स्यात् वैशाखे तु सुभिक्षता॥७१॥
आषाढभाद्रयोर्हानिर्गुरोरुदयतः फलम्।
अस्तो गुरुः करोत्यल्पां वृष्टिं मिथुनमेषयोः॥ ७२॥
सुभिक्षं मीनकन्यास्तो दुर्भिक्षं तु वृषेऽस्तगः।
वक्रो जीवः सुभिक्षाय यत्र तत्र यदा तदा॥ ७३॥
रेवत्यार्द्रा मृगशिरः स्थितोऽनावृष्टिकृद् गुरुः।
अषाढा फाल्गुनी हस्ता मघासु तु सुवृष्टिकृत्॥ ७४॥
परे तु गुरुचारेऽस्मिन्नन्यथैव फलं विदुः।
त्रिभे यमाच्च विष्णोश्च मूलार्द्राश्विषु वृष्टिकृत्॥ ७५॥
अग्नेस्त्रिभेऽदितिश्लेषा मघाराधानुराधभे।
मध्यवृष्टिमनावृष्टिं कुरुते शेषभे गुरुः॥ ७६॥
परे तु गुरुचारेऽस्मिन्नन्यथैव फलं विदुः।
अनावृष्ट्यै भाद्रपदा श्लेषा शुष्यत्पुनर्वसू॥ ७७॥
कृत्तिका रोहिणी राधानुराधा मध्यवृष्टये।
मघा तु फल्गुनी हस्ता मृग्यार्द्रा च सुवृष्टये॥ ७८॥

मासद्वयं शाक्रमूले मासत्रयमषाढयोः ।
स्वार्तीचित्रे खण्डवृष्ट्यै गुरुयोगात् पराः शुभाः ॥७९॥
एकादश्यां मघाभ्यन् स्यात् सिंहं कन्यां तुलामपि ।
बृहस्पतिस्तदा नूनं प्रवर्षति महाजलम् ॥ ८० ॥
स्वल्पालिचापयोर्वृष्टिर्मध्या गोयुग्मकर्कटे ।
सिंहेऽतिवृष्टिः सद्वृष्टिः शेषराशिस्थे गुरौ ॥ ८१ ॥
सिंहेऽतिवृष्टयो मीनेऽनावृष्टिश्चापगे समा ।
कन्याजयोः सुवृष्टिः स्यात् गुरौ शेषेऽल्पवृष्टयः ॥८२॥
बृहस्पतिर्दिवाचापे निशि मीने फलाधिकः ।
सिंहे दशांशे विंशांशे मेषेऽसौ विफलो दिवा ॥ ८३ ॥

इति बृहस्पत्यधिकरणम् ॥

मंगलः ।

विपुलो विमलो भौमः किंशुकाशोकवच्छविः ।
शुभाय तप्ताम्राभो मार्गमुत्तरमाश्रितः ॥ ८४ ॥
अनृजुः पुरुषः श्यामो ज्वलितो धूमवान् शिखी ।
विवर्णो वामगो धत्ते मंगलोऽपि न मंगलम् ॥ ८५ ॥
धूमायन् सशिखो वापि पारिपात्रचलोपगान् ।
निहन्ति मंगलो देशान् ये च देशाः स्वभक्तिगाः ॥८६॥
नेष्टो भौमो मघां भिन्दन् विशाखां रोहिणीमपि ।
भौमो वृष्टिनिरोधाय रोहिण्या दक्षिणश्चरन् ॥ ८७ ॥

उष्णमश्रुमुखं व्यालं रक्ताक्ष्यमसि मौसलम् ।
भौमस्य पञ्चवक्त्राः स्युर्द्वितीयेन्त्येऽप्यवर्षणम् ॥ ८८ ॥
अष्टष्टिर्पंगले वक्रे पक्करेऽस्तः प्रवर्षति ।
मिथुनेऽस्तोऽल्पवर्षाय नान्यत्रास्तो विशेषकृत् ॥ ८९ ॥
कुम्भेऽतिवृष्टिर्वृष्टिस्तु चापे मीने त्ववर्षणम् ।
अवग्रहोत्तरा वृष्टिर्मकरे मंगलोदयात् ॥ ९० ॥
दास्रब्राह्मादित्यपित्र्यस्तेष्वेवं द्विदैवते ।
मूलश्रवणपूभासु मंगलस्योदयः शुभः ॥ ९१ ॥
यदा मलिम्लुचे राशि भौमो राश्यन्तरे व्रजेत् ।
गुरुर्वा महती वृष्टिरथवा लोकसंक्षयः ॥ ९२ ॥
पूर्यत्रये च रेवत्यामश्विन्यां हस्ततस्त्रिभे ।
वारुणे चानुराधायां मंगलः साधु वर्षति ॥ ९३ ॥
रोहिणी श्रवणा ज्येष्ठा मूलस्थश्चोत्तरास्थितः ।
मघार्द्रा भरणी स्वातीस्थितो भौमो न वर्षति ॥ ९४ ॥
मंगलः कर्कराशिस्थः सुवर्षति शुभेक्षितः ।
शुभैरयुक्तः सिंहे तु कन्यायां च न वर्षति ॥ ९५ ॥
मेषे दिवा वृश्चिके तु रात्रावधिकरोत्यथम् ।
जले प्रभवति प्रायः कर्के मीने च वृश्चिके ॥ ९६ ॥

इति मंगलाधिकारः । इति चतुर्ग्रहाः ।

—:o:—

शुक्रः ।

स्फुरद्बिम्बो निर्विकारो विपुलो दधिसप्रभः ।
शुभाय विजयी शुक्रो मार्गमुत्तरमाश्रितः ॥ ९७ ॥
मांजिष्ठाभः सुवर्णाभो घृतमण्डनिभो भृगुः ।
दधिप्रभो रौप्यनिभः सुवृष्टिं जनयिष्यति ॥ ९८ ॥
शुक्रस्ताम्रनिभो रूक्षो दिवादृष्टोऽप्यवृष्टिकृत् ।
वृषे कर्के तुले वक्रो मार्गीभूत्वा सुवर्षति ॥ ९९ ॥
नागो गजैरावतौ च वृषभो गोजरद्गवौ ।
मृगोऽजवैश्वानरजावुत्तरादक्षिणे स्थिताः ॥ १०० ॥
नवैता वीथयः कल्प्ता अश्विनादिभमण्डले ।
त्रिभिस्त्रिभिस्तु नक्षत्रैस्तासां मार्गास्त्रयस्त्रिकः ॥ १०१ ॥
ऐरावतः सौम्यमार्गो मध्यमार्गो जरद्गवः ।
वैश्वानरो याम्यमार्गो भागाः षोडश षोडश ॥ १०२ ॥
वृष्टिसस्यार्घकृच्छुक्रः शुभः सौम्यासु वीथिषु ।
वृष्टिः सस्यार्घनाशाय याम्ये पथि सवीथिषु ॥ १०३ ॥
उद्यन्नस्तमयन् शुक्रः शुभायोत्तरवीथिषु ।
मध्यासु मध्यफलदो दक्षिणासु त्वनिष्टकृत् ॥ १०४ ॥
अस्तं गच्छन्नानावृष्टिं कुर्यादृश्चिकचापयोः ।
मीनेऽतिवृष्टिं कुरुते सुवृष्टिं मिथुने भृगुः ॥ १०५ ॥
वृषकर्कालिमीनेषु वृष्टिः शुक्रोदयेऽधिका ।
तुल्यायामल्पवृष्टिः स्यादवृष्टिश्चापकुंभयोः ॥ १०६ ॥

उद्यन्नस्तमयन् वासावाषाढे जलशोषकृत् ।
उदितः फाल्गुने ज्यैष्ठे सुवृष्टिं कुरुते भृगुः ॥ १०७ ॥
श्रावणेऽस्तंगतो दुःखं शुभं भाद्रे तथाश्विने ।
अस्तगः कार्तिके ज्यैष्ठे महावृष्टि करोति सः ॥ १०८॥

.....

षण्मासानिव दुर्भिक्षं फाल्गुनेऽस्तं गते भृगौ ॥१०९॥
कार्तिकेऽस्तं गतः शुक्रो यद्युदेति च कार्तिके ।
तदाहां नवतिं पूर्णां तत्र देवो न वर्षति ॥ ११० ॥
शुक्रस्यास्तोदयौ शुक्रे वृष्टियोगाय चक्षते ।
कृष्णेऽष्टम्यां चतुर्दश्यामयां च सुवृष्टये ॥ १११ ॥
भरणीतश्चतुष्कन्तु चतुष्कं पंचकं त्रिकम् ।
पंचकं षट्कमित्येवं ग्रहाणां मण्डलानि षट् ॥ ११२ ॥
वक्रोदयास्तगो वृष्टयै द्वितीये मण्डले भृगुः ।
त्रिके षट्के च शुभदस्ततोऽन्यत्राशुभावहः ॥ ११३ ॥
द्वारं मेघस्य मेघस्य वायोर्धर्मस्य रेतसः ।
हेम्नः क्रमेण षट् स्वेषु भिद्यते तूदये फलम् ॥ ११४॥
मेघद्वारद्वये मेघा वर्षंति प्रचुरं पयः ।
वायुद्वारे न वर्षंति मेघादिव्युद्भवंति गताः ॥ ११५ ॥
धर्मद्वारे सुवृष्टिः स्याद्रेतोद्वारेऽभ्रसंक्षयः ।
हेमद्वारे सुवृष्टिश्च सुभिक्षं च प्रजायते ॥ ११६ ॥

भरण्याद्यष्टकं मेघद्वारं तत्रोदये जलम् ।
मघादिपंचकं धूलिद्वारं तत्र जलक्षयः ॥ ११७ ॥
स्वत्यादिसप्तकं राजद्वारं तत्रोदयोऽशुभः ।
उदयात् कनकद्वारे सप्तके तु शुभोदयः ॥ ११८ ॥

भरण्याद्यष्टनक्षत्रचारी शुक्रः सुवृष्टये ।
तत्राप्यार्द्रादित्यपुष्याश्लेषासु तु विशेषतः ॥ ११९ ॥
वृष्टयै भाद्रपदे याम्या फल्गुन्यौ त्वाष्ट्रतस्त्रिभम् ।
योगाच्छुक्रेण भेदाच्चु मघाग्नेयी च वर्षति ॥ १२० ॥
ज्येष्ठामूले अषाढे च शुक्रभेदात् पुनर्वसू ।
अनावृष्टयै तथा शुक्रो मार्गे भौमहते व्रजन् ॥ १२१ ॥
अवर्षके भे चिचरन् मार्गवो यदि वर्षति ।
वर्षकर्क्षगतो वर्षं षोडशार्चिर्न वर्षति ॥ १२२ ॥
माघ्यां प्रावृषि दृष्टोऽल्पं जलं सृजति नित्यशः ।
पश्चिमायां स्थितः शुक्रो जलं सृजति भूरिशः ॥१२३॥
शुक्रः स्वातीत्रये पूर्वे पश्चिमे पितृपंचके ।
अनावृष्टिं प्रकुरुते विपरीतः प्रवर्षति ॥ १२४ ॥
मघादिपंचके शुक्रो दृश्यते यदि पश्चिमे ।
अनावृष्टिकरः किंतु पूर्वदृष्टः सुवृष्टिकृत् ॥ २२५ ॥
स्वात्यादित्रितये शुक्रो दृष्टः पश्चिमतो यदि ।
सुवृष्टिः स्यादनावृष्टिः पूर्वदृष्टे तु कष्टदा ॥ १२६ ॥

ज्येष्ठमूलास्थिते पूर्वेऽनावृष्टिरिष्यते ।
हस्ताऽनुराधयोः केचिदनावृष्टिं प्रचक्षते ॥ १२७ ॥
नित्यं वातश्च वृष्टिश्च शुक्रे मिथुनकर्कयोः ।
शुक्रे कर्के सरः शुष्येत् सिंहे शुष्येत् पयोधरः ॥१२८॥
कुम्भराशिगतः शुक्रो ददाति प्रचुरं जलम् ।
शेषराशिगते शुक्रे विशेषो नावधार्य्यते ॥ १२९ ॥

इति शुक्रादेशाधिकरणं ।

बुधः.

विपुलो विमलः स्निग्धः सस्यकाख्यमणिप्रभः ।
शुक्रवर्णो हैमवर्णः स्फुरदुर्विबो बुधः शुभः ॥ १३० ॥
प्राकृतायां गतौ वृष्टिः सस्यं क्षेमं च जायते ।
संक्षिप्तमिश्रयोर्मिश्रं न शुभोऽन्यंगतौ बुधः ॥ १३१ ॥
कन्यायां तु बुधो वक्रः सुभिक्षं कुरुते ध्रुवम् ।
वृषेऽतिवृष्टिर्मिथुनेऽनावृष्टिश्च बुधोदयात् ॥ १३२ ॥
न चोत्पातपरित्यक्तो जायते स बुधोदयः ।
जलाग्निवायुभयकृत् सस्यार्घक्षयवृद्धिकृत् ॥ १३३ ॥
चन्द्रक्षेत्रे यदा चन्द्रबुधशुक्रोदयो भवेत् ।
षण्मासानिव दुर्भिक्षमतिवृष्टिश्च जायते ॥ १३४ ॥
अस्तं यावदनावृष्टिः शुक्रलोपा. बुधोदयात् ।
भाद्रे बुधोदये भद्रं पौषिणे न शुभं भवेत् ॥ १३५ ॥

आषाढे श्रावणे वापि बुधे यद्युदयं गते ।
शुक्रोऽस्तमेत्यनावृष्ट्या तृणादुर्भिक्षमादिशेत् ॥ १३६ ॥
अस्ते शुक्रे बुधो याति श्रावणे तूदयं यदि ।
तदा भाद्रपदे मासि मेघो नैव प्रवर्षति ॥ १३७ ॥
उद्यन्नस्तमयन् वापि बुधः शुक्रात् पुरः स्थितः ।
वृष्टिं जनयति क्षिप्रं जलनाडीगतोऽधिकम् ॥ १३८ ॥
पौषे माघे च वैशाखे आषाढे श्रावणे बुधः ।
दृष्टोऽनावृष्टिदुर्भिक्षमदृष्टस्तु शुभं दिशेत् ॥ १३९ ॥
आश्विने कार्तिके मासे यद्ययं दृश्यते बुधः ।
शस्त्रचौराग्निरोगाम्बुक्षुद्भयानि करोति सः ॥१४०॥
कर्कसंक्रमकालात्तु यदा दशदिनान्तरे ।
समुदेति बुधस्तर्हि सुवृष्टिः श्रावणे सिते ॥ १४१ ॥
सिंहसंक्रमकालात्तु यदा दश दिनान्तरे ।
समुदेति बुधस्तर्हि तत्र स्युरतिवृष्टयः ॥ १४२ ॥
कर्के सिंहे च कन्यायां बुधोऽस्तं यदि गच्छति ।
अनावृष्टिर्मन्दवृष्टिरतिवृष्टिर्भवेत् क्रमात् ॥ १४३ ॥
रोहिण्यादिमघान्तासु धनिष्ठाश्रुत्युषासु च ।
बुधः करोत्यनावृष्टिं प्रभिन्दन् यदि गच्छति ॥ १४४ ॥
अशुभं केचिदिच्छन्ति पूर्वाणामपि भेदने ।
हस्तादिषु चरन् षट्सु सुभिक्षक्षेमकृद् बुधः ॥ १४५ ॥

श्लेषास्वातीकृत्तिकासु मृगशीर्षे बुधे क्रमात्।
महावृष्टिर्मध्यवृष्टिरल्पवृष्टिश्च वायवः ॥ १४६ ॥
कन्याया मिथुने मेघः प्रचुरो वायुना सह।
तुले जलं मध्यवृष्टिर्मेषवृश्चिकयोर्बुधे ॥ १४७ ॥

इति बुधादेशाधिकरणम्।

चन्द्रः—

समशृंगो विशालांगस्तुंगो स्निग्धः शशी शुभः।
नागवीथ्यां चरन् सौम्यग्रहैर्दृष्टयुतो यदि ॥ १४८ ॥
कुजाद्यैर्निहते शृंगे मण्डले वा यथाक्रमम्।
आर्यार्घवृष्टिनृपतिप्रजानां नाशकृच्छशी ॥ १४९ ॥
कृत्तिकारोहणी सौम्या मघाचित्राभ्य उत्तरे।
विशाखादिभषट्काच्च चरन्निन्दुः शुभावहः ॥ १५० ॥
एतेषां दक्षिणे मार्गे चरन् दुष्टफलः शशी।
अन्येषां दक्षिणे मार्गे चरन्नपि न दोषकृत् ॥ १५१ ॥
इन्दोः प्रदक्षिणं यान्तः शुभदास्तारका ग्रहाः।
इन्दुर्वर्षासु वर्षाय स्थितः क्षेत्रे गुरुज्ञयोः ॥ १५२ ॥
यदि शुक्लद्वितीयायां वामे चन्द्रोदयो रवेः।
शुभं तदाखिले मासि न शुभं दक्षिणोदये ॥ १५३ ॥

इति चन्द्रादेशाधिकरणम्।

———:०:———

सूर्य्यः—

पूर्वाषाढासु चत्वारि पञ्च तूत्तरभाद्रतः ।
आर्द्रातः पञ्च ऋक्षाणि चन्द्रभानि चतुर्दश ॥ १५४ ॥
पूर्वभाद्रं शतभिषङ् मृगशीर्षं च रोहिणी ।
पूष्णादीनि नवर्क्षाणि सूर्य्यभानि त्रयोदश ॥ १५५ ॥
सूर्यस्तु चन्द्रभे चन्द्रः सूर्य्यभे वा स वर्षति ।
सूर्ये वा सूर्य्यभे चन्द्रश्चन्द्रभे स च वर्षति ॥ १५६ ॥
चन्द्रभे तावुभौ स्यातामल्पवृष्टिस्तदा भवेत् ।
सूर्यभे तावुभौ स्यातां तत्र वृष्टिर्न जायते ॥ १५७ ॥
वायुस्तु सूर्य्यभे सूर्ये वायुदोषान्न वर्षति ।
केन्द्रे तु चन्द्रभे छाया नोष्मोत्पत्वात् प्रवर्षति ॥ १५८ ॥
चन्द्रे चन्द्रे भवेद्वायुः सूर्ये सूर्ये न वर्षति ।
चन्द्रसूर्यसमायोगे सदा वर्षति वासवः ॥ १५९ ॥

इति सूर्येन्दुयोगाधिकरणम् ।

शुक्लर्क्षाणि मूलार्द्रादार्द्रातो दश तु स्त्रियः ।
विशाखातस्त्रयं क्लीबं सौम्ययाम्यायनक्रमात् ॥१६०॥
याद्दशर्क्षगते चन्द्रे सूर्यो विंशति याद्दशम् ।
तद्दशात् सूर्यनक्षत्रभुक्तिकाले वदेत् फलम् ॥ १६१ ॥
दाहः पुंसोः स्त्रियोच्छाया क्लीबयोस्तु न किंचन ।
स्त्रीपुंसके सुवृष्टिस्त्री क्लीबेऽल्पा शेषकेऽनिलः ॥१६२॥

नरे नरे भवेत्तापः क्लीवे क्लीवे महोष्णता ।
स्त्रियां स्त्रियां महावातो वृष्टिः स्त्रीनरसंगमे ॥ १६३ ॥
वायुर्नपुंसके भे च स्त्रीणांभेचाभ्रदर्शनम् ।
स्त्रीणां पुरुषसंयोगे वृष्टिर्भवति निश्चितम् ॥ १६४ ॥

इति स्त्रीपुंयोगाधिकरणम् ।

पौष्णाश्विनी मघापुष्यश्रुतिस्वातीमृगीस्थिते ।
चन्द्रेऽर्कों जललग्ने वा प्रविशन्भं सुवृष्टये ॥ १६५ ॥
भरणी कृत्तिका चन्द्रे चन्द्रे राधानुराधयोः ।
नक्षत्रं प्रविशन्भानुर्न करोति सवर्षणम् ॥ १६६ ॥
ऋक्षप्रवेशे सूर्यस्य चन्द्रे केन्द्रत्रिकोणगे ।
जलभस्थे च शुक्रेण युते दृष्टे सुवृष्टयः ॥ १६७ ॥
निशीथे वा निशायां वा जललग्नेऽपि वा रवेः ।
भप्रवेशे सुवृष्टिः स्याद् वृष्टियोगान्नरेऽपि वा ॥ १६८ ॥

इति नक्षत्रसंक्रमाधिकरणम् ।

अब्दविंशोपकाः कर्कसंक्रमेऽर्कादिवारतः ।
दिशो नखा गजाः सूर्य्या धृत्योऽष्टादशसायकाः ॥
यदि कर्कार्कसंक्रान्तौ शन्यर्कौ बुधमंगलौ ।
नातिवृष्टिस्तदा तत्र शेषवारे सुवृष्टयः ॥ १७० ॥
जलराशिस्थिते चन्द्रे कर्कटं याति भास्करः ।
तदा वदन्ति दैवज्ञाः साधुवृष्टिर्भविष्यति ॥ १७१ ॥

मीने मेषे वृषे युग्मे वर्तमाने निशाकरे ।
जलं ददाति प्रविशन् कर्कमर्कः शताढकम् ॥ १७२ ॥
चापे सिंहे च पंचाशत् तदर्द्धं नक्रकन्ययोः ।
तुलालिकुम्भकर्केषु तदर्द्धं वारि वर्षति ॥ १७३ ॥
अर्द्धं वर्षति शैलाग्रे तदर्द्धं विपिनादिषु ।
तदर्द्ध चोपरस्थाने शेषं क्षेत्रे प्रवर्षति ॥ १७४ ॥
कर्कटे प्रविशन्तं चेत् सूर्य्यं पश्येद् बृहस्पतिः ।
पूर्णं पादोनदृष्ट्या वा तत्र काले प्रवर्षणम् ॥ १७५ ॥
श्रावणे कर्कसंक्रांतौ यदि मेघमहोदयः ।
सप्तमासान सुभिक्षं स्यात् साधु वर्षति वासवः ॥ १७६ ॥
मंगले कर्कसंक्रांतिः शनौ मकरसंक्रमः ।
रिक्तातिथौ पंचदशमुहूर्ते वा न शस्यते ॥ १७७ ॥
स्वाती ज्येष्ठा भरण्यार्द्रा श्लेषाशतभिषासु च ।
बाणचन्द्रमुहूर्ते वा दुष्टो मकरसंक्रमः ॥ १७८ ॥
पुनर्वसौ विशाखायां रोहिण्यामुत्तरात्रये ।
बाणवेदमुहूर्ते वा शुभो मकरसंक्रमः ॥ १७९ ॥
अमावस्या सुभिक्षाय रविसंक्रांतिवासरात् ।
एकादशे पंचविंशे चतुर्थेऽष्टादशेऽहनि ॥ १८० ॥
पूर्वसंक्रमनक्षत्रात् परसंक्रमभे शुभम् ।
द्वितीये वा तृतीये वा न शुभं तुर्य्यपंचमे ॥ १८१ ॥

प्रतिमासं तु संक्रांतिफलमुक्तं यथायथम् ।
पूर्वे गर्भध्रुवाध्याये क्रमाद् द्वादशमासिके ॥ १८२ ॥

इति राशिसंक्रमाधिकरणम् ।

इति वैकारिकाधिकारः ।

---

६ ग्रहयुतियोगः ।

उपर्युपरिसंस्थानां चरतां नैकवर्त्मसु ।
ग्रहणामतिदूरत्वाद् दृश्यते समदेशिना ॥ १८३ ॥
तेनांशसाम्याद् दृक्सूत्रासत्या ग्रहयुतिर्मता ।
अस्तं समागमो युद्धमिति भेदात्त्रिधा युतिः ॥१८४॥
सूर्येण युतिरस्ताख्या चन्द्रेण तु समागमः ।
युतिस्ताराग्रहाणां तु युद्धं चापि समागमः ॥ १८५ ॥
युद्धं चतुर्विधं तत्र लक्ष्यते प्रेक्षयमाणयोः ।
भेदोल्लेखावंशुमर्दापसव्याविति भेदतः ॥ १८६ ॥
बिंबग्रासे तु भेदः स्यादुल्लेखः स्पृष्टबिम्बता ।
अत्यल्पान्तरितो मर्दोऽपसव्योंऽशानतिक्रमः ॥१८७॥
संपातस्थानसंप्राप्तग्रहयोः स्वगतेर्वशात् ।
सानिध्यतारतम्येन भेदोल्लेखादिसंभवः ॥१८८॥
दक्षिणः कम्पितो रूक्षो विवर्णो विकृतोऽग्रभः ।
अधिगूढोऽणुरप्राप्यनिवृत्तो जित उच्यते ॥ १८९ ॥

जयी तु विपुलः स्निग्धो द्युतिमानपि दक्षिणः ।
उदक्स्थो दक्षिणस्थो वा भार्गवः प्रायशो जयी ॥
द्वावपि स्निग्धविपुलसप्रभौ चेत्समागमः ।
अंशान्तरितविम्बत्वे सर्वेषां तु समागमः ॥ १९१ ॥
युद्धं समागमो वापि यद्यव्यक्तौ स्वलक्षणैः ।
तदा तत्फलमव्यक्तं व्यक्तौ व्यक्तमलं फलम् ॥१९२॥
भेदयुद्धे त्वनावृष्टिरुल्लेखादिषु शस्त्रभीः ।
युद्धे यो जीयते खेटस्तद्विशेषात् फलं ब्रुवे ॥ १९३ ॥
वाह्लीका परिपीड्यंते मंगले गुरुणा हते ।
वधेन तु जिते साल्वाः कलिंगाः शूरसेनकाः ॥१९४ ॥
शुक्रेण क्षत्रिया म्लेच्छाः शनिना सकलाः प्रजाः ।
उत्तरस्थाः सरिद्वृक्षा मंगलेन बुधे जिते ॥ १९५ ॥
शूद्रा म्लेच्छाः पार्वतीयास्तैगर्ता गुरुणा हते ।
शुक्रेण तु जिते सस्याम्बुदनाशोऽग्निकोपनम् ॥१९६॥
शनिना तु जिते योधाः पीड्यन्ते नाविकास्तथा ।
जीवे शुक्रहते साल्वा वत्सा वंगाश्च कैकयाः ॥ १९७ ॥
मद्रा कुलूता गान्धाराः पीड्यन्ते सस्यधेनवः ।
जीवे सौम्यजिते मध्यदेशो गौः पीड्यते नृपः ॥१९८॥
जीवे बुधहते मध्यदेशो म्लेच्छश्च नश्यति ।
जीवे शनिहते विप्रा यौधेया अर्जुनायनम् ॥ १९९ ॥

शुक्रे भौमहते सेनापतिनाशः सुयोधने ।
शुक्रे बुधहते दृष्टिरल्पा क्षीरं च हीयते ॥ २०० ॥
अज्ञानां गणमुख्यानां पीडा शनिहते सिते ।
अनावृष्टिर्गुरुहते शुक्रे नश्यंति कोशलाः ॥ २०१ ॥
मध्यदेशा शूरसेना मत्स्या वंगाः कलिंगकाः ।
शनौ भौमहते काशिवाह्लीकौड्रान्ध्रटंकणाः ॥ २०२ ॥
ज्ञहतेऽङ्गवणिक्खेटाः शका गुरुहते हताः ।
शनौ शुक्रहते त्वर्घवृद्धिः पीडा हि पक्षिणाम् ॥२०३॥
हतानां मंगलादीनां विशेषोऽयमुदाहृतः ।
अपि हंति हताः स्वस्वभक्तीस्ते ग्रहभक्तितः ॥ २०४ ॥
उक्तं युद्धफलं नेष्टं ग्रहाणां देशभेदतः ।
अत ऊर्ध्वं फलं ब्रूमः पौर्वापर्ये समागमे ॥ २०५ ॥

इति ग्रहयुत्यधिकरणम् ।

७ गृहधिष्ण्ययोगः ।

चक्रांशेऽप्युदगंशे वा तिष्ठतो सहयोगिता ।
ऋक्षं समं समो राशिरिति वा सहयोगिता ॥ २०६ ॥
सप्तभौमसहस्राणां नवांशाः शनिजीवयोः ।
इन्दोर्द्वादशचक्रांशा भानोः पंचदश स्मृताः ॥ २०७ ॥
शनेः पञ्चदशैवांशाः एकादश बृहस्पतेः ।
स्युः सप्तदश भौमस्य चन्द्रस्य द्वादश स्मृताः ॥ २०८ ॥

शुक्रस्य नव कालांशा अष्टौ तस्यैव वक्रिणः ।
नवोदयांशा शुक्रस्य तस्यैवाष्टौ तु वक्रिणः ॥
त्रयोदश बुधस्यांशास्तस्य द्वादश वक्रिणः ॥ २०९ ॥
चन्द्रस्य दैनिकी भुक्तिर्नक्षत्रमिति कथ्यते ।
त्रयोदशांशा विंशत्या कलानां तन्मितिर्मता ॥ २१० ॥
स्पष्टास्तु विकलाः पञ्चत्रिंशद्दशकलास्तथा ।
त्रयोदशांशाश्चंद्रस्य दैनिकी भुक्तिरिष्यते ॥ २११ ॥
चत्वारोंऽशाः पञ्चकला विकला दश पंच च ।
अभिजिन्मानमित्येवमष्टाविंशतिमानि वा ॥ २१२ ॥
राशिकल्पैस्त्रिंशदंशैरश्विपूषान्तरादितः ।
क्रांतिपातात् त्रिंशदंशैः कल्पना अत्र न संमताः ॥२१३॥
स्वे युत्यंशे योगफलं करोतीति मतं मम ।
एकैकस्य स युत्यंशो भिद्यते द्युतिमानतः ॥ २१४ ॥

इति ग्रहधिष्ण्याधिकरणम् ।

८ सामान्यसादेश्ययोगः

पुरोंऽगारमनावृष्टिः पुरः शुक्रं भवर्षणम् ।
पुरो जीवं भवेदूष्मा पुरो बुधमथानिलः ॥ २१५ ॥
सूर्यांगारं यमांगारं जीवांगारमवर्षणम् ।
बुधशुक्रं जीवबुधं वृष्टिं जनयति ध्रुवम् ॥ २१६ ॥

अदृष्टावयुतौ क्रूरैर्भशुक्रावेकराशिगौ ।
जीवदृष्टौ विशेषेण महावृष्टिप्रदायिनौ ॥ २१७ ॥
अदृष्टवयुतौ क्रूरैर्जीवावेकराशिगौ ।
शुक्रदृष्टौ विशेषेण कुरुतो वृष्टिमुत्तमाम् ॥ २१८ ॥
अदृष्टवयुतौ क्रूरैर्जीवशुक्रौ सहस्थितौ ।
बुधदृष्टौ विशेषेण कुरुतो वृष्टिमुत्तमाम् ॥ २१९ ॥
शुक्रचन्द्रौ भौमचन्द्रावेकराशिगतौ यदि ।
उद्घना दिशः सर्वा जलयोगस्तदा महान् ॥ २२० ॥
एकराशिगतो जीवः सूर्येण सह वर्षति ।
यावन्नास्तमनं याति योगो वा बुधजीवयोः ॥ २२१ ॥
एकराशौ शनिर्भौमो बलवद्वृष्टिहेतवे ।
मासद्वयं भवेद् वृष्टिस्ततो वृष्टिर्निवर्तते ॥ २२२ ॥
अदृष्टावयुतौ सौम्यैः शनिभौमौ सहस्थितौ ॥
तदा वायुप्रकोपः स्यात् तथैवाग्निभयं भवेत् ॥ २२३ ॥
एकराशौ तथैकर्क्षे राहुभौमावदृष्टये ।
गुरुशुक्रौ यदैकस्यावकाले वर्षणं भवेद् ॥ २२४ ॥
सूर्यस्य पुरतो गच्छेद् यदि शुक्रो बुधोऽपि वा ॥
वर्षाकाले तदा वृष्टिर्भवत्येव निरन्तरा ॥ २२५ ॥
अङ्गारागतः सूर्यो वृष्टिं नावरुणद्धि वा ।
सूर्यादग्रेसरोऽङ्गारः प्रतिबध्नाति वर्षणम् ॥ २२६ ॥

जीवादग्रेसरः शुक्रो वृष्टिं जनयति ध्रुवम् ।
शुक्रादग्रेसरो जीवो न वृष्टिं जनयिष्यति ॥ २२७ ॥
बुधाच्छुक्रे महावृष्टिरल्पा शुक्रात् परे बुधे ।
तयोरन्तर्गतो भानुरन्यो वा नैव वर्षति ॥ २२८ ॥
उन्मार्गगमनं कुर्वन् यदि शुक्रं त्यजेद् बुधः ।
तदा वर्षति पर्जन्यः सप्त वाहानि पञ्च वा ॥ २२९ ॥
उद्यमन्नस्तमयन् वापि बुधः शुक्रात् पुरः स्थितः ।
वृष्टिं जनयति क्षिप्रं जङ्घानाडीगतोधिकम् ॥ २३० ॥
शुक्रादग्रे यदांगारो वृष्टिर्नास्त्युत्तरापथे ।
विद्युत्कोपो रजोवृष्टिरग्निदाहश्च जायते ॥ २३१ ॥
शुक्राद् गुरौ हृता मेघाः पूर्वस्यां करकाऽथवा ।
शुक्रादग्रे शनौ रोगैः पीड्यते दक्षिणापथः ॥ २३२ ॥
जीवांगारं सचन्द्रं चेद् वृष्टियोगं वदंति हि ।
शुक्राद् बुधस्ततः सूर्यो भवत्यन्नमहार्घता ॥ २३४ ॥
सूर्यमध्यौ शुक्रबुधावनावृष्टिकरौ मतौ ।
बुधपृष्ठौ शुक्रशनी धनधान्यसमृद्धयः ॥ २३५ ॥
यदि चेन्मंगलो गच्छेत् सुरतः सूर्यशुक्रयोः ।
तुषारवर्षी पर्जन्यो वृष्ट्यै स्यात् खण्डमंडले ॥ २३६ ॥
शुक्रमंगलमध्यस्थे सूर्ये घोरमवर्षणम् ।
ताभ्यां युक्तो रविः कृत्स्नां प्लावयेज्जगतीं जलैः ॥२३७॥

अग्रे बुधो रविर्मध्ये शुक्रः पृष्ठे त्वनंग्रहः ।
अग्रे शुक्रो रविर्मध्ये गुरुः पृष्ठेऽतिवर्षणम् ॥ २३८ ॥
अग्रे सूर्यो बुधो मध्ये भौमः पृष्ठे सुभिक्षता ।
अग्रे शुक्रः शनिर्मध्ये बुधः पृष्ठे सुभिक्षता ॥ २३९ ॥
बुधो बृहस्पतिः शुक्र एकराशिगतास्त्रयः ।
अदृष्टा अयुताः क्रूरैर्महावृष्टिविधायिनः ॥ २४० ॥
शनिश्च मंगलः शुक्रः एकराशिगतास्त्रयः ।
तदा वर्षति पर्जन्यो जीवदृष्टौ न संशयः ॥ २४१ ॥
सूर्यशुक्रबुधेष्वेकराशिगेष्वल्पवर्षणम् ।
सूर्यशुक्रगुरुष्वेकराशिगेष्वतिवृष्टयः ॥ २४२ ॥
शनिशुक्रकुजैर्दृष्टिर्जीवदृष्टैः सहस्थितैः ।
शनिराहुकुजैर्युद्धमदृष्टिश्चैकराशिगैः ॥ २४२ ॥
शनिराहुगुरुष्वेकराशिगेषु शिलोदकम् ।
सर्वे ग्रहा एकराशौ दुर्भिक्षा दृष्टिरोगदाः ॥ २४४ ॥
शुक्रोऽङ्गारकः शनिर्जीवः सहस्था अवरोधकाः ।
शुक्रो राहुः शनिर्जीवः सहस्था दृष्टिहेतवः ॥ २४५ ॥
भौमो बुधो गुरुः शुक्रः सहस्था पांशुवृष्टये ।
..... ॥ २४६ ॥
भौमः शुक्रशनी राहुरेकराशिगता यदि ।
मेघा जलं न मुंचन्ति दुर्भिक्षं जायते तदा ॥ २४७ ॥

सौमो बृहस्पतिः शुक्रः शनिश्चैते सहस्थिताः ।
मेघा जलं न मुंचति दुर्भिक्षं जायते तदा ॥ २४८ ॥

सूर्यो बृहस्पतिः शुक्रः शनी राहुः सहस्थिताः ।
मेघा जलं न मुंचंति सर्वधान्यमहार्घता ॥ २४९ ॥

चत्वारः पंच वा खेटा एकराशिगता यदि ।
प्लावयन्ति महीं सर्वां रुधिरेण जलेन वा ॥ २५० ॥

बुधेज्यशुक्राः सूर्येन्दू एकराशि गता यदि ।
नैर्ऋत्यदिक्प्रजानाशो दुर्भिक्ष तर्हि जायते ॥ २५१ ॥

बुधेज्यश्चानिरार्कि एकाशिगता यदि ।
सुभिक्षं क्षेममारोग्यं सुखं सर्वत्र जायते ॥ २५२ ॥

शुक्रपूर्वा यमांगारबुधा जीवयुतायुताः ।
प्रचण्डवायुकोपः स्यादनावृष्टिश्च जायते ॥ २५३ ॥

सूर्यश्चन्द्रो बुधो जीवः शुक्रश्चेति सहस्थिताः ।
वृष्टियोगं प्रकुर्वन्ति नांगारः पुरतो यदि ॥ २५४ ॥

सूर्यपृष्ठगताः सर्वे सर्वे सूर्यपुरोगमाः ।
योगौ वृष्टिकरावेतौ वृष्टिविघ्नाः प्रचक्षते ॥ २५५ ॥

अग्रतः पृष्ठतो वापि ग्रहाः सूर्यावलम्बिनः ।
तदा तदा प्रकुर्वंति सुवृष्टिमनुलोमगाः ॥ २५६ ॥

वृष्टिदाः पृष्ठतः क्रूरा वृष्टिदाः अग्रतः शुभाः ।
वैपरीत्यमनावृष्टयै जायतेऽनेकसंचरे ॥ २५७ ॥

यद्यग्रस्थितसौम्याः स्युः क्रूरग्रहपरम्पराः ।
तदा प्रभूतमुदकं वर्षंति न विपर्ययेः ॥ २५८ ॥

इति सामान्यसादेश्याधिकरणम् ।

९ विशेषसादेश्ययोगः ।

मेषे राहुश्च शुक्रश्च दुर्भिक्षाय सहस्थितौ ।
मेषेऽर्को मंगलः शुक्रः शनिर्दुर्भिक्षहेतवः ॥ २५९ ॥

अनावृष्टिकरो योगो दृषे भानुः कुजः शनिः ।
त्रयो वा यदि मीने स्युश्चन्द्रः शुक्रश्च मंगलः ॥२६०॥

दुर्भिक्षायाप्यनावृष्टयै दृषेऽर्को मंगलः शनिः ।
शुक्रक्षेत्रे सुवृष्टयै स्याद्दिषणो मंगलः शनिः ॥ २६१ ॥

शनिराहू तु मिथुनस्थानौ दुर्भिक्षकारकौ ।
मीने चापेऽतिदुर्भिक्षं शनिमंगलराहुभिः ॥ २६२ ॥

गुरुक्षेत्रे शनौ राहौ स्वल्पवृष्टिस्तृणक्षयः ।
सौम्ये राज्ञां विरोधः स्याद् बुधे वृष्टिश्च भूयसी ॥२६३॥

बुधश्चेन्मकरे कुम्भे वृष्टिः स्याद् भूयसी तदा ।
बुधक्षेत्रे रवौ चन्द्रे वृष्टियोगः सुभिक्षता ॥ २६४ ॥

इति विशेषसादेश्याधिकरणम् ।

१० राशिचक्रयोगः ।

मिथुने मंगलो जीवस्तुले यदि शनैश्चरः ।
राहुर्धनुषि मेघाः स्युस्तदानीं मण्डलाधिकाः ॥ २६५ ॥

कर्के बृहस्पतिः सिंहे शुक्रः स्यान्मंगलस्तुले ।
शनिर्मीने तृणं सस्यं वृष्टिश्चापि न जायते ॥ २६६ ॥
सिंहे शुक्रस्तुले भौमः कर्के जीवो भवेद् यदि ।
महावातो धूलिपातो भवेद्धान्यमहार्घता ॥ २६७ ॥
दुर्भिक्षाय शनिर्मीने गुरुः कर्के कुजस्तुले ।
अनावृष्टिश्च दुर्भिक्षं मीने शुक्रेन्दुमंगलैः ॥ २६८ ॥

इति राशिचक्रयोगाधिकरणम् ।

११ नक्षत्रचक्रयोगः.

चित्रायां यदि शुक्रः स्यान्मघायां यदि मंगलः ।
रोहिण्यां शनिरायातः सर्वं सस्यं विनश्यति ॥२६९॥
शनिः स्यादुत्तराषाढे सप्तमर्क्षे दिवाकरः ।
विनश्यति जलं तत्र प्रजा च बहु पीड्यते ॥ २७० ॥
शनिर्यदि धनिष्ठायां तत्रैव यदि मंगलः ।
अनावृष्टिस्तदा तत्र सस्यहानिश्च जायते ॥ २७१ ॥
गुरुः शतभिषायां स्याच्चित्रायां यदि मंगले ।
अयनौ वा श्रविष्ठायां गुरुशुक्राववस्थितौ ॥ २७२ ॥
गोधूमास्तत्र नश्यंति सर्वसस्यमहार्घता ।
मघाधनिष्ठयोर्जीवे मृग्यां राहौ महार्घता ॥ २७३ ॥
भरण्यां वा विशाखायां गुरुशुक्रौ महार्घता ।
आर्द्रायां शनिराहू चेदनावृष्टिस्तदा भवेत् ॥ २७४ ॥

इति नक्षत्रचक्रयोगाधिकरणम् ।

१२ समसप्तकयोगः ।

मिथः सप्तपराशिस्थौ पश्चात् प्राग्वीथिसंस्थितौ ।
गुरुशुक्रावनावृष्टिर्दुर्भिक्षमरणप्रदौ ॥ २७५ ॥
पूर्वस्यां दृश्यते शुक्रः पश्चिमायां बृहस्पतिः ।
संप्तसप्तमयोर्योगादनावृष्टिं प्रचक्षते ॥ २७६ ॥
सप्तसप्तपयोः सूर्यभौमयोः शनिभौमयोः ।
गुरुभार्गवयोर्योगा अनावृष्टिकरा मताः ॥ २७७ ॥
भौमार्कौ एकराशौ चेदन्योन्यसमसप्तमौ ।
गुरुशुक्रौ कुजार्कौ वा विदुरावर्षणं तदा ॥ २७८ ॥
गुरुणा यदि शुक्रस्य दृश्यते सप्तसप्तकम् ।
रवेर्गुरोर्भृगोः खेटैः सप्तभैर्नास्ति वर्षणम् ॥ २७९ ॥
मंगलेन तु शुक्रस्य यदि स्यात् सप्तसप्तकम् ।
शनिना वापि जीवस्य भवेत् प्रावृषि वर्षणम् ॥ २८० ॥
क्रूराणां सह सौम्यैश्च यदि स्यात् सप्तसप्तकम् ।
अनावृष्टिस्तदा तत्र भवेल्लोकप्रपीडनम् ॥ २८१ ॥

इति समसप्तकाधिकरणम् ।

१३ चक्रवेधयोगः ।

ऋक्षसंवेशे शुक्रस्य त्रिकोणे सप्तमे शशी ।
जलराशिस्थितः शुक्रदृष्टो वा सुवर्षति ॥ २८२ ॥

April 3: 10: 17 ॐ

सोमः शनेर्मंगलाद्वा त्रिकोणे सप्तमेऽपि वा ।
जलराशिस्थितः शुक्रदृष्टो वा सुमवर्षति ॥ २८३ ॥
शनिस्त्रिकोणे केन्द्रे वा यदि सौम्योऽनुवर्तते ।
जलराशिस्थितः शुक्रदृष्टो वा सुमवर्षति ॥ २८४ ॥
बहूदकाः कर्कनक्रमीनाः कुम्भधनुर्वृषा ।
अर्द्धोदकास्तुलाकीटौ सामान्यौ निर्जलाः परे ॥२८५॥

इति चक्रवेधाधिकारः

१४ षट्चक्रयोगाः.

समुद्रस्तुबुरुः कालः पातसंघट्टनाडिकाः ।
षट्चक्रवेधा उच्यन्ते द्रष्टुं वृष्टिं च वेधजाम् ॥ २८६॥

समुद्रचक्रम्—(१)

कृत्तिकादिभचक्रे द्वे द्वे एकं द्वे इति क्रमात् ॥
सिन्धुस्तटं गिरिः संधिश्चतुर्धैव पुनः पुनः ॥ २८७॥
शनिचन्द्रौ गिरिस्थौ चेत् सूर्यो वा मंगलोऽथवा ।
तदा भवर्द्धते वृष्टिः सुभिक्षं सस्यसंपदा ॥ २८८ ॥
मेषसंक्रांतिदिवसे दिनभं यत्र दृश्यते ।
तद्वशात् वृष्टिविज्ञानं वृष्टिकालेऽनुभावयेत् ॥ २८९ ॥
समुद्रभेऽतिवृष्टिः स्यात् सुवृष्टिस्तटगे सति ।
सन्धिभे खण्डवृष्टिः स्यादनावृष्टिस्तु पर्वते ॥ २९० ॥

इति समुद्रचक्रमेकं ।

राशिचक्रं लिखित्वादौ मेषसंक्रांतितः क्रमात् ।
अष्टाविंशतिकं तत्र लिखेन्नक्षत्रसंकुलम् ॥ २९१ ॥
सिन्धौ द्वयं लिखित्वादौ तत एकैकमुल्लिखेत् ।
तटे सिन्धौ गिरौ सन्धौ तटे चेति पुनः पुनः ॥२९२॥
चत्वारः सागरास्तत्र तटान्यष्टाष्टसन्धयः ।
चत्वारि गिरिशृंगाणि रोहिणीं तत्र दर्शयेत् ॥२९३॥
संधस्थाने खण्डवृष्टिः पर्वते विन्दुपात्रकम् ।
तटे सुवृष्टि रोहिण्या महावृष्टिस्तु सागरे ॥ २९४ ॥

इति समुद्रचक्रं द्वितीयं ।

२ । राशितुम्बुरुचक्रम् ।

भानुर्जीवो बुधश्चन्द्रो योगोऽयं जलवर्षणः ।
भानुर्जीवो भृगुश्चंद्रो योगोऽयं वायुवाहकः ॥ २९५ ॥
भानुर्जीवो यमश्चन्द्रो योगोऽयं वह्निवर्धनः ।
भानुर्भौमः तमश्चन्द्रो योगोऽयं लोहपातनः ॥ २९६॥
ग्रहयोगे फलं नेयं राशितुम्बुरुजे त्विदम् ।
चक्रे त्रिकोणवेधोयः स उक्तो राशितुम्बुरुः ॥

इति राशितुम्बुरुचक्रम् ।

३ कालचक्रम् ।

कालचक्रं फलं ब्रूमश्चराणां वेधतश्चरे ।
स्थिरे तु द्विस्वभावानां स्थिराणां द्विस्वभावके ॥२९८॥

गुरुर्यमो भृगुश्चन्द्रो गुरुर्भौमो भृगुः शशी ।
गुरुः सौम्यो भृगुश्चन्द्रो योगाः स्युर्जलवर्षणाः ॥२९६॥
गुरुर्भानुरगुश्चन्द्रो गुरुर्भौमो यमः शशी ।
गुरुर्भौमो गुरुश्चन्द्रो योगाः स्युर्वायुवाहकाः ॥ ३०० ॥
भानुर्भौमो गुरुश्चन्द्रो भानू राहुर्बुधः शशी ।
भानुर्यमो बुधश्चन्द्रो योगाः स्युर्वह्निवर्धनाः ॥ ३०१ ॥
यमो भौमस्तमश्चन्द्रो यमो भौमो गुरुः शशी ।
यमः केतुर्भृगुश्चन्द्रो योगाः स्युः शैलपातनाः ॥३०२॥
भौमः केतुर्भृगुश्चन्द्रो योगो विद्युत्प्रचारकः ।
यमो भौमो भृगुश्चैकनाडीस्थाः शैलपातनाः ॥ ३०३ ॥

इति द्वादशारकालचक्रम् ।

४ । ५ संपातचक्रसंघट्टचक्रम् ।

कृत्तिकायाम्ययोर्वेधा फाल्गुन्योरप्यषाढयोः ।
कृत्तिकापूषयोः पूष्णोषयोर्याम्योफयोरपि ॥ ३०४ ॥
नक्षत्राणां ततोऽन्येषां वेधास्तत्क्रमयोगतः ।
संपातनाडीचक्रं स्यात् तत्र योगात् फलं वदेत् ॥३०५॥
कृत्तिकापातजो नाडीवेधः प्राचामयं मते ।
अर्वाचामश्विनीपातनाडीवेधो विधीयते ॥ ३०६ ॥
अश्विनीपौष्णयोः श्लेषामघयोः शाक्रमूलयोः ।
अश्विनीशाक्रयोः श्लेषामूलयोः पित्र्यपौष्णयोः ॥३०७॥

नक्षत्राणां ततोऽन्येषां वेधात् तत्क्रमयोगतः ।
संपातनाडीचक्रं स्यात् तत्र योगात् फलं वदेत् ॥२०८॥
एकनाडीसमारूढौ भवेतां चन्द्रमङ्गलौ ।
यदि तत्र गतो जीवस्तत्र वृष्टिर्न संशयः ॥ २०९ ॥
एकनाडीसमारूढौ बुधः शुक्रो बृहस्पतिः ।
यदि तत्र गतश्चन्द्रस्तत्र वृष्टिः प्रजायते ॥ २१० ॥
एकनाडीसमारूढाः रविमंगलराहवः ।
यदि तत्र गतश्चन्द्रस्तत्र युद्धं विनिर्दिशेत् ॥ २११ ॥
एकनाडीसमारूढाः शुक्रसूर्यबुधा यदि ।
अनावृष्टिस्तदा वोयं शुष्कं भवति सर्वतः ॥ २१२ ॥
एकनाडीसमारूढौ कुरुतो राहुमंगलौ ।
अग्निपातं तथा युद्धं कुरुतः शनिमंगलौ ॥ २१३ ॥
शनिमंगलजीवाः स्युरार्द्रायां मृगशीर्षिणा वा ।
विप्लुता सह वृष्टिः स्याल्लग्नयोः कुम्भमीनयोः ॥ २१४ ॥
केतुना मंगलेनाग्निं गुरुणा भृगुणा जलम् ।
सूर्येणा शशिना लोहं युक्तः प्रकुरुते शशी ॥ २१५ ॥
धीविक्रमव्ययघूनधर्मशत्रुतनुषु यः ।
शशांकादपसव्येन स्थितः सोऽपि युतो मतः ॥ २१६ ॥
एकनाडीसमारूढा सूर्येन्दुशनिराहवः ।
तद्दिने दुर्दिनं ज्ञेयमभ्रच्छन्नं समन्ततः ॥ २१७ ॥

सप्तनाडीचक्रम् (६)

—:o:—

चण्डा—समीरा—दहना—सौम्या—नीरा—जलाऽमृताः ।
नाड्यः शनीज्यभौमार्कशुक्रज्ञशशिनां क्रमात् ॥ ३१८ ॥
कृत्तिकातोऽनुराधातः सप्तसप्तक्रमादिमाः ।
मघातस्तु धनिष्ठातो विपरीतक्रमेण ताः ॥ ३१९ ॥
मध्यमार्गे स्थिता सौम्या तन्नाड्या अग्रपृष्ठतः ।
सौम्ययाम्यगतं ज्ञेयं नाडिकानां त्रिकं त्रिकम् ॥ ३२० ॥
क्रूरा याम्यगता नाड्यः सौम्याः सौम्यदिगाश्रिताः ।
मध्यनाडी तु मध्यस्था ग्रहयोगात् फलप्रदाः ॥ ३२१ ॥
द्वित्राधिकाः स्थिताः कुर्युश्चण्डायां चण्डमारुतम् ।
वायुनाड्यां तथा वायुं दहनायां तथोष्मकम् ॥३२२ ॥
सौम्यायां समतां कुर्युर्नीरायां मेघसंचयम् ।
जलायां वर्षणं ते चामृतायामतिवर्षणम् ॥ ३२३ ॥
एकोऽप्येतत्फलं दत्ते स्वनाडीसंस्थितो ग्रहः ।
मंगलः सर्वनाडीषु धत्ते नाडीसमं फलम् ॥ ३२४ ॥
रवौ चन्द्रादिहस्तान्ते स्थिते नक्षत्रमंडले ।
ग्रहयोगवशादेव फलवैचित्र्यमिष्यते ॥ ३२५ ॥
पुंग्रहा गुरुभौमार्काः स्त्रीग्रहौ शशिभार्गवौ ।
नपुंसकौ शनिबुधावौष्ण्यशैत्यादिकल्पनात् ॥ ३२६ ॥

वायुः पुंसां मिथो योगे क्लीवयोर्धूमिकोद्भवः ।
दृष्टिः स्त्रीपुंमयोर्योगे छाया स्यात् संगमे स्त्रियोः ॥३२७॥
क्रूरसौम्यविमिश्रास्तु यत्र नाड्यां स्थिता ग्रहाः ।
तत्र चन्द्रसमायोगे तद्दिने दृष्टिरुत्तमा ॥ ३२८ ॥
ग्रहाणामेकनक्षत्रे संयोगो यदि जायते ।
तत्र काले महादृष्टिर्यावत् तस्यांशके शशी ॥ ३२९ ॥
चन्द्रो विद्धो यदा पापैः सौम्यैर्वा केवलैर्ग्रहैः ॥
तदा स्याद्वर्षणं तुच्छं दुर्दिनं तु भवेद् ध्रुवम् ॥ ३३०॥
चन्द्रो यद् ग्रहनाडीस्थस्तद्ग्रहेण स युज्यते ।
दृश्यते वा न चेत् क्षीणो जलं स जनयेत् तदा ॥३३१॥
चन्द्रे चामृतनाडीस्थे तत्र खेटाः शुभाशुभाः ।
द्विचतुःपंच सप्तैति दिनेष्वेकत्रिंशसु ॥ ३३२ ॥
जलनाडीस्थिते चन्द्रे तावन्मिश्रग्रहान्विते ।
दिनार्द्धं दिवसं पंचदिवसानि जलं पतेत् ॥ ३३३ ॥
नीरनाडीस्थिते चन्द्रे क्रूरसौम्यग्रहैर्युते ।
यामं दिनार्द्धं त्रिदिनं जलं पतति योगतः ॥ ३३४ ॥
अमृतादित्रये यत्र ग्रहाः सर्वे भवंति चेत् ।
तत्र दृष्टिः क्रमात् ज्ञेया धृत्यर्कैरसवासरान् ॥ ३३५ ॥
मध्यनाडीगताः सर्वे दृष्टिदास्ते दिनत्रयम् ।
शेषनाड्यां महावातदुष्टदृष्टिप्रदा ग्रहाः ॥ ३३६ ॥

योगे शुभाधिके नाडी र्निजलापि जलप्रदा ।
क्रूराधिकसमायोगे सजला अपि दाहिकाः ॥ ३३७॥
याम्यनाडीगताः क्रूरा अनावृष्टिप्रसूचकाः ।
शुभयुक्ता जलांशस्था किंचिद् वृष्टिप्रदा अपि ॥३३८॥
चन्द्रशुक्रौ युतौ दृष्टौ क्रूरैर्नाडयां स्थितौ यदि ।
जलायां तत्र वृष्टिः स्यादल्पैव क्रूरयोगतः ॥ ३३९ ॥
जलनाडीसमारूढा बुधः शुक्रो बृहस्पतिः ।
तत्र चन्द्रसमायोगे जायते वृष्टिरुत्तमा ॥ ३४० ॥
जलनाडीसमारूढौ भवेतां चन्द्रमंगलौ ।
तत्र जीवसमायोगे जायते वृष्टिरुत्तमा ॥ ३४१ ॥
जलनाडीगताः खेटा महावृष्टिविधायिनः ।
अयने संक्रमे वक्रे मार्गे चास्ते तथोदये ॥ ३४२ ॥

इति ग्रसनाडीचक्रम् ॥

ग्रहभक्तिदेशाः ।

अनूपो जांगलो मिश्रस्त्रिधा देशो निसर्गतः ।
बहूदकस्त्वनूपः स्याज्जांगलोऽल्पजलो मतः ॥ ३४३ ॥
मिश्रः साधारणो देशः समशीतोष्णमारुतः ।
जांगलानूपधर्माणामाधिक्यात् स द्विधा मतः ॥ ३४४ ॥
ग्रहयोगे समानेऽपि विषमा वृष्टिरिष्यते ।
अनूपादिषु देशेषु कालात् क्षेत्रे बलिष्ठिता ॥ ३४५ ॥

अनूपे भूयसी दृष्टिः स्वल्पा दृष्टिस्तु जांगले ।
मध्यमा मिश्रदेशे तु स्वभावैरेव जायते ॥ ३४६ ॥
दुर्बलोऽप्यशुभो योगो मरुदेशस्तत्वदृष्टिकृत् ।
अबलोऽप्यशुभो योगोऽनूपदेशेऽल्पदृष्टिकृत् ॥ ३४७ ॥
योगायोगफलं योगकर्ता जनयति ग्रहः ।
निजे देशे न सर्वत्र निजो देशः स्वभक्तिगः ॥३४८॥
पूर्वार्द्धे द्रविडानां च नर्मदाशोणयोरपि ।
यमुनादक्षिणप्रान्तस्तथैवेक्षुमती नदी ॥ ३४९ ॥
श्रीशैलविन्ध्यवदेशाश्चम्पपुण्ड्राश्च चेदयः ।
कौशाम्बी मगधा औड्रा सुह्मा वंगाः कलिंगकाः ॥
प्राग्ज्योतिषाश्च शबराः किराता मेकला अपि ।
चीनवाह्लीकयवनकाम्बोजशकनीवृतः ॥ ३५१ ॥
सूर्यस्येन्दोस्तु दुर्गाद्विद्वीपार्णवजलाशयाः ।
तुषाररोमस्त्रीराज्यभरुकच्छाश्च कोशलाः ॥ ३५२ ॥
मंगलस्य तु नासिक्यदण्डकाश्मककेरलाः ।
कुन्तलाः कौंकणाः आन्ध्राः कान्तिरुत्तरपाण्ड्यकाः ॥
पश्चार्द्धे द्रविडानां च नर्मदाशोणयोरपि ।
भीमरथ्याश्च निर्विन्ध्या शिप्रा वेत्रवती नदी ॥३५४॥
वेणा गोदावरी मन्दाकिनी तापी महानदी ।
पयोष्णी गोमती विन्ध्यमहेन्द्रमलयोद्गताः ॥ ३५५ ॥

बुधस्य सिन्धुलोहित्यौ गंगा गम्भीरका रथा ।
सरयूः कौशिकी प्रान्ताश्चित्रकूटो हिमालयः ॥ ३५६ ॥
गोमन्तशैलः सौराष्ट्रं मथुरापूर्वभागकः ।
गुरोस्तु सिन्धुपूर्वार्द्धौ मथुरा पश्चिमार्द्धकः ॥ ३५७ ॥
विपाट् छतद्रूर्मत्स्यार्द्धमुदीच्या अर्जुनायनम् ।
सारस्वतं वाटधानं रमटाश्चटुपारताः ॥ ३५८ ॥
सुह्मसौवीरभरतसाल्वत्रैगर्तपौरवाः ।
यौधेया अथ शुक्रस्य वितस्तेरावती नदी ॥ ३५९ ॥
चन्द्रभागा तक्षशिला गान्धारः पुष्कलावतम् ।
मालवोशीनरशिविमस्थलंमार्तिकावतम् ॥ ३६० ॥
दशार्णाः कैकयादेशा अथ सूर्यसुतस्य तु ।
वेदस्मृती च विदिशा क्षेत्रं विनशनोपगम् ॥ ३६१ ॥
प्रभासः पश्चिमा देशाः सौराष्ट्राभीरशूद्रकाः ।
आनर्ततः पुष्करप्रान्तोऽर्बुदरैवतकाचलौ ॥ ३६२ ॥
अथ केतोः प्रदेशाः स्युर्मरुदुर्गाचलादयः ।
अवगाणश्चेतहूणपह्लवाश्चोनचोलकाः ॥ ३६३ ॥
शुभः शुभोदयः स्थाने शुभे युक्तेक्षितः शुभैः ।
यो ग्रहस्तस्य देशेषु सर्वानन्दः शुभः शुभः ॥ ३६४ ॥

उपसंहारः (ग्रंथशेषः)

इत्थं कादम्बिनी पूर्णा पूर्णपञ्चग्रहेन्दुभिः (१९५०)
प्रमिते वैक्रमे वर्षे तया तुष्यतु चर्षणिः ॥ ३६५ ॥

यस्य कादम्बनी पूर्णाऽर्पिता विष्णुपदे परा ।
तस्य वर्षोदयादायपूर्णनन्दा परम्परा ॥ ३६६ ॥
प्राचां निबन्धानालोक्य नूतनैः प्रतनैरपि ।
श्लोकैः कादम्बिनीमेतामकरोन्मधुसूदनः ॥ ३६७ ॥
कादम्बिनीदर्शितेऽर्थे बहुत्र स्खलनं बहु ।
संभाव्यते तथाप्यत्र नावहेला विधीयताम् ॥ ३६८ ॥
दुर्गे वैज्ञानिके मार्गे चरतां स्खलने क्वचित् ।
न एवोपहसन्त्यत्राशक्तैर्जातु न यैर्गतम् ॥ ३६९ ॥
दुरूहखेटचरितविज्ञानविकटाध्वनि ।
नामासं स्खलनं सोढ्वाऽप्यग्रे श्लाघ्या पुनर्गतिः ३७०
भूयो भूयः स्खलित्वापि मार्गो यैः प्रथमैः कृतः ।
कृतज्ञस्तत्पदं गत्वा तं मार्गं परिमार्जयेत् ॥ ३७१ ॥
ज्यौतिषं लोकमाल्येऽयं मितं भुवनकोशकम् ।
पञ्चांगानि विदन् सम्यङ्निमित्तज्ञानमश्नुते ॥ ३७२ ॥
निमित्तशास्त्रनिष्णातो निमित्तज्ञानचक्षुषा ।
त्रिनेत्रः पूज्यतां याति सर्वज्ञः स यथा शिवः ॥३७३॥
विद्यावाचस्पतिः श्रीमान् महार्घ्यमधुसूदनः ।
समीक्षां चक्रवर्तीमां समगृह्णात् परीक्षितुम् ॥ ३७४ ॥

इति मैथिलेन महार्घ्यमधुसूदनशर्मणा विरचिता
कादम्बिनी संपूर्णा ॥

समाप्तश्च ग्रंथः ।